5



भूदेव-चरितम् ।

स्वर्गीय महेशचन्द्र तर्कचूडामणि-

प्रणीतम् ।

श्री कुमारदेव मुखोपाध्यायेन

प्रकाशितम्

वाराणस्यां

श्रीलक्ष्मीनारायण यन्त्रे गणपति कृष्ण गुर्जरेण

मुद्रितम् ।



१९१७ ई०

मूल्यम्
सार्धरूप्यकम् ।

सूचना ।

इह खलु बहव एव विद्वांसः शास्त्रनिष्णाता जानन्ति, अन्ये च तदितरे शृण्वन्ति यत् प्रबलेऽप्यस्मिन् कलिकाले धर्म्मः पादेनैकेन तिष्ठति स्थास्यति चेति, परन्तु धर्म्म एकपात् कमप्याश्रयविशेषं दण्डादिकमिवावलम्बेत, नो चेत् स्खलन्नधः पतेदिति; तेन च जराजर्जरकलेवरस्तीव्राहतिघूर्णितश्चूर्णितसर्वाङ्गस्तिष्ठेन्नाममात्रावशेषः। एकोऽपि पादस्तस्य नाखण्डः किन्तु व्यष्टिबहुखण्डशः समष्ट्या निष्पद्यते, तथाहि पूर्वस्यां दिशि प्राग्ज्योतिषि रामे धर्म्मस्यानकपादः, पश्चिमायां मुम्बय्यामानकपादो वेङ्कटस्वामिनि, दक्षिणस्यां कन्याकुमारिकायामानकपादो धम्मपदे, उत्तरस्यां नेपाले जटाधरे आनकार्द्धं महीधरे चानकपादार्द्धं; इत्थमङ्गे वङ्गे कलिङ्गे राढ़े गौड़े द्रविड़े च देशे कस्मिंश्चिद्ब्राह्मणे धर्म्मस्यानकपादश्चाण्डालेऽप्यानकपादार्द्धमेवमेव भारतीयार्यधर्म्मस्यांशमंशं स्थूलसूक्ष्मरूपमेकीकृत्य पाद एकः सम्पूर्यते, तेनैवैकेन पादेन धार्म्मिकमाश्रित्य धर्म्मस्तिष्ठति स्थास्यति चेति ।

तत्रैकोऽपि धर्म्मो देशकालपात्रवर्णादिभेदेन बहुधा भिन्न इव वर्त्तते न तु समूलं विनश्येत् ।

तत्र सज्जनाः कथयन्ति—तेषां धर्म्माश्रयाणामन्यतमो वरिष्ठो वङ्गे चुँचुड़ा-ग्रामे विश्वनाथतर्कभूषणात्मजो मत्पितामहो भूदेवमुखोपाध्याय आसीदित्यत्र न केऽपि विप्रत्यपद्यन्त, यतोऽधुना बलवति कलौ मानवानां शिक्षामहिम्ना दानं दया धर्म्मो वीरत्वं च प्रायः पाश्चात्यानेवानुकरोति, तेनैव हि लोको ह्लादते धन्यवादं चाधिगच्छति, किन्तु पितामहो मदीयः पाश्चात्यशिक्षयातिसुशिक्षितोऽपि तदन्यथाचरंस्तद्व्यत्ययमदर्शयत् ।

तथाहि—तस्मिन्नेवैकस्मिन्नुत्तमप्रकृतिके दृढ़ोत्साहे सुवर्णवर्णे चतुर्धा वीरत्वं लक्ष्यते—धर्म्मे दाने युद्धे दयायां चेति । तस्य हि महात्मनो ज्ञातीरूपं कुलं विद्याबुद्धिर्व्यवहारश्च विश्वनाथतः

सङ्क्रामितो धर्म्ममेवैकमनुसरति। दानमपि तेन स्वभोगमवान्तरमानुषङ्गिकीकृत्य केवलं परार्थमेवानुष्ठितम्। स खलु प्रबलेनापि कलिना तदनुचरैरसाधुभिरधः पातयितुं पुनः पुनर्निर्दयमाकृष्टोऽपि स्वविवेकप्रवर्त्तनया मनोबलेन धर्म्मवर्म्मावृतः स्वस्थो युद्धं व्यजयत, तस्य दयापि जातिधर्म्मनिर्विशेषेण स्वदेशं प्रति हिमवतः समुद्रावधिर्गङ्गेवाविच्छिन्ना विमला प्रावहत्।

असौ महात्मा स्वदेशोपचिकीर्षया बलवत्या प्रवर्त्तित आमृत्युकालं परार्त्तिहरणार्थमुपदेशजातं स्वकृते ग्रन्थनिकरे प्रादर्शयत्, परन्त्वेते तावन्तः सद्गुणास्तत्पितृदेवादेवास्मिन् समक्रामन्।

अपिच अस्य महात्मनश्चरितं के नानुचिकीर्षन्तः शुश्रूषेरन्निति तत्प्रेमानुरुद्धो दिनाजपुरे राजारामपुरनिवासः सर्वशास्त्रनिष्णातः पण्डितप्रवरः कविप्रवीरो महेशचन्द्रतर्कचूडामणिमहाशयो "भूदेवचरितं" नाम काव्यमिदं प्रथमतो द्वाविंशतिसर्गान्तं व्यरचयत्। ततोऽस्माकमदृष्टदोषात् तस्मिन् महात्मनि स्वर्गते ग्रन्थमेनं मुद्रापयितुमस्यां काश्यां प्रावर्त्ते। अवशिष्टांशस्तु स्वर्गतस्य तस्यानुरूपेणात्मजेन शास्त्रज्ञेन श्रीमता सारदाचन्द्रकविभूषणेन। परैश्च कैश्चिद्भूदेवे भक्तिमद्भिः पण्डितैः समपूर्य्यत, परन्तु स्वर्गतस्य तस्य रचनाचातुर्य्येण वचनमाधुर्य्येण च यथा ग्रन्थस्य सौन्दर्य्यमस्थास्यदन्येषां करणे तथा न समभविष्यदित्यगत्या शोकदुःखमेव सहामहे।

अथैकदा कथोपकथनप्रसङ्गेन—

श्री श्रीभारतधर्म्ममहामण्डलाधिष्ठाता पूज्यपादः श्री १०८ ज्ञानानन्दस्वामी महोदयो भूदेवचरितं ग्रन्थमधीदमवोचत्, यदत्र भूदेवचरिते भूदेवप्रणीतानां पुस्तकानां संज्ञाः प्रतिपाद्यविषयाः सिद्धान्तनिचयाश्चाविकृता एव दृश्येरंस्तदैव तेषां पूर्णत्वमपि न स्खलेन्नान्यथा। अपिच—तत्प्रतिपाद्याः सिद्धान्तनिचया वाचनिकाश्चोपदेशा अत्रैकत्र निबद्धाश्चेत् प्राकाशिष्यन्त तदैव तस्यान्तरालोकादेः स्वरूपं सर्वेषां दर्शने प्रत्यफलिष्यत्। अत्र तु दयादाक्षिण्यादयो नात्यसम्भाविनः परन्तु अन्तर्दृष्टिविषया एव प्रायो न सम्भवन्ति, अत एव यथासम्भवं तत्सिद्धान्तनिचयाः सर्व एवैकत्र निर्दिष्टव्याः सर्वैरनायासं विज्ञेयाः स्युः, नो चेदाद्यन्तं समग्रं पुस्तकवाचं के तान् ज्ञास्यन्तीति। तेन हि तदुपदेशं सम्यङ् मत्वा तथैव कृतमिति।

एकदा जीवति भूदेवे तज्जीवनचरितलेखे प्रस्तूयमाने बन्धुभिस्तेनोक्तं यदि भवद्भिर्मयि कियन्तोऽपि सद्गुणा लक्ष्यन्ते ते खलु नूनं पितृदेवत एव मया लब्धा इत्येवं यदि प्रमापयितुं शक्येत तर्हि तदैव मे जीवनचरितलेखे यतितव्यं नान्यथेति। अहो लोकातिगामि महतां चरितमिति।

"राजानो यं प्रशंसन्ति यं प्रशंसन्ति पण्डिताः।
साधवो यं प्रशंसन्ति स एव पुरुषोत्तमः" ॥
"यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।
महतां चरितं तस्माद् वेदितव्यं विशेषतः" ॥

विनीतनिवेदकस्य
श्री कुमारदेव मुखोपाध्यायस्य।

भूदेव-ग्रन्थावली।

(वंग भाषा)

पूज्यपाद स्वर्गीय भूदेव मुखोपाध्याय प्रणीत पुस्तकें हमारे पास और कलकत्ते में कर्नवालिस स्ट्रिट नं० २०१ बङ्गाल मेडिकल लाइब्रेरी, नं० २२।१ इण्डियन पब्लिशिंग हाउस एवम् नं० ३० संस्कृत प्रेस डिपजिटरी में और भी अन्यान्य स्थानों में मिलेंगी।

पुष्पाञ्जलि ... ... ॥)
पारिवारिकप्रबन्ध ... १)
" उपहार के लिये सुन्दर जिल्द ... १॥)
सामाजिक प्रबन्ध ... १॥)
आचार प्रबन्ध... ... १)
विविध प्रबन्ध १ ला भाग ॥)
" २ रा भाग (तन्त्रों की कथा आदि) ... ॥)
स्वप्नलब्ध भारतवर्ष का इतिहास ... ... ॥)
वंगाल का इतिहास ३ य भाग ॥)
ऐतिहासिक उपन्यास ... ॥)
पुरावृत्तसार प्रथम भाग... ।॥)
इंग्लण्ड का इतिहास ... ।॥)
शिक्षाविधायक प्रस्ताव (पञ्चम संस्करण) ... ... १)
प्राकृतिक विज्ञान (स०सं०) १)

उपर्युक्त सब पुस्तकें एक साथ हमारे पाससे खरीदने से विश्वनाथ ट्रष्ट फंड की दलील की नकल एवं संक्षिप्त भूदेवजीवन चरित सहित बंधे हुए दो खण्ड १०) में मिलेंगे।

विश्वनाथ (दातव्य) ट्रष्ट फण्ड की अन्यान्य पुस्तकें ।

भूदेव-चरितम् (संस्कृत महाकाव्यम्)* ... १॥)
संक्षिप्त भूदेव जीवनी ... ।=)
सदालाप नं० १(सचित्र)... ।॥)
" " २ " ... ।॥)
" " ३ " ... ।॥)
अनाथबन्धु (उपन्यास) १।)
नेपाली छत्री (सचित्र) ... ।॥)
श्रीरामचरित्र की आलोचना १)
एकादशीतत्त्व (देवनागराक्षरों में) ... ... १)
आचार प्रबन्ध (हिन्दी) * १)

* चिन्हित पुस्तकों के अतिरिक्त अन्य पुस्तकें वंगला भाषा में वंगाक्षरों में छपी हैं।

श्री कुमारदेव मुखोपाध्याय ।
विश्वनाथ फण्ड का सेवक, चूँचूड़ा।
P. O. Chinsura, Dt. Hooghly. (Bengal)

भूदेव-चरितम् ।

पापकूटमिवाम्भोधेः कालकूटं निपीय यः ।
मृत्यो ररक्ष लोकांस्त्रीन् महेशो वः स रक्षतु ॥ १ ॥
वाचागुणेन ग्रथ्नामि भूदेवस्य महात्मनः ।
चरित्राणि पवित्राणि विचित्राणि च रत्नवत् ॥ २ ॥
तानि कौस्तुभशुभ्राणि पण्डिता गुणमण्डिताः ।
शीलयन्तु हृदा विष्णोर्मूर्त्तयः खलु ये स्मृताः ॥ ३ ॥
श्रीमन्मुकुन्ददेवस्य भूदेवस्यात्मनो लिपिः ।
मया प्रमाणीक्रियते नाप्रमाणमिहोच्यते ॥ ४ ॥
मुकुन्ददेवं भूदेवस्यात्मानं मे सरस्वती ।
सम्प्रीणयतु भूदेवश्चरित्रगुण-गायनी ॥ ५ ॥
आसीद्बङ्गेषु भूदेवमुखोपाध्यायनामकः ।
भूदेवः कान्यकुब्जोऽपि राढ़ीयश्रेणिपूरणः ॥ ६ ॥
गुरुभक्तोऽनहंवादी स्थूललक्ष्यो विचक्षणः ।

१। अम्भोधेः अम्भोधिसदृशस्य संसारस्य पापकूटं पापराशिमिव अम्भोधेः सागरस्य कालकूटम् ।

२। वाचागुणेनेति। वागेव वाचा तस्या गुणेन प्रसादादिना । अथवा वागेव गुणः शक्तिविशेषस्तेन । उभयत्र सूत्रस्यापि प्रतिपादकत्वाद् गुणशब्दः श्लिष्टः

३। ये पण्डिता ब्राह्मणत्वात् विष्णोर्मूर्त्तयः स्मृताः, तथाच भागवते भगवद्वाक्यम् "अविद्यो वा सविद्यो वा ब्राह्मणो मामकी तनुः" इति । हृदा शीलयन्तु वक्षःस्थलेन धारयन्तु मनसा पर्य्यालोचयन्तु च ।

५। भूदेवस्य ब्राह्मणस्य आत्मानं ब्रह्मण्यदेवत्वात् परमात्मभूतं मुकुन्ददेवं विष्णुम्, अथच भूदेवमुखोपाध्यायस्य पुत्रत्वात् आत्मानं तदभिन्नं "आत्मा वै जायते पुत्रः" इति वचनात् ।

६। भूदेवो ब्राह्मणः ।

सुदृश्यः सज्जनादर्शः कृतज्ञः कृतधीः कृती ॥ ७ ॥
दयालुर्दक्षिणाचारो विप्रपण्डितवत्सलः ।
मितसूनृतवादी च कविः काव्यविचारकृत् ॥ ८ ॥
दृढ़व्रतः स्थिरोत्साहो विद्वान् विद्योन्नतिव्रतः ।
उपकर्त्तोपदेष्टा च संविभक्ता कुटुम्बभृत् ॥ ९ ॥
आजानुलम्बितभुजो महापुरुषलक्षणः ।
प्रियो लक्ष्मीसरस्वत्योः सपत्न्योरुभयोरपि ॥ १० ॥
कलिकाता-महापुर्य्या द्वादशक्रोशदूरगाम् ।
उदीच्यां हुगलीभुक्तां योऽध्यास्त चुचुड़ापुरम् ॥ ११ ॥
पुत्रपौत्रादयो यस्य पुण्यच्छत्रेण रक्षिताः ।
वीततापा विराजन्ते कायव्यूहा इवात्मनः ॥ १२ ॥
मुकुन्ददेवः सुदशो यस्य स्नेहभुगात्मजः ।
कुलदीपः कलेर्वातात् पुण्यच्छत्रेण रक्ष्यते ॥ १३ ॥
सौधा यस्यामरागारमठयन्त्रालयादयः ।
पुण्यैरिव सिता भान्ति भागीरथ्यास्तटेऽपरे ॥ १४ ॥
गङ्गया लहरीहस्तैर्वर्षास्वामृष्टदेहलि ।
सिक्तप्रसूनवाटश्च यस्य स्वर्गायते गृहम् ॥ १५ ॥
यस्य त्रिवर्गस्त्रोतांसि त्रिस्रोता वीक्ष्य सर्व्वदा ।
ईर्ष्यावतीव वध्नाति भ्रूभङ्गीं लहरीच्छलात् ॥ १६ ॥
प्रवाहा इव गङ्गायास्त्रयो यस्य हि दूरगाः ।
धर्म्मार्थकामप्रसरास्त्रीन् लोकान् पुनतेऽनिशम् ॥ १७ ॥
यथा स्वर्मर्त्यपाताललोकान् गङ्गा पुनाति सा ।
तथा पुनाति यत्कीर्त्तिर्मान्त्वामन्यांश्च पूरुषान् ॥ १८ ॥

१३। सुदशः शोभना दशा अवस्था यस्य इति मुकुन्ददेवपक्षे, दीपपक्षे सुदशो निर्म्मलवर्त्तिकः। यस्य स्नेहभुक् स्नेहं वात्सल्यं भुङ्क्ते अनुभवतीति मुकुन्ददेवपक्षे; दीपपक्षे तु घृततैलादिस्नेहचूषकः ।

१५। सिक्तप्रसूनवाटं गङ्गया सिक्तपुष्पवाटीकश्च। वाटो मार्गे वृतिस्थाने इति मेदिनी।

१८। मां त्वामन्यांश्च पूरुषानिति उत्तम-मध्यम-प्रथमपुरुषानित्यर्थः, त्रैलोक्ये नामयुष्मदस्मन्नामवाच्येतरस्य अभावात्।

वार्त्तावहेषु पत्रेषु चित्तेषु च सतां सदा ।
नाम यस्यै च जागर्त्ति वज्रमस्येव मुद्रितम् ॥ १९ ॥
विद्यावतां प्रसङ्गेषु वदान्यानां कथासु वा ।
उदाहरन्ति वक्तारो यस्य नाम पदे पदे ॥ २० ॥
प्रियाणां हृदि यन्मूर्त्तिर्यत्कीर्त्तिर्दिशि दिश्यपि ।
ग्रन्थेषु यस्य चित्तञ्च दृश्यते दर्पणेष्विव ॥ २१ ॥
कथ्यते चरितं तस्य भूदेवस्य महामतेः ।
भूदेवचरिते काव्ये पावनी हि सतां कथा ॥ २२ ॥
दोषज्ञा अपि मे दोषान् क्षन्तुमर्हन्ति सज्जनाः ।
निमज्जन्त्वथवा दोषा गम्भीरे तत्कथारसे ॥ २३ ॥
बालस्य चरितं तस्य यूनो वृद्धस्य च क्रमात् ।
वच्मि जन्मन आरभ्य तनुत्यागक्षणावधि ॥ २४ ॥
पञ्च गोत्राः पुरा पञ्च विप्रा दीप्रा मखेऽग्निवत् ।
आनिन्यिरे कान्यकुब्जादादिशूरेण सूरयः ॥ २५ ॥
तेषां मध्ये भरद्वाजगोत्रः श्रीहर्षनामकः ।
अगण्यैर्गुणैरासीद् हर्षो मूर्त्त इव श्रियः ॥ २६ ॥
पिता मेधातिथिर्यस्य भाष्यकारो मनुस्मृतेः ।
यस्य चोन्नीयते धीरैर्वीरस्वामी पितामहः ॥ २७ ॥
श्रीहर्षस्य मुनेस्तस्य वंशे कश्चिदजायत ।
कामदेव इति ख्यातः पण्डितोपाधिमण्डितः ॥ २८ ॥
किं तस्य वच्मि माहात्म्यं कामदेवस्य धीमतः ।
लोकाः कामात् परतरो न हीत्येव स्तुवन्ति यम् ॥ २९ ॥
कामदेवस्य तस्यासीदेकादशसु सूनुषु ।
मधुसूदन इत्येको मधुसूदनवत् कृती ॥ ३० ॥
सन्तोषो नाम तत्पुत्रः सन्तोषो मूर्त्तिमानिव ।
आसीन्मुकुटरायेति ख्यातो लोकस्य रञ्जनात् ॥ ३१ ॥
तेजसा द्विजराजोऽसौ रेजे मुकुटराजवत् ।
अतो मुकुटरायेति ख्यातः कैश्चित् स तर्क्यते ॥ ३२ ॥
राज्ञाऽपि शिरसा धार्य्यः स आसीन्मुकुटोपमः ।

---

१९ । वज्रमस्येव मुद्रितम्—वज्रवत् दृढ़ा मसी वज्रमसी तया ।

इत्यतो रायमुकुटेत्याख्या तस्येति नो मतम् ॥ ३३ ॥
आख्या सैव निपातस्य व्यत्ययात् प्राकृतोक्तिषु ।
जाता मुकुटरायेति पुत्रसम्भावितेतिवत् ॥ ३४ ॥
आसीदमरकोषस्य टीकाकारस्य कस्यचित् ।
या रायमुकुटेत्याख्या तया संवदते च सा ॥ ३५ ॥
यथा तथाऽथवा सास्तु ख्यातिर्व्युत्पत्तिशालिनी ।
किन्तया चिन्तया नोऽद्य महिमव्यञ्जिकैव सा ॥ ३६ ॥
सन्तोषस्याभवत् पुत्रो रामकान्त इति श्रुतः ।
सोऽवसद् हुगलीभुक्ते ग्रामे दशघराभिधे ॥ ३७ ॥
तनयो रामकान्तस्य गोपीवल्लभ इत्यभूत् ।
गोपीवल्लभपुत्रश्च रामकानाइनामकः ॥ ३८ ॥
रामकानाइनामासाववज्ञाय कुलादरम् ।
ग्रामे वदनगञ्जाख्ये विवाहमकरोच्छुभम् ॥ ३९ ॥
तस्य रामेश्वरः पुत्रो ग्रामे नतिवपुर्य्यथ ।
खानाकुलकृष्णनगरस्यादूरे न्यवसद्वशी ॥ ४० ॥
विद्यावागीश इत्यासीदुपाधिस्तस्य यौगिकः ।
रामेश्वरस्य नीत्यादिविद्यासु गुरुवद् गुरोः ॥ ४१ ॥
रामेश्वरस्य तस्यासीद् हरिनारायणः सुतः ।
सार्व्वभौम इति ख्यातिं लेभे यो विद्यया गुरोः ॥ ४२ ॥
हरिनारायणस्यास्तामग्रजौ भ्रातरावुभौ ।
पैतृक्याः सम्पदो हेतोर्व्यवदेतान्तु तेन तौ ॥ ४३ ॥
वञ्चयन् कलहं तन्तु हरिनारायणः सुधीः ।
पित्र्यं सर्व्वस्वमत्याक्षीत् कलिस्त्याज्यो हि धीमता ॥ ४४ ॥
भ्रातरौ सम्पदं ताञ्च वास्तुं तञ्च विहाय सः ।
नामैव श्रीहरेर्गृह्णन् कलिकातापुरीं ययौ ॥ ४५ ॥
श्रियोऽपि कलिसम्मिश्रा अमन्यत तृणाय सः ।
विषदिग्धानि मिष्टान्नान्यपि मुञ्चन्ति पण्डिताः ॥ ४६ ॥
भ्रातरः कलहायन्ते स्वल्पस्यापि कृते कलौ ।
सार्व्वभौमस्तु सत्याय श्रिया सह कलिं जहौ ॥ ४७ ॥
विद्यां विष्णोश्च चरणमविभाज्यं धनं वहन् ।
कलिग्रस्तां जहौ पल्लीं सर्पदष्टामिवाङ्गुलीम् ॥ ४८ ॥
हरीतकीबागानाख्ये स्थाने पत्न्या सहाथ सः ।

कलिकातामहापुर्य्यां न्यवसच्छमवत्सलः ॥ ४६ ॥
सरस्वत्याः प्रसादेन सत्यस्यानुग्रहेण च ।
याजनाध्यापनाभ्यां स पुण्यां वृत्तिमवर्त्तयत् ॥ ५० ॥
पितुर्लक्ष्मीर्विमातेव सार्व्वभौमं तमत्यजत् ।
सरस्वती तु मातेव दुग्धं स्तन्यमपाययत् ॥ ५१ ॥
दुग्धं दधि घृतं क्षीरं यजमानेभ्य आगतम् ।
वात्सल्याद्विद्यया मात्रा दत्तं स्तन्यमिवापिवत् ॥५२॥
अध्यापितेभ्यः शिष्येभ्यो दक्षिणामप्युपागमत् ।
स्नेहान्मात्रा सरस्वत्या स प्रसादीकृतामिव ॥ ५३ ॥
राजाऽपि क्षीयते दूरे विदेशे भुक्तसञ्चयः ।
तत्रापि वर्द्धते विद्वान् "विद्वान् सर्व्वत्र पूज्यते" ॥ ५४ ॥
पूजितः कलिकातास्थैर्मानेन च धनेन च ।
दरिद्रैर्धनवद्भिश्च सार्व्वभौमो व्यवर्धत ॥ ५५ ॥
क्रमेण वर्धमानोऽसौ भ्रातॄणां तनयानपि ।
प्राप्तानध्यापिपद्विद्यामन्नाच्छादनमानदः ॥ ५६ ॥
सोऽधस्तनान् यथा वालान् विद्ययावर्धयत् कृती ।
तथैवोर्द्ध्वतनान्नाम्नाऽदीपयत् कुलदीपनः ॥ ५७ ॥
पुत्रान् प्रापाशिषा सोऽष्टौ पूर्व्वेषां पुण्यलक्षणान् ।
आकृत्या च प्रकृत्या च कामदेवानुसारिणः ॥ ५८ ॥
विश्वनाथो ऽजनि ज्येष्ठस्तेषु श्रेष्ठश्च सूनुषु ।
कामानुरूपो गुणवान् दीर्घाकारः सुदर्शनः ॥ ५६ ॥
सुमेधा विश्वनाथोऽसावुपाध्यायात् प्रसेदुषः ।
तर्कभूषण इत्याख्यां प्रसादं प्राप विद्यया ॥ ६० ॥
शब्दशास्त्रे विशेषेण साहित्ये ज्योतिषि स्मृतौ ।
पुराणेषु च तन्त्रेषु प्राज्ञोऽभूदचिरादसौ ॥ ६१ ॥
यस्य कस्यापि शब्दस्य प्राकृतस्येतरस्य वा ।
व्युत्पत्तिं योजयामास संस्कृतेनैव सोऽनिशम् ॥ ६२ ॥
न प्रसीदति वाग्देवी नित्यमाराधनां विना ।
इति पित्र्योपदेशात् स व्युत्पत्त्यायोजयत् पदम् ॥ ६३ ॥
सा शक्तिर्विश्वनाथस्य व्यक्ता रामायणेऽभवत् ।
रामायणस्य व्याख्या हि तेन नानाविधा कृता ॥ ६४ ॥
घटकानां निबन्धेषु वैद्यशास्त्रेषु बुद्धिमान् ।

रासायनिकयोगे च स आसीद्बहुदर्शनः ॥ ६५ ॥
पण्डितो यादृगासीत् स तादृगासीच्च सुन्दरः ।
यौवने तस्य सौन्दर्य्यं मधौ पद्ममिवास्फुटत् ॥ ६६ ॥
छन्दःप्रांशुः प्रभा गौरी भालमर्द्धेन्दुसुन्दरम् ।
मुखं प्रसन्नं नेत्रे च सुदीर्घे तीक्ष्णदर्शिनी ॥ ६७ ॥
ओष्ठाधरौ च तस्यास्तामस्थूलौ कमलारुणौ ।
संक्रान्तालक्तकौ ब्राह्म्यपदसञ्चुम्बनादिव ॥ ६८ ॥
बाहू दीर्घावुरो व्यूढं नाभिर्निम्नोदरं कृशम् ।
सन्धयोऽस्य दृढाश्चासन् षड्वर्गमिव जेष्यतः ॥ ६९ ॥
पादौ च पूजितावास्तां कोमलौ कोमलाङ्गुली ।
शिष्याणामनुरागेण रञ्जिताविव लोहितौ ॥ ७० ॥
व्यवहद्विश्वनाथोऽथ कन्यां पालधिवंशजाम् ।
जाहानावाददिग्भुक्ते पाण्डुग्रामे पितुर्मताम् ॥ ७१ ॥
स तां ब्रह्ममयीं नाम ब्रह्मविद्यामिवापराम् ।
परिणीय गृहं निन्ये रमामिव मनोरमाम् ॥ ७२ ॥
कान्ते सत्यपि रूपे सा स्वान्तं श्वशुरसन्ततेः ।
गुणैः कान्ततरैः क्रान्त्वा शुशुभे शुभलक्षणा ॥ ७३ ॥
अथ ब्रह्ममयी-विश्वनाथयोः पुण्यपाकजः ।
पुत्रो बभूव भूदेवो देवः कश्चिदिवागतः ॥ ७४ ॥
रसवेदर्षिशीतांशुपूरणे शकहायने ।
तृतीये फाल्गुनस्याह्नि भूदेवो भुव्यवातरत् ॥ ७५ ॥
इत्थं पण्डितरत्नानां कुले स कुलदीपनः ।
खनौ हीरकरत्नानां स्यमन्तक इवाजनि ॥ ७६ ॥
भूदेव इति तन्नाम ज्योतिर्विद्वस्तकर्कभूषणः ।
राशि-नक्षत्रजातीनां सूचकं जनकोऽकरोत् ॥ ७७ ॥
दृष्ट्वा शिशुं यमगमन् प्रतिवेशिनोऽपि
दिव्यं प्रहर्षममरा इव निर्निमेषाः ।
तं पश्यतोः पितृपितामहयोर्य आसी-
न्मोदः कथं वचनवर्त्मनि वर्त्ततां सः ॥ ७८ ॥
जातं वामनविग्रहं बलिवलध्वंसाय विष्णुं यथा
हर्षेणादितिकश्यपौ ददृशतुर्दीर्घीभवन्तं पुरा ।

भूदेवं पितरौ तथा निपपतुस्तं ह्रस्वमूर्त्तिं दृशा
बालं भाविसमुन्नतिं कलिमलच्छेदाय मोदान्वितौ ॥ ७६ ॥

इति श्रीमहेशचन्द्रकृतौ भूदेव-चरिते काव्ये
भूदेवावतारो नाम प्रथमः सर्गः ॥

द्वितीयः सर्गः ।

बाल्यचरितम् ।

संस्कृत्य पित्राथ यथा विधानं
भूदेव इत्येव कृताभिधानः ।
अदीपि बालः स्वगुणैरुदारै-
र्महामणिर्मृष्ट इवाब्जरागः ॥ १ ॥

तथाहि तस्मिन्मणिदर्पणे वा
छायेव लक्ष्मीरपतत् पितुः सा ।
तदेव रूपं कनकावदातं
सैवाकृतिः सा मधुरा च मूर्त्तिः ॥ २ ॥

मुखं प्रसन्नं पितृवत्तदीयं
ललाटरेखा च तथा प्रशस्ता ।
यथा विधातुर्ममुरत्र तास्ताः
सौभाग्यवर्णावलयः समस्ताः ॥ ३ ॥

दीर्घौ भुजौ हेममृणालकल्पा-
वङ्गानि लावण्यतरङ्गितानि ।

---

१ । संस्कृत्य जातकर्मनामकरणान्नप्राशनसंस्कारैः पवित्रीकृत्य । कृताभिधानः कृतनामा । अब्जरागः पद्मरागनामा महामणिः ।

३ । एवं महापण्डितो भविष्यति महाधनो भविष्यति महादाता भविष्यति महायशा भविष्यति इत्यादि प्रकाराः सौभाग्यसूचिकास्तास्ताः समस्ताः विधातुर्वर्णावलयः विधेर्लिपयो ऽत्र ललाटे यथा ममुः, तथा प्रशस्ता अभूदित्यर्थः ।

नेत्रे च मैत्रीमिव याचमाने
सरोजपत्रे इव दीर्घमाने ॥ ४ ॥
रूपं शिशोस्तस्य निरुप्य तादृक्
पितामहोऽप्रीयत सार्वभौमः ।
सस्मार चाङ्के ललतः सलीलं
श्रीविश्वनाथस्य गतं शिशुत्वम् ॥ ५ ॥
पितामहस्य प्रणयं स बालः
क्रीड़ारसार्द्रं बहु मन्यते स्म ।
तथा हि तस्य स्वरमेव शृण्वन्
मातुः स्तनादप्यभवन्निवृत्तः ॥ ६ ॥
वचोऽन्ववोचत् स पितामहस्य
क्रियाश्च बालोऽन्वकरोत्तदीयाम् ।
पितामहं देवगृहे नमन्त-
मालोक्य नामानुननाम सोऽपि ॥ ७ ॥
उषस्युषस्युत्थितवान् पिता च
पूर्वं यथावन्दत सार्वभौमम् ।
बालोऽपि तं भुव्यनुबन्ध तद्व-
दाचारशिक्षामचिरेण लेभे ॥ ८ ॥
पितामहेन प्रणयेन शिष्टः
पितुश्च मातुश्च पदं ववन्दे ।
बीजानि सुक्षेत्र इवार्पितानि
फलन्ति शास्त्राण्यचिरात् सुपात्रे ॥ ९ ॥
न वेद्मि कस्मात् स तथापि बाल्ये
प्रायेण रुग्णश्च कृशश्च दृष्टः ।
तं तादृशं वीक्ष्य जनास्तु नाना
चक्रुः कथा भिन्नविधा हि बोधाः ॥ १० ॥
स्त्रियो हि डाकिन्यभिभूतिमूचु-
र्ज्योतिर्विदस्तु ग्रहदृष्टिपातम् ।
व्याधिञ्च वैद्याः कथयाम्बभूवु-
र्धीराः पुनः प्राक्तनकर्मभोगम् ॥ ११ ॥
यथा तथा वास्तु चिरं स रोगी
रुजो निदानन्तु किमप्यदृष्टम् ।

अकारि तस्मात्तदद्दष्टशान्त्यै
मात्रादिभिर्मानसकर्म दैवम् ॥ १२ ॥
श्रीक्षेत्रपालस्य महेश्वरस्य
प्रीत्यै शिशोस्तस्य कचा नियम्य ।
यत्नादरक्ष्यन्त महेश्वरो हि
क्षेत्रस्य रक्षा-क्षययोर्निदानम् ॥ १३ ॥
असंस्कृतास्ते नियमेन केशा-
जटा बभूवुर्दयिताः शिवस्य ।
बालश्च रेजे जटिलस्तदादि
रजोवृतस्तस्य परिग्रहो वा ॥ १४ ॥
शुकाभमव्यक्तमपि ब्रुवन्तं
पितामहः पौत्रमशिक्षयत्तम् ।
स नामगोत्रप्रवरादिपाठान्
श्लोकान् बहूनादिकवेश्च पुण्यान् ॥ १५ ॥
श्लोकान् सुखं शिक्षितवान् सुमेधाः
पपाठ यावत्कलया गिरा तान् ।
नग्नोऽपि शुद्धो जटिलः स ताव-
दालोकि बालः शुकदेवतुल्यः ॥ १६ ॥
अशिक्षत क्षिप्रमसौ कुमार-
श्चिराय सस्मार च शिक्षितं यत् ।
आसीदकार्येषु सकृन्निषिद्ध-
स्तथापि तान्यामरणं जहौ च ॥ १७ ॥
प्रायेण बालाः प्रतिषिद्धवामाः
कुर्वन्त्यघं तर्जितताडिताश्च ।
असावपश्यत्तु निषिद्ध एव
हिताहिते द्वे अपि वर्त्मनी स्वे ॥ १८ ॥
वृद्धानुकारी परिधाय पद्भ्या-
मुपानहौ तातपदोः कदाचित् ।
मातुः समक्षं व्यचरत् स चारु
पितुस्तमाचारमिवानुकुर्वन् ॥ १९ ॥
माता तदा ब्रह्ममयीति देवी
पुत्रेण ते पादतलाभिमृष्टे ।

उपानहौ वीक्ष्य महापराधं
महागुरोस्तेन कृतं शशङ्के ॥ २० ॥
तेनापराधेन सुतस्य तस्य
कुलस्य चाशङ्कितवत्यनिष्टम् ।
उपानहौ ते शिरसा सुतेन
साऽवाहयत्पादयुगाद्विमोच्य ॥ २१ ॥
पतिं समुद्दिश्य सती स्वयं च
क्षमां ययाचेऽस्य शिशोरघस्य ।
एकः पतिर्ब्रह्महरीश्वराद्याः
सर्वे हि देवाः पतिदेवतानाम् ॥ २२ ॥
उदुह्य भूदेव उपानहौ ते
मूर्ध्ना पितुर्भक्तिमशिक्षतेत्थम् ।
तदादि वालोऽपि पितुर्महत्त्व-
माकाशतोऽप्युच्चतरं विवेद ॥ २३ ॥
पतिव्रता सा तु चिरं विवेद
पतिं हरेरप्यधिकं महिम्ना ।
हरेश्च पादोदकतोऽपि पत्युः
पादोदकं पुण्यतरं न्यवोधि ॥ २४ ॥
तथाहि पत्युः परमं पवित्र-
मपीतवत्या चरणोदबिन्दुम् ।
न गाङ्गमप्यम्बु तया कदाचित्
पपे पिपासाकुलयापि साध्व्या ॥ २५ ॥
यद्धर्मतत्त्वं निहितं गुहाया-
मन्विष्यते योगिजनैर्वनस्थैः ।
दिव्येक्षणा ब्रह्ममयी तयोस्तत्
पादाब्जयोरेव ददर्श पत्युः ॥ २६ ॥

२३। तथाच युधिष्ठिरं प्रति यक्षस्य प्रश्नः—"किंस्विद् गुरुतरं भूमेः किंस्विदुच्चतरं च खात्"॥ इति । युधिष्ठिरस्योत्तरन्तु—"माता गुरुतरा भूमेः खात् पितोच्चतरस्तथा"॥ इति। अत उक्तं "पितुर्महत्त्वमाकाशतो-ऽप्युच्चतरं विवेद" इति ।

देवेषु विप्रेषु च भक्तिरासीद्
व्रतं यथा भर्त्तृकुलेऽनुपूर्वम् ।
तांस्तांस्तथा ब्रह्ममयी च भेजे
पत्युर्मनोवृत्तिरिव द्वितीया ॥ २७ ॥
सा ह्रीष्टमन्त्राञ्चिभृतं जपन्ती
विस्मृत्य वाह्यान् विषयान् समस्तान् ।
क्वचित् क्वचिद् ब्रह्मणि वा निलीना
याथार्थ्यतो ब्रह्ममयीव चासीत् ॥ २८ ॥
सांसारिके दैन्यशतेऽपि जाते
सकृत् सती देवगृहं प्रविश्य ।
न वेद्मि देवात् किमिवाधिगत्य
विनिर्गतादृश्यत सुप्रसन्ना ॥ २९ ॥
देवीव तं ब्रह्ममयी कुमारं
साशिक्षयद्धर्ममनेकरूपम् ।
देवेषु विप्रेषु गुरौ च भक्तिं
दानानुरक्तिं च दयाप्रसक्तिम् ॥ ३० ॥
अकारयत्तेन सुतेन माता
सा देवसेवोपकृतीरनेकाः ।
उत्साहवान् सोऽप्यचिरेण मातु-
रुपानयत् पुष्पफलप्रवालम् ॥ ३१ ॥
प्रज्वाल्य दीपानथ धूपयष्टी-
र्मातुर्ददौ वा घनवाद्यलुब्धः ।
उपाहरत् पुष्पदलस्रजो वा
स्वयं समुद्ग्रथ्य कदाचिदस्याः ॥ ३२ ॥
सादापयद् ब्रह्ममयी सुतेन
भिक्षां दरिद्राय गृहागताय ।
पिपासवे वारि बुभुक्षवेऽन्नं
पुरोधसे पाद्यमथासनञ्च ॥ ३३ ॥

---

३२ । घनं कांस्यतालादिकं तस्य वाद्याय लुब्धः लोभवान् स्वयं कांस्यताला-
दिवादनाय इत्यर्थः ।

इत्थं पवित्रैव बभूव तस्य
बालस्य लीलापि विचित्रशीला ।
प्रायो रजःपङ्कमलीमसा हि
क्रीड़ाः शिशूनां दयिता भवन्ति ॥ ३४ ॥

भूदेव इत्थं स विनीयमानो
मात्रा च पित्रा च पितामहेन ।
जगाम वृद्धिं वयसा धिया च
भावानुवृत्त्या शुभया च तेषाम् ॥ ३५ ॥

तथाहि पित्रोर्हृदयस्य भावाः
कारुण्यदाक्षिण्यवदान्यताद्याः ।
ते तेऽन्ववर्त्तन्त तमप्युदाराः
सूत्राधिकारा इव सूत्रमन्यत् ॥ ३६ ॥

महद्भवन्तोऽपि पुरा तयोस्ते
भावाः शिशोश्चेतसि रेजुरल्पे ।
वीजस्य गर्भे दधतोऽङ्कुरत्वं
महीरुहा भान्ति यथाणुमात्रा ॥ ३७ ॥

बाह्येऽङ्गने वा पथि वा स भिक्षु-
मायान्तमेष्यन्तमथापि पश्यन् ।
आनीय भिक्षां स्वयमेव दातुम्
मातुः समीपं सहसाभ्यधावत् ॥ ३८ ॥

दानं दरिद्रेषु दया विपन्ने-
ष्वामन्त्रणं वा क्षितिदेवतानाम् ।
अर्चा सुराणां च पितुर्नियोगो
महोत्सवस्तस्य शिशोर्बभूव ॥ ३९ ॥

वृद्धानुकारी गुणलम्पटोऽसौ
यत् कर्म कुर्वन्तमवोधि वृद्धम् ।

---

३६ । सूत्राधिकारा इव सूत्रमन्यत् । व्याकरणादिशास्त्रसूत्रस्य अधिकारा यथोत्तरं सूत्रमनुवर्त्तन्ते तथेत्यर्थः ।

३७ । अमहान्तो महान्तो भवन्त इति महद्भवन्तः पुरा महद्भवन्तः महद्भ-विष्यन्त इत्यर्थः ।

तत् कर्म कुर्वन्निव वृद्धमानी
चिक्रीड बालैर्विहरन् वयस्यैः ॥ ४० ॥
वैद्यः कदाचिज् ज्वरितस्य तस्य
नाडीपरीक्षामकरोद् यथाप्तः ।
शिशुस्तथान्यस्य करं स धृत्वा
चकार चिन्तामिव धातुगत्याः ॥ ४१ ॥
वैद्योऽथ भैषज्यवटीं तदीये
हस्ते यथादादनुपानमुक्त्वा ।
शिशोः करेऽन्यस्य पथो गृहीत्वा
सोऽपीष्टकालोष्टमदात्तथैव ॥ ४२ ॥
सा तस्य वृद्धानुचिकीर्षुतेत्थं
क्रीडैव बाल्ये यदि निश्चिताभूत् ।
तथापि विद्याजनि सा तु काले
विडम्बनापीह सतां पुनाति ॥ ४३ ॥
या होमियोप्याथिगिति प्रसिद्धा
याप्येलियोप्याथिगिति प्रतीता ।
काले चिकित्सा विनियोगविद्ये
ते पूर्वसिद्धे इव जग्मतुस्तम् ॥ ४४ ॥
आयुष्यवेदेऽपि विदाञ्चकार
विद्वान् स सूक्ष्मानपि तान् विशेषान् ।
शरश्च तीक्ष्णः प्रतिभा च तीक्ष्णा
लक्ष्यस्य मर्मैव झटित्युपैति ॥ ४५ ॥
पितामहः पञ्चमवत्सरेऽथ
विद्यासमारम्भमकारयत्तम् ।
वर्णैः समुन्मीलितयेव दृष्ट्या
सारस्वतं वर्त्म ददर्श सोऽपि ॥ ४६ ॥
पितापि वर्त्मानि स विश्वनाथो
भौमानि दिव्यानि च तानि तानि ।

---

४६ । सोऽपि भूदेवोऽपि वर्णैः शुक्लकृष्णरक्तादिभीरङ्गैः समुन्मीलितया सम्यगुद्भावितया दृष्ट्या चक्षुषा इव वर्णैः स्वरव्यञ्जनरूपै रक्षरैः सम्यगुत्तेजितया दृष्ट्या ज्ञानेन सरस्वत्याः पन्थानन्ददर्श इत्यर्थः ।

उपादिशद् बाल्यत एव पुत्रं
घटे छ्यपके स्थितिमेति रेखा ॥ ४७ ॥
पुरः पुरो वर्त्म स वेदयिष्यन्
नीत्वा तमन्यत्र पिता जगाद ।
वत्स स्वयं गच्छ गृहं स्वकीयम्
मया तु गन्तव्यमितोऽपि दूरे ॥ ४८ ॥
दृष्ट्वा च पृष्ट्वा च सुतोऽपि वर्त्म
स्वमेव गेहं पुनराजगाम ।
यस्मिन् युवानोऽप्यपथे पतन्ति
तस्मिन् पुरे सोऽगमदप्रमत्तः ॥ ४९ ।
भ्रान्त्वापि सर्वं दिनमुत्पथे यः
शिशुर्दिनान्तेऽपि निशान्तवर्त्म ।
पश्येत् कथञ्चित् सुकृतेन सोऽपि
प्रशस्यते किं पुनरभ्रमो यः ॥ ५० ॥

४७। भौमानि वर्त्मानि आपणादिगमनपथान् । दिव्यानि वर्त्माणि प्रशंसादि-लाभपथान् सच्चरित्रादीन् ।

४८। पुरः प्रथमतः। पुरो वर्त्म नगरस्य कलिकाताभिधस्य पन्थानम् ।

४९। यस्मिन् पुरे कालिकातानाम्नि नगरे (समदर्शनगृहद्वारवर्त्मसंवाधे इति यावत्) युवानोऽपि अभिज्ञातसर्वस्थाना अबाला अपि अपथे भ्रमात् गन्तव्यपथं त्यक्त्वा अन्यस्मिन् पथि पतन्ति गच्छन्ति, तस्मिन् नगरे स भूदेवः (अनभिज्ञातसर्वप्रदेशोऽपि बालक इति भावः) अप्रमत्तः भ्रमादिशून्यः सन् अगमत् ऋजुनैव पथा गृहमगमत् इत्येकोऽर्थः । अपरस्तु यत्र पुरे (सुलभमिष्टान्नवेश्यासुरादिसंकुले इति भावः) युवानोऽपि उत्पन्नहिताहितज्ञानाः यौवनशालिनोऽपि अपथे अभोज्यभोजनवेश्यासुरापानादिप्रसंगे दुराचारे पथि पतन्ति पातित्यजन-कपापयुक्ता भवन्ति तस्मिन् नगरे अप्रमत्तः पितुरुपदेशेन सावधानः तेषु तेषु पापेषु अपतन् सः अगमत् पवित्रमाचारम् प्राप इत्यर्थः ।

५०। अस्य श्लोकस्य व्यङ्ग्योऽर्थः । यः शिशुरिव ज्ञानशून्यः सर्वं दिनमिव यावज्जीवं उत्पथे परिभ्रम्यापि दिनान्तवत् जीवनान्तकालेऽपि गृहव-

क्रीड़ारसेनेव पिता तमित्थं
स शिक्षयामास गुणाननल्पान् ।
शरस्य मोक्तं धनुषा कदाचित्
क्वचित् समे वर्त्मनि धावनं वा ॥ ५१ ॥

शरप्रयोगेण सहैव लक्ष्ये
वधान दानं च स शिक्षते स्म ।
पितुः पदानुक्रमणेन पूर्वैः
क्षुण्णम् महद्‌ वर्त्म च वीक्षते स्म ॥ ५२ ॥

इत्थं गुणानां ग्रहणेन सार्द्धं
स मातृभाषाध्ययनं चकार ।
द्वित्रैश्च वर्षैरुचितौ विवेद
स्वदेशभाषाक्षरपाठलेखौ ॥ ५३ ॥

भूदेवं कान्तदान्तं मधुमधुरगिरं सुन्दरे वक्त्रबिम्बे
यर्हि स्नेहाच्चुचुम्बे शुचिरुचिररुचिर्मातृका मातृवाणी ।

त्मैव ब्रह्मनिर्वाणपथं पुण्येन भगवत्प्रसादेन कथमपि पश्येत् जानीयात् सोऽपि प्रशस्यते " महात्मायं " इति स्तूयते, यः पुनरभ्रमः पापपथ-भ्रमणशून्यः स स्तूयत इति किं कथ्यते । तथा चोक्तं भगवद्‌गीतायां " एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति । स्थित्वास्यामन्त-कालेऽपि ब्रह्मनिर्वाणमृच्छति " इति । " अन्तकालेऽपि मामेव स्मरन् मुक्त्वा कलेवरम् । यः प्रयाति स मद्‌भावं याति नास्त्यत्र संशयः" इति च तद्वद् भूदेवनामा शिशुरपि भ्रमं विनैव गृहं गतवानिति सविशेषं स्तूयते इति भावः । अत्र समासोक्तिरलङ्कारः ।

५२ । शरेण लक्ष्यवस्तुनि वेधनीये एकतानमनःसंयोगोऽवश्यं शिक्षणीयः । भूदेवो लक्ष्यवेधाय एकतानमनःसंयोगं शिक्षित्वा अपरेष्वपि शास्त्रार्थ-ग्रहणादिषु लक्ष्येषु तादृशमनोयोगदानमशिक्षतेति भावः । एवं पितुः पादन्यासं दृष्ट्वा दृष्ट्वा तमनुगत्य पितामहप्रपितामहादिभिः पूर्वपुरुषैः क्षुण्णं प्रहतं स्वीकृतमिति यावत् दीर्घं वर्त्म परम्परागतामाचारधर्मपदवीञ्च अन्विष्य अन्वगच्छदिति भावः ।

तद्ध्येनं विश्वनाथो न्यधित पदतले देववाण्यास्ततस्तु
श्रीराच्छिद्यानिनाय स्ववशमसहना राजवाण्यां विलोभ्य ॥५४॥

इति श्रीमहेशचन्द्रकृतौ भूदेव-चरिते काव्ये बाल्यचरितं
नाम द्वितीयः सर्गः ॥



५४। शुचिः शुद्धा पदपदार्थवाक्यादिदोषरहितेति यावत्, तथा रुचिरा गुणालङ्कारादिभिर्मनोज्ञा रुचिः प्रकाशो यस्याः सा शुचिरुचिररुचिः मातृवाणी मातृभाषा स्वदेशभाषेति यावत् मातृका पञ्चाशल्लिपिभिर्विभक्तसर्वावयवा मातृका सरस्वती देवता सैव मातृका धात्री माता भूत्वा, कान्तः स्पृहणीयरूपः, दान्तः शिक्षितसद्वृत्तः, कान्तश्चासौ दान्तश्चेति कुण्ठकुब्जादिवत् कर्मधारयः तं कान्तदान्तं तथा मधुमधुरगिरं मधुवन्मिष्टवाचं भूदेवं यदा सुन्दरे मुखमण्डले वात्सल्याच्चुचुम्बे चुचुम्ब संयुक्तवतीत्यर्थः (अत्र चुविधातोर्लक्षणया संयोगमात्रेऽर्थः न तु वक्त्रसंयोगः) तथा आत्मनेपदमिच्छन्ति परस्मैपदिनां क्वचिदित्यनुशासनेन किम्पुरुषश्चुचुम्बे इत्यादिवदात्मनेपदं) अथच धात्री यथा पुत्रकं चुम्बति तथा चुचुम्ब, तथा विश्वनाथः भूदेवपिता अथच विष्णुः एनं भूदेवं देववाण्याः संस्कृतभाषायाः पदतले पदसिद्धये न्यधित समर्पयामास अथ च संस्कृतभाषाधिदेवतायाः सरस्वत्याश्चरणतले समर्पयामास, परन्तु श्रीलक्ष्मीदेवी असहना सती राजवाण्या राजभाषया इंलण्डीयभाषयेति यावत् विलोभ्य एनं लोभयित्वा ततः सरस्वत्याः सकाशात् आच्छिद्य बलाद् गृहीत्वाऽऽत्मनो वशं आनिनाय प्रापयामास। देव्योऽपि भूदेवं पुत्रभावेन ग्रहीतुं परस्परं कलहायाञ्चक्रिरे इति भावः।

तृतीयः सर्गः।

संस्कृताध्ययनम्।

स विश्वनाथोऽथ कलेजनामनि
प्रियं सुतं संस्कृतपाठधामनि।
प्रवेश्य भूदेवमपाठयद्भृतं
स्वसन्निधौ किञ्चिदधीतसंस्कृतम्॥ १॥
स मुग्धबोधाभिधशब्दशासनम्
पपाठ तस्मिन्नवमाब्दमास्थितः।
कुलक्रमज्ञस्य पितुर्नियोगतः
पितुर्नियोगं स दृढं ह्यमन्यत॥ २॥
कलेजगेहे गुरुणा प्रपाठितः
स्वधाम्नि पित्रा पुनरेव बोधितः।
पटो द्विरुद्धौत इवातिनिर्मलः
स दारकः सर्वबुधप्रियोऽभवत्॥ ३॥
कलेजधाम्नो गुरवो यदागमन्
गृहं पितुस्तस्य सखित्वगौरवात्।
परीक्ष्य भूदेवममी तदा मुदा
तमस्तुवन् सत्वरमर्पितोत्तरम्॥ ४॥
स देववाण्याः पदमेव चिन्तय-
न्नथैच्छदिंलण्डगिरश्च शिक्षितुम्।

१। कलेजनामनि संस्कृतपाठधामनि कलिकाता-संस्कृतकलेजनामके विद्यालये। भृतं वेतनादिदानेन स्थापितम्।

२। मुग्धबोधाभिधशब्दशासनम् मुग्धबोधनामकं व्याकरणम्। नवमाब्दमास्थितः नवमं वत्सरं आरूढः।

३। पटो द्विरुद्धौत इव–द्वौ वारौ उत्कृष्टं यथा स्यात्तथा धौतः पटो वस्त्रमिव।

४। इंलण्डगिरं इंरेजी-भाषां। तुष्यता भूदेवं प्रति प्रसीदता वपुष्मता मूर्त्तिमता विधिना दैवेनेव उलाष्टनाम्ना पण्डितेन इंलण्डीयपुरुषेण प्रवर्त्त्यमानः प्रयुज्यमानः सन्।

उलाष्टनाख्येन सता वपुष्मता
प्रवर्त्यमानो विधिनेव तुष्यता ॥ ५ ॥
विभाग इंलण्डगिरोऽप्यधीतये
परोऽभवद्योऽत्र कलेजमन्दिरे ।
उलाष्टनित्येकतमो वृटिश् पुमान्
गुणी तदीयोऽजनि शिक्षकाग्रणीः ॥ ६ ॥
कलेजशिष्यो यदि नाम कश्चन
ग्रहीतुमिंलण्डगिरं समैहत ।
स तत्र भागे पठितुं तदान्वहम्
प्रविश्य होरे किल तामयुज्यत ॥ ७ ॥
असावुलाष्टंस्तु ततस्तमेकदा
ददर्श भूदेवमधीत्य निर्गतम् ।
नृपात्मजानप्यतिशय्य सुन्दर-
न्दरस्मितं दीर्घभुजं समुन्नतम् ॥ ८ ॥
ललाटलेखापरिसूचितायतिं
समुज्ज्वलाचञ्चलचारुलोचनम् ।
परिग्रहीतुं प्रणयप्रलोभनैः
श्रियेव सञ्चुम्बितमाननाम्बुजे ॥ ९ ॥

---

६ । तदीयः तस्य विभागस्य ।

७ । समैहत सम्यक् इच्छति स्म । अन्वहं प्रतिदिनं होरे होराद्वयं व्याप्य पठितुं अयुज्यत योग्योऽभवत् । दिनरात्र्योश्चतुर्विंशतिंभागान् कृत्वा एकैको भागो होरा इत्युच्यते । घण्टा इति ख्यातः सार्धद्विदण्डात्मकः काल इत्यर्थः ।

८ । दरस्मितं स्वभावत एव ईषद्धसन्मुखं ।

९ । ललाटलेखया ललाटस्य आभोगेन परिसूचिता आयतिरुत्तरकालः प्रभावो वा यस्य स तथा, आयतिः सङ्गमे दैर्घ्ये प्रभावागामिकालयोरिति विश्वः । प्रणयाः प्रश्रयदानानि प्रलोभनानि लोभजनकबालक्रीडनकादी-नीव इति प्रणयप्रलोभनानि तैः परिग्रहीतुं पुत्रभावेन वशीकर्तुं साक्षात् लक्ष्म्या इव मुखे परिचुम्बितम् ।

सुवर्णचूर्णैरमृतोपसंस्कृतैः
कृताङ्गकं किं समवायिकारणैः ।
ततो विधात्रा किमु रोषणोपलैः
प्रमृज्य भूयो मसृणीकृतं त्वचि ॥ १० ॥
विलोक्य तं दारकमार्य्यदर्शनं
शनैः शनैः पाठगृहाद् विनिर्गतम् ।
असावुलाष्टन् बहुदर्शनोऽपि स-
न्नहो चमत्कारमवाप कञ्चन ॥ ११ ॥
अपूर्ववत् पश्यत एव तस्य तम्
महाजनव्यञ्जनमञ्जुलाकृतिम् ।
मुदा तदास्निह्यदुलाष्टनो मनो
मुदश्रुलेशैरपि लोचनद्वयम् ॥ १२ ॥
अथाह्वयन् स्नेहसुधाकिरा गिरा
निनाय गेहं निजपाठनाविधेः ।
असावुलाष्टन्नुपवेश्य चासने

१० । विधात्रा सृष्टिकर्त्रा अमृतेन जलेन सुधया वा उपसंस्कृतैः आर्द्रीकृत्य निष्पिण्डीकृतैः सुवर्णचूर्णैः स्वर्णक्षोदैः समवायिकारणैः उपादानभूतैः कृतानि अङ्गानि हस्तपादादीनि यस्य तादृशं किं तादृशमिवेत्यर्थः । स्वर्णक्षोदानुपादाय विधिना निर्मितावयवः किम् भूदेव आसीदिति वितर्क्य उलाष्टन् ददर्श इत्यर्थः । ततस्तदनन्तरम् विधात्रा रोषणोपलैः स्वर्णादिचिक्कणीकरणप्रस्तरविशेषैः त्वचि चर्म्मणि ।किं भूयः पुनरपि मसृणीकृतं चिक्कणीकृतम् इत्युत्प्रेक्षा ।

११ । आर्य्यदर्शनं आर्य्यं पूज्यं दर्शनं यस्य । अथवा आर्य्यस्य महाकुलस्य दर्शनमिव दर्शनं यस्य । अथवा आर्य्यः "कर्त्तव्यमाचरन् काममकर्तव्य-मनाचरन् । तिष्ठति प्रकृताचारे स वै आर्य्य इति स्मृतः" तस्य दर्शनमिव दर्शनं यस्य तादृशम् ।

१२ । अपूर्वस्य अद्भुतस्य तुल्यम् अपूर्ववत् । मनः अस्निह्यत् प्रीतियुक्तं अभवत् लोचनद्वयं आनन्दाश्रुबिन्दुभिरस्निह्यत् आर्द्रमभवत् ।

१३ । स्नेहसुधां किरति विक्षिपतीति क्विप् तया स्नेहसुधाकिरा ।

शनैः कुमारं तमुवाच निर्जने ॥ १३ ॥
किमाह्वयस्त्वं कुलनन्दनाथ ते
पिता किमाख्यः सुतिनां वरः कृती ।
कियद्दिनं वा पठसीह संस्कृतम्
वदाखिलं मे प्रणयेन पृच्छतः ॥ १४ ॥
अहो तव श्रीरियमद्भुता कुलम्
महच्च वत्स प्रकृतिञ्च मोहनीम् ।
मतिञ्च दिव्यां महतीं तथायतिम्
विवृण्वती स्नेहयतीव मे मनः ॥ १५ ॥
ब्रवीमि ते तात किमप्यहं ततः
प्रियो ह्यकस्मादिव जायसे मम ।
वृथा कृथा मा मम भाषितं हितम्
भविष्यसि त्वं पुरुषोत्तमः खलु ॥ १६ ॥
यथा कलेजे पठसीह संस्कृत-
न्तथा पठेंलण्डगिरञ्च यत्नतः ।
इयं खलु श्रीरिव राजवल्लभा
पदे पदे राजजनैरुपास्यते ॥ १७ ॥
इयं प्रसन्ना स्वपदाश्रिताय कां
न सम्पदं यच्छति भक्तवत्सला ।
धनानि मानं प्रभुतामथापि वा
नरेन्द्रसख्यं यदि वाभिवाञ्छितम् ॥ १८ ॥
न देववाणीव तपोऽतिदुश्चरम्
प्रतीक्षते नातिविलम्बमिच्छति ।

---

१५ । अद्भुता तवेयं श्रीः शरीरशोभा, तव महाकुलादिकं विवृण्वती प्रकाशयन्ती सती मम मनः स्नेहयतीव स्नेहयुक्तं करोतीव इत्यर्थः । आयतिमुत्तरकालं प्रभावं वा ।

१६ । पुरुषोत्तमः पौरुषशालिनां जनानां मध्ये उत्तमो भविष्यसि अथवा विष्णुसदृशो भविष्यसि इतिभावः ।

१७ । इयं इंलण्डगीः इंलण्डीया भाषा इत्यर्थः ।

१९ । देववाणी संस्कृतभाषा स्वभक्तस्य स्वोपासकस्य यथा अतिदुश्चरं अति-

इयं स्वभक्तस्य सुखेन चाशु च
प्रसीदति स्नेहमयी प्रसूरिव॥ १६ ॥
अपूर्वविज्ञानफलानि बिभ्रती
करेण विद्यालिवृतेयमद्य वः ।
प्रजा इति प्रीतिमती नृपश्रियः
सखीव दातुं वरमभ्युपागता ॥ २० ॥
अधीष्व भाषां नृपसम्पदः सखीं
स्वयं नृपेणाप्यभिपूजितामिमाम् ।
प्रसादतोऽस्या अपि वामनो ध्रुवं
करेण राजानमपि स्पृशेद्दिवः ॥ २१ ॥
इमां गिरं कल्पलतामिवोन्नता-
मपि त्वमावर्जयितुं गुणैः क्षमः ।

कठोरं तपः कष्टं प्रतीक्षते अतिकठोरेण कष्टेन विना आयत्ता न भवति इयं इंलण्डीया भाषा तथा न। देववाणी अतिविलम्बञ्च यथा इच्छति तथा इयं न । परन्तु स्वभक्तस्य अल्पायासेन शीघ्रञ्च प्रसीदतीत्यर्थः यथा माता तद्वत् ।

२० । इयं इंलण्डीया भाषा अपूर्वाणि विज्ञानानां फलानि वाष्पीयरथचालना-विद्युद्वार्त्तादानादीनि प्रयोजनानि तान्येव फलानि भोज्यतरुफलानि करेण धारयन्ती वो युष्मभ्यम् वरमभिलषितं दातुमुपस्थिता अभूदिति शेषः। इयं कीदृशी विद्यालिवृता विद्यानां आलिभिः श्रेणीभिर्वेष्टिता अथच विद्यारूपाभिः सखीभिः परिवृता तथा राजलक्ष्म्याः सखीव । कथं वरं दातुमागता इत्यत आह प्रजा इति । यूयं राज्ञः प्रजा राजस्वदातारः अतएव प्रजाः नृपलक्ष्म्याः सन्ततयः पुत्रपौत्रादितुल्या इति मत्वा प्रीतिमती स्नेहयुक्ता सती आगतेति भावः ।

२१ । वामनोऽपि खर्वोऽपि जनो दिव आकाशस्य राजानं इन्द्रमपि करेण हस्तेन स्पृशेत् स्प्रष्टुं शक्नुयात् (सम्भावनायां लिङ्) कथमिति चेत् यतो वामनो धनमानादिना ह्रस्वोऽपि जनः इंलण्डभाषायाः प्रसादात् दिवः स्वर्गस्य राजानं स्वर्गराजतुल्यं भारतशासितारमपि स्पृशेत् संकथादिना सम्बध्नीयात् इत्यत इति भावः ।

फलान्यपूर्वाण्यवचित्य युज्यसे
चिराय भोक्तुञ्च शिरोरुहाण्यपि ॥ २२ ॥
इतीरयित्वा स्वमुखार्पितेक्षणम्
प्रपूज्य साहेबममुं प्रभूत्तमम् ।
अभीष्टलाभादिव सस्मिताननः
प्रतिब्रवीति स्म स विश्वनाथजः ॥ २३ ॥
भूदेवनामास्मि विभो महामते
शिक्षे च वर्षादुपरीह संस्कृतम् ।
ख्यातश्च मे ब्राह्मणपण्डितः पिता
श्रीविश्वनाथाभिधतर्कभूषणः ॥ २४ ॥
अध्येतुमिच्छन्नपि वो गिरं शुभां
त्रस्याम्यहं तातपदान्महागुरोः ।
इंलण्डभाषाध्ययनं स वेद चे-
च्छङ्के ततो मां विनिवारयेत्तदा ॥ २५ ॥
पित्रा निषिद्धश्च न कर्तुमुत्सहे
कार्य्यं किलानिष्टमभीष्टमेव वा ।
दूरेऽस्तु भाषान्तरधारणाकथा
नो शक्नुयां धारयितुं तनूमपि ॥ २६ ॥
खीष्टः स यद्वद् भवतां सदा प्रभुः
तद्वत्पिता नोऽभिमतः प्रभुः सदा ।
उल्लङ्घ्य तद्वाक्यमिहैव दुर्गतेः
पङ्केषु मग्नाः सुचिरं भवेम किम् ॥ २७ ॥
अज्ञापयित्वा पितरञ्च न क्षमे
भाषामिमां शिक्षितुमीप्सितामपि ।

२२। गुणैः रज्जुभिर्यथा उन्नतामपि लतां आकृष्य नामयति तथा अभ्यास-बुद्ध्यादिभिर्गुणैः आवर्जयितुं नामयितुं त्वं क्षमोऽसि अत एव अस्याः भाषायाः अग्रभवान्यपि फलानि प्रयोजनानि भोक्तुं लब्धुं युज्यसे योग्यो भवसीत्यर्थः ।

२७। इहैव जीवलोके एव दुर्गतेः दुर्दशायाः अथच नरकस्य पङ्केषु कर्दमेषु अथच पापेषु वयं किं चिरं मग्ना भवेम (सम्भावनायां लिङ्)

अस्या हि पाठो व्ययसाध्य ईक्ष्यते
दद्याद् व्ययं तं ननु कः पितुर्विना ॥ २८ ॥
इत्युत्तरं तस्य निशम्य तं पुनः
सोऽध्यापकः प्रीततरोऽब्रवीत्सुधीः ।
श्रद्धाञ्च भक्तिञ्च गुरुं प्रति ध्रुवां
शिक्षां तदीयाञ्च मुहुः स्तुवन् हृदा ॥ २९ ॥
योग्योऽपि यत् तातनिषेधशङ्कया
सेच्छोऽपि यद्वा व्ययचालनाभिया ।
विद्या न गृह्णास्यपि वत्स तन्मनो-
द्वेधेव दुःखद्वितयं भिनत्ति नः ॥ ३० ॥
मा भैः पितुस्त्वं स हि वत्सलः सुधी-
र्जानन्नपि त्वां न निवारयेदितः ।
उत्साहयेत् प्रत्युत मङ्गले ध्रुवं
लक्ष्मीं पदाहत्य नु को व्यपोहति ॥ ३१ ॥
आशङ्कसे त्वं पितरं तथापि चेन्-
मा जिज्ञपस्तर्हि कदापि वत्स तम् ।
गूढं पठेंलण्डगिरं मदन्तिके
पाठव्ययञ्च प्रतिपादयामि ते ॥ ३२ ॥
इत्थं स साहेब उलाष्टनाख्यको
भूदेवमुक्त्वा प्रणयं प्रदर्श्य च ।
इंलण्डभाषाऽध्ययने न्ययोजयत्
किं प्राक्तनो वा किमु वैहिकः सुहृत् ॥ ३३ ॥
तदादि भूदेव उलाष्टनो गृहम्
प्रविश्य होराद्वयमप्रकाशवत् ।
अशिक्षतेंलण्डगिरं स शिक्षकात्

३० । तत् दुःखद्वितयं दुःखद्वयं नोऽस्माकं मनो द्वेधेव द्विधेव द्वाभ्यां प्रकाराभ्यामिव इति यावत्, भिनत्ति विदारयति । ऊर्द्धात् अधः पर्य्यन्तं भित्त्वा पुनः पार्श्वादपरपार्श्वपर्य्यन्तं भिनत्तीव इति भावः ।

३३ । प्राक्तनः पूर्वजन्मनि भवः सुहृत् किमु वा इह जन्मनि भव ऐहिको वा सुहृत् किमु इत्युत्प्रेक्षा ।



ततोऽन्वहं संस्कृतपाठपूर्वकम् ॥ ३४ ॥
ततो गुरोः पाठ्यमवाप्य पुस्तकं
शुचिञ्च शिक्षां लिपिसाधनानि च ।
सुभोपमञ्च प्रणयं पठन् लिखन्
विदेशभाषामपि साधु सोऽग्रहीत् ॥ ३५ ॥
पपाठ तस्यैव गृहे स दारको-
ऽन्वबोधि पाठञ्च ततो न चान्यतः ।
ररक्ष तत्रैव च पुस्तकादिकम्
मनस्यरक्षन्निखिलन्तु शिक्षितम् ॥ ३६ ॥
न तामधीति पितरं न्यवेदय-
न्न तत्लखान् वा न च शास्त्रपाठदम् ।
न वा परं कञ्चन बालकोऽप्यहो
वभूव वाचंयमवत् सुसम्वृतिः ॥ ३७ ॥
उभे गिरौ शीलयतस्तु तस्य सा
श्लथाऽभवत् संस्कृतशास्त्रधारणा ।
महानदस्यापि न तीरयोर्द्वयोः
प्रवाहवेगः सुषमं प्रधावति ॥ ३८ ॥
सुधीश्च तीर्थान्यवगाहितुं तदा
स दूरदेशान् प्रजगाम तत्पिता ।
अबोधयत्संस्कृतशास्त्रमात्मना
पुनः पुनर्यस्तमगारमागतम् ॥ ३९ ॥
तदा कलेजे हरिनाथनामकः
स पण्डितोऽपि श्लथशासनोऽभवत् ।
अतोऽपि शिष्याः पठने जहुः श्रमम्
विना नियन्तुः स्थितिमान् क बालकः ॥ ४० ॥

३४ । होराद्वयं पञ्चदण्डात्मकं कालं व्याप्य ।

३५ । तत उलाष्टन: गुरोरुपदेशकात् ।

३६ । अन्वबोधि पाठञ्चेति पाठमन्वबोधि च पश्चाद् बुबुधे च इत्यर्थः ।

३७ । वाचंयमो वाक्संयमशीलो मौनव्रतावलम्बी मुनिरिति यावत् ।

३८ । शीलयत: शिक्षमाणस्य अभ्यस्यत इति यावत् ।

४० । विना नियन्तुरिति नियन्तारं दण्डदातारं विना बालकः चपलस्वभाव:

ततोऽन्वहं देवगिरं पठन्नपि
भ्रमाद्धिया तां न तथान्वचिन्तयत् ।
यथा स भूदेव उलाप्टनो गुरोः
प्रयत्नतस्तद्गिरमन्वशीलयत् ॥ ४१ ॥
इति व्यतीतेषु दिनेषु मास्सु च
प्रवासतस्तस्य पिता परापतत् ।
अनेकतीर्थेषु कृताघमर्षणः
स विश्वनाथाभिधतर्कभूषणः ॥ ४२ ॥
निशम्य वार्तामथ तां जनाननात्
सुहृज्जनास्तस्य गृहानुपागमन् ।
तदीयसन्दर्शनसङ्कथामृतै-
स्तितृप्सवो दीर्घमुपोषिता इव ॥ ४३ ॥
अवाप्य यस्माच्छुचि धर्म्मदर्शनं
स्मृतौ प्रबुद्धोऽजनि तर्कभूषणः ।
स रामपूर्वश्चरणोऽपि तद्गृहं
शिरोमणिख्यातिरुपागमद् गुरुः ॥ ४४ ॥
स विश्वनाथं विहिताभिवादनं
यथाविधि प्रत्यभिवाद्य पण्डितः ।
अनामयं प्रागनुयुज्य सर्वतो
निशम्य च प्रीतिमगाच्छिरोमणिः ॥ ४५ ॥
ततस्तदीयस्य सुतस्य पादयो-
र्नतस्य विद्याऽध्ययनञ्च पृष्टवान् ।

क्व कुत्र स्थितिमान् मर्य्यादाशाली भवति, मया अध्ययनमेव कर्तव्यं न क्रीडादिकमिति आर्य्यमर्य्यादां न रक्षतीति भावः तथाच विराट्पर्वणि " नियन्ता चेन्न विद्येत न कश्चिद्धर्म्ममाचरेत् " इति ।

४१ । ततः तस्मात् हेतोः, तस्मादध्यापकात् हरिनाथनामकादिति वा । देवगिरं संस्कृतम् ।

४२ । मास्सु मासेषु । परापतत् प्रत्याजगाम । कृताघमर्षणः कृतपापमार्जनः ।

४५ । अनामयमारोग्यं । अनुयुज्य पृष्ट्वा ।

स मुग्धबोधान्तमधातमित्यथो
निशम्य हृच्चक्षमयेव पस्पृशे ॥ ४६ ॥
अथावकाशे सुखितः शिरोमणि-
र्भूदेवमाहूय परीक्ष्यते स्म सः ।
विजित्य चाधर्षयदाशु लीलया
पृष्ट्वा दुरूहाणि पदानि कानिचित् ॥ ४७ ॥
सभासु जित्वा प्रतिवादिनो बुधान्
जयस्य विद्वान् मधुरं यशोरसम् ।
शिशोः परीक्षाग्रहणेऽपि तं रसं
शिरोमणिस्त्यक्तुमसौ न चक्षमे ॥ ४८ ॥
यथा स्वविद्याविवृतेः स्पृहा भवेत्
तथान्यविद्याग्रहणस्य न स्पृहा ।
इति ध्रुवं मुह्यति हन्त पण्डितो
ऽप्यहो अहंकारमयो महानरिः ॥ ४९ ॥
पुरैव मन्दस्मरणः स दारको
गरीयसा तेन च धर्षितस्ततः ।
क्षणाद्दिवा चन्द्रनिभाननोऽभवत्
पराभवो हन्त नवो हि मृत्युवत् ॥ ५० ॥
तथापि बालः कृतिनं तमब्रवी-
द्दयावकाशं कृपयार्य्य देहि मे ।
नक्तं समालोच्य समस्तपुस्तकं
श्व एव दातास्मि पुनः परीक्षणम् ॥ ५१ ॥
अत्रान्तरे तत्पितरं समागतं
श्रीविश्वनाथं न्यगदच्छिरोमणिः ।
हा धिक् त्वया सोऽयमकारि बालको
गोपालकोऽतिप्रणयप्रदानतः ॥ ५२ ॥
अध्यापकानां कुलभूषणस्य ते
सुतोऽप्ययं हन्त भवत्यनक्षरः ।
सारस्वते वर्त्मनि नैकमप्यलम्
पदं निधातुं वयसेयतापि यत् ॥ ५३ ॥
इति ब्रुवाणे स्वगुरौ शिरोमणौ
किञ्चिद्विलक्षोऽजनि तर्कभूषणः ।

पिता हि पुत्रं प्रणयादपाठय-
न्नरातिरेवाभिहितो मनीषिभिः ॥ ५४ ॥
ततश्च किञ्चित्कुपितः स्वयं सुतं
पदानि पप्रच्छ बहूनि सत्वरम् ।
तदीयसङ्कर्षमिवोद्वहंस्तदा
भूयोऽप्यपृच्छत् स शिरोमणिश्च तम् ॥ ५५ ॥
इति द्वयोः प्रश्नशतेन निर्जितः
क्षणेन बालः स निरुत्तरोऽभवत् ।
अवाङ्मुखो भूमितलार्पितेक्षणो
भुवं ययाचे किमु दातुमन्तरम् ॥ ५६ ॥
पिता तमालोक्य तथा निरुत्तरं
चुकोप पूर्वं गुरुणा च भर्त्सितः ।
अपि प्रियं पुत्रमताडयत्ततो
गुरोः पुरो वाच्यमिवोन्मृजन्निजम् ॥ ५७ ॥
तत्ताडनं तस्य तथाभवद् दृढं
यथा निशां न प्रससाद दारकः ।
यथानुतप्तश्च स तर्कभूषणो
न भुक्तवाञ्चापि बभूव निद्रितः ॥ ५८ ॥
तां यामिनीं कश्चन तद्गृहेऽपरो
न भुक्तवान् वार्य्यपि नापिबद्धत ।
अभुक्तयोर्दुःखितयोस्तयोः सतोः
सर्वेऽप्यभूवन् म्रियमाणमानसाः ॥ ५६ ॥
परेद्यवि प्रातरथोत्थितः पिता
समीपमानीय सुतं यथा पुरा ।
उद्घाट्य पुस्तीमवदत् पठेति तम्
पठामि नो संस्कृतमित्युवाच सः ॥ ६० ॥
अध्येष्यसे चेन्न हि संस्कृतं तदा
करिष्यसि त्वं किमिति प्रभुः पिता ।
पप्रच्छ तं किन्तु स नोत्तरं ददौ
निमीलिताक्षोऽश्रु ववर्ष केवलम् ॥ ६१ ॥
निर्बन्धवानप्यनिशम्य तद्गिरं
पिता निराशो भवनाद्बहिर्ययौ ।

सहोदरं सोऽनुजमब्रवीत्तत-
स्त्वं पृच्छ तावत् किमयं चिकीर्षति' ॥ ६२ ॥
ततः स भूदेवमुपेत्य सान्त्वयन्
शनैः पितृव्यो निजगाद सादरम् ।
का ते चिकीर्षा वद वत्स मामभी-
र्ददाम्यभीतिं तव सुस्थिरो भव ॥ ६३ ॥
इंलण्डभाषा पठितुं मयेष्यते
सा चाल्पशः सम्प्रति पठ्यते मया ।
इतीरयित्वा विरतेऽग्रजात्मजे
बहिर्गतः सोऽग्रजमब्रवीत् स्थितम् ॥ ६४ ॥
इंलण्डवाचः पठने द्रढ़ीयसी
न संस्कृतस्याध्ययनेऽस्य तु स्पृहा ।
तदार्य्य तामेव पठत्वसाविति
स्थितं मतं नोऽनुमतं तवास्तु च ॥ ६५ ॥
तं विश्वनाथः पुनराह संस्कृत-
ङ्कुलक्रमप्राप्तमिदं धनं हि नः ।
तदप्ययं धारयितुं न यः क्षमो
विदेशभाषां स कथं नु धारयेत् ॥ ६६ ॥
इति श्रुतोक्तिस्तमवोचतानुजः
पठत्ययं तामिति भाषते ननु ।
तदस्य तत्पाठमहं परीक्षितुं
क्षमेऽधुना यद्यनुमन्यते भवान् ॥ ६७ ॥
तथास्त्विवति प्रत्युदितश्च सोऽनुज-
श्चकार भूदेवपरीक्षणं स्वयम् ।
इंलण्डभाषां स हि पूर्वमर्जया-
म्बभूव काञ्चिद् व्यवहारयोजनीम् ॥ ६८ ॥
भूदेवः स तु पितुरग्रतः परीक्षां
तां नाव्यां धुनिमिव वामनः पदातिः ।
गम्भीरामपि च पदे पदे प्रतार्य्य
प्रेमाणं कमपि निनाय विश्वनाथम् ॥ ६९ ॥

भूदेवं देवतानामपि दयिततमं विश्वनाथोऽह्नि तस्मिन्
इंरेजीं शिक्षयिष्यन् स्कुलगृहमनयद् योग्यमित्थं परीक्ष्य ।

तत्रैनं पर्य्यचुम्बत् सुतमिव जननी श्रीलक्ष्मी राजवाणी
बाले पुष्पे च रम्ये भवति हि महिला स्नेहलोला स्वभावात् ॥ ७०

इति श्रीमहेशचन्द्रकृतौ भूदेव-चरिते काव्ये
संस्कृताध्ययनं नाम तृतीयः सर्गः ॥

चतुर्थः सर्गः ।

इंरेजीभाषाध्ययनम् ।

भूदेव इण्डियानेकाडेमीनाम्नि ततोऽपठत् ।
राममोहनरायस्य स्कुले पित्रा प्रवेशितः ॥ १ ॥
इष्टलाभाद् दृढोत्साहो निर्वृतः पितुराज्ञया ।
इंरेजीमपठद्विद्यां केवलां तत्र दारकः ॥ २ ॥
स संस्कृतकलेजस्य वश्यतां त्यक्तवानपि ।
उलाष्टनो न तत्याज कृतज्ञो वशवर्तिताम् ॥ ३ ॥
हितन्तेनोपदिष्टोऽस्मि कांश्चिद्वर्णांश्च पाठितः ।
इत्येव तस्य भूदेवो दधौ चिरकृतज्ञताम् ॥ ४ ॥
विन्दुमप्युपकारस्य सिन्धुमुत्प्रेक्षते सुधीः ।
अणुवीक्षणयन्त्रस्य सदृशी महतां मतिः ॥ ५ ॥
प्रायेणोलाष्टनः पार्श्वं भूदेवः सततं ययौ ।
इंरेजीपठनारम्भमात्मनस्तं न्यवेदयत् ॥ ६ ॥
उलाष्टन्नपि वृत्तान्तं तं श्रुत्वा मुमुदेतराम् ।

२। इष्टलाभात् इष्टस्य अभिलषितस्य इंरेजीपाठस्य लाभात् लाभं प्राप्य निर्वृतः स्वस्थः । पितुराज्ञा यदि नाभविष्यत् तदा भूदेवः प्रकृतिस्थो नाभविष्यत् पितुराज्ञया तु प्रकृतिस्थो जात इति भावः । निर्वृतिः स्वस्थितावस्तं गमने च सुखे स्त्रियामिति मेदिनी ॥

५। अणुवीक्षणयन्त्रं नाम (Microscope) इतिख्यातं तेन यथा सूक्ष्ममपि वस्तु महद् दृश्यते तथा महद्भिः स्वमत्यैव सूक्ष्मोऽप्युपकारो महान् दृश्यत इति भावः ।



को वीजञ्च मतञ्चोप्तं सफलं नाभिनन्दति ॥ ७ ॥
भूदेवमुपकर्तुं स साहेबो न न्यवर्त्तत ।
गृहीतमनुगृह्णन्ति हितेन हि हितैषिणः ॥ ८ ॥
स्वयं निरवकाशोऽपि प्रतिपाठयितुं स तम् ।
कांञ्चित् प्राज्ञीं स्वजातीयां प्रत्यष्ठापयदात्मवत् ॥ ९ ॥
गृहीत्वा स हि भूदेवं गत्वोलाष्टंस्तदालयम् ।
तामुवाच यथान्यायं सम्मान्य बहुमानभाक् ॥ १० ॥
प्राज्ञि भूदेवनामायं बालः शिष्यः प्रियश्च मे ।
विद्यामस्माकमध्येतुमिच्छत्यादर्शशुद्धधीः ॥ ११ ॥
उपदेशप्रदानस्य नास्ति त्ववसरो मम ।
तस्मादुपदिशत्वेनं भवत्यहमिवादरात् ॥ १२ ॥
इत्युक्त्वा विरते तस्मिन् साहेबे साभ्युपागमत् ।
बहु मत्वोपदेष्टुं तं दारकं प्रियदर्शनम् ॥ १३ ॥
मिसेस् वूयिल्सन्नित्याख्या सा तदादि तमन्वहम् ।
मिस्नारी विदुषी नारी भूदेवं प्रत्यपाठयत् ॥ १४ ॥
भूदेवोऽपि स्कुलागारे प्रागुक्तेऽधीत्य नित्यदा ।
तामेव पण्डितां नारीमुपास्य प्रत्यबुध्यत ॥ १५ ॥
इंलण्डीयगिरोऽधीतिरस्मद्देशभवाद् गुरोः ।
न तथा जायते शुद्धा यथा तद्देशवासिनः ॥ १६ ॥
विशेषतः स्कुले नीचैःश्रेणिष्वल्पविद्गो गुरोः ।
नियुक्तादल्पया वृत्त्या शुद्धाधीतिर्न सम्भवेत् ॥ १७ ॥
तादृशाच्छिक्षकाच्छैत्तो भूदेवो यदधीतवान् ।

७ । उप्तं भूमौ निहितं वीजञ्च उप्तं शिष्यादौ संक्रामितं स्वमतञ्च सफलं शस्यविशिष्टं प्रयोजनविशिष्टञ्च न अभिनन्दति नानुमोदत इत्यर्थः ।

८ । हितेन हितसम्बन्धेन गृहीतमङ्गीकृतं हितेन आत्यन्तिकेन उपकारेण अनुगृह्णन्ति पुनर्गृह्णन्ति अनुग्रहभाजनञ्च कुर्वन्तीत्यर्थः ।

११ । आदर्शशुद्धधीः आदर्शो दर्पणः तद्वत् शुद्धा निर्मला विम्बग्राहिणी धीर्यस्येति स तथा ।

१४ । मिस्नारी विदुषी (Missionary) धर्म्मप्रचारिका पण्डितेत्यर्थः ।

इंलण्डदेशजा प्राज्ञी सा तद्दोषानमार्जयत् ॥ १८ ॥
साध्यापिपत् स्कुलेऽधीतादध्यायादधिकाधिकम्।
भूदेवं पण्डिता तस्य जिगीषुरिव शिक्षकम् ॥ १९ ॥
श्रुत्वा तच्छिक्षकोऽन्येद्युस्तत्पाठोच्चारणादिकम्।
मनसा मत्सरीवासीत् साध्वित्युक्त्या स्तुवन्नपि ॥२०॥
सर्वेषु तुल्यपाठेषु भूदेवस्तेन हेतुना।
द्विजातिष्विव भूदेवो गुणोत्कर्षमुपागमत् ॥ २१ ॥
ये सहाध्यायिनश्छात्रा ये नीचाध्यायिनश्च ते
ततः सर्वेऽपि भूदेवात्पाठान् बुबुधिरे पुनः ॥ २२ ॥
सोऽपि तान् पाठबोधार्थमागतान् प्रत्यबोधयत्।
निजकार्य्याण्यपि त्यक्त्वा तदीयत्वमिवागतः ॥ २३ ॥
इत्यसावर्जयन्नेव विद्यां प्रायच्छदर्थिने।
अर्जितस्य प्रदानं हि स्मृतं मुख्यं प्रयोजनम् ॥ २४ ॥
न किञ्चित्फलमन्वैषीद् विद्यादानेन तेन सः।
सात्त्विकं तदभूद्दानमफलाकांक्षमच्छलम् ॥ २५ ॥
विद्यायशोधनं वाथ पुण्यं यद्यदुपार्ज्जयत्।
भूदेवः स ददौ तत्तत् पात्रेभ्यः परकीयवत् ॥ २६ ॥
इत्थं पपाठ भूदेवः स्कुले तत्रैकवत्सरम्।
ततः शिक्षकदोषेण तं विद्यालयमत्यजत् ॥ २७ ॥
काशीनाथ इति ख्यातो मिश्रोपाधिरमर्षणः।
भूदेवाध्ययनश्रेण्यामासीच्छूद्रस्तु शिक्षकः ॥ २८ ॥
एकदा शिक्षके तस्मिन्निजश्रेण्या बहिर्गते।
चक्रुः कोलाहलं बालाः स्वभावादेव चञ्चलाः ॥ २९ ॥
तं कोलाहलमाकर्ण्य कुपितः शिक्षकोऽथ सः।

८। शैक्षः प्राथमकल्पिकः शिष्यः, शैक्षः प्राथमकल्पिकः इत्यमरः।

९। अध्यायात् पाठात्, यावान् पाठः शिक्षकेण दत्तस्तावतोऽधिकप्रकारमित्यर्थः।

१०। उक्त्या वाचा स्तुवन्नपि प्रशंसन्नपि मनसा मत्सरीव तच्छुभद्वेषीव आसीदित्यर्थः। तत्र कारणं विनैव दोषं भूदेवं प्रति दण्डदानमित्युत्तरत्र स्फुटीभविष्यति।

वेत्रहस्तोऽविशच्छ्रेण्यां दण्डयिष्यन् कृतागसम् ॥३०॥
दूराद् दृष्ट्वा तमायान्तं बालाः शान्तास्तथाभवन् ।
यथा कृतागसं ज्ञातुं शिक्षकोऽसौ न शक्नुयात् ॥ ३१ ॥
एकैकशोऽथ कायस्थः सर्वांश्छात्रान्निरूपयन् ।
भूदेवमेव सोऽपश्यत् पुस्तकेऽर्पितलोचनम् ॥ ३२ ॥
बहिर्विषयसंस्पर्शव्यावृत्तैकाग्रमानसम् ।
अधोमुखमजानन्तमायान्तमपि शिक्षकम् ॥ ३३ ॥
सारस्वतपदाम्भोजरसलीनमिवालिनम् ।
चित्रार्पितमिवास्पन्दं योगस्थमिव योगिनम् ॥ ३४ ॥
निविष्टं तं तथा पाठे कायस्थः शठधीरसौ ।
आरोपयन् स्वसादृश्यं कृतशाठ्यमतर्कयत् ॥ ३५ ॥
भूदेवं प्रति कायस्थो मनसा पर्य्यचिन्तयत् ।
"अयं कोलाहलस्यास्य मूलं ध्रुवमनल्पधीः ॥ ३६ ॥
मयि व्यवहिते कश्चिद्बालो न पठति स्वयम् ।
तथा ह्यमी निरध्यायास्तिष्ठन्ति शिशवोऽखिलाः ॥ ३७ ॥
केवलोऽयन्तु भूदेवो लक्ष्यते यत् पठन्निव ।
तदेतस्य ध्रुवं भाणो दोषाच्छादनसाधनम् ॥ ३८ ॥
सर्व्वेषां मम शिष्याणां भूदेवश्चतुरो मतः ।
गुरुवत् प्रभुरम्येषु जातः पाठावबोधनात् ॥ ३९ ॥
अनादृत्येव मां शिष्यास्तथाह्येनमुपासते ।
मद्वाचमवमत्येव वाचं श्रद्दधतेऽस्य च ॥ ४० ॥
नायं प्रावर्त्तयिष्यच्चेत् न्यषेत्स्यद् यदिवा शिशून् ।
नाभविष्यत् स्कुले नूनं हट्टकोलाहलस्तदा " ॥ ४१ ॥
इति स्वगतमालोच्य मत्सरीव स शिक्षकः ।
भूदेवमभितोऽगच्छद्धूर्त्तवत् संवृताकृतिः ॥ ४२ ॥
वेत्रहस्तोऽप्यविज्ञेयः पश्चात् कृतकरद्वयः ।
हस्तं प्रसारय क्षिप्रं भूदेवेत्यब्रवीत् स तम् ॥ ४३ ॥
पाठे युक्तोऽपि भूदेवः सहसा शिक्षकस्य तम् ।
उच्चैः स्वरमाकर्ण्य सम्भ्रान्तवदजागरीत् ॥ ४४ ॥
योगादिव निवृत्तोऽसावुत्थितः शयनादिव ।
शिक्षकं पुरतः पश्यन्नभ्युदस्थात्तमुन्मुखः ॥ ४५ ॥
प्रासारयच्च भूदेवो दक्षिणं हस्तमाश्रवः ।

पुरा वसन्त्या व्याकोषं पद्मासनमिव श्रियः ॥ ४६ ॥
अजानंस्तस्य तं भावमजानंस्तस्य दुष्कृतम्।
गुरुर्दण्डयितुं येन स्वमन्तिकमुपागमत् ॥ ४७ ॥
नाभूत् कर्णपथे कर्णौ नाभूद्दृष्टिश्च दृक्पथे।
तस्य ध्यानपथेऽभूवन्निन्द्रियाण्यखिलान्यपि ॥ ४८ ॥
अकस्मादथ वेत्रेण शिक्षकस्तमताड़यत्।
प्रसारिते मृदौ हस्ते चर्म्म मर्म्म च पीड़यन् ॥ ४९ ॥
तीव्रत्वेन स आघातो न चर्म्मापीड़यत्तथा।
दोषानुमापकत्वेन मर्म्मास्यापीड़यद् यथा ॥ ५० ॥
दोषं विनापि दोषीव तेन शूद्रेण ताड़ितः।
रुषा जज्वाल भूदेवस्तप्तं तैलमिवाम्बुना ॥ ५१ ॥
सोऽशपत्तीक्ष्णया वाचा तं शूद्रं ब्राह्मणात्मजः।
रे विट्खादिसुत त्वं मां कथं ताड़ितवानिति ॥ ५२ ॥
उपालभ्य दुरुक्तया तं दृष्ट्वा क्रुद्धतरं पुनः।
वेत्रमुद्यम्य धावन्तं भूदेवोऽपाद्रवत्ततः ॥ ५३ ॥
अपद्रुत्य ततः कुट्याः कुट्यन्तरमुपास्थितः।
श्रीपूर्णचन्द्रमित्राख्यो यत्रासीन्मुख्यशिक्षकः ॥ ५४ ॥
तत्त्वावधायकश्चासीत्तस्य विद्यालयस्य सः।
अतस्तमभयार्थीव भूदेवः प्राप सत्वरः ॥ ५५ ॥
भीतभीतस्तु भूदेवो यावत्तमुपतस्थिवान्।
तावदेवानुधावन्तं काशीनाथमुदैक्षत ॥ ५६ ॥
विशन्तमग्रया द्वारा वेत्रहस्तं विलोक्य तम्।
वातायनेन द्वारेण निरगादपरेण सः ॥ ५७ ॥
स निष्पत्य स्कुलाद्धावन् सद्यः प्राप पितुः पदम्।
न्यवेदयच्च तत्तस्मै यद् यद् वृत्तं स्कुले तदा ॥ ५८ ॥
पादौ धृत्वा ययाचे च भूदेवः पितरं रुदन्।

४७। येनेति। येन भावेनाभिसन्धिना विशिष्टः सन् उपागमत् तं भावमभिसन्धिं, येन दुष्कृतेन दुष्कर्म्मणा हेतुना च स्वमात्मीयमन्तिकमुपागमत् तद्दुष्कृतञ्च अजानन्नित्यर्थः।

५४। कुटी गृहस्य भागः शाला इत्यर्थः।

विद्यालयान्तरेऽध्येतुमनुज्ञां मम कुर्विति ॥ ५६ ॥
विश्वनाथस्तु गाम्भीर्य्यान्नोत्तरं किञ्चिदब्रवीत् ।
भूदेवोऽपि पितुर्मौनं मेने सम्मतिलक्षणम् ॥ ६० ॥
अथापराह्णे तस्याह्नो विश्वनाथस्य वेश्मनि ।
सखायः समगच्छन्त मूर्त्ता इव मनोरथाः ॥ ६१ ॥
ये संस्कृत-कलेजस्य युक्ता अध्यापनाविधौ ।
हरिनाथादयस्तेऽपि समाजग्मुर्यदृच्छया ॥ ६२ ॥
पूजिता विश्वनाथेन स्वागतेनासनेन च ।
पृष्ट्वा तेऽनामयं चक्रुस्तत्रासनपरिग्रहम् ॥ ६३ ॥
भूदेवस्य पितृव्यश्च पिता स च पितामहः ।
तानन्वासत सुप्रीता ये चान्ये प्रतिवेशिनः ॥ ६४ ॥
भूदेवोऽपि पितुर्मित्राण्यागतानभिगम्य तान् ।
वन्दित्वा विनयात्तस्थौ जिघृक्षुरिव सेवया ॥ ६५ ॥
वन्दितास्तेन सानन्दास्ते च तं शुभयाशिषा ।
आज्ञाकरमिव प्राज्ञा अन्वगृह्णन् पुरः स्थितम् ॥ ६६ ॥
अथ तत्पितरं प्राज्ञाः पप्रच्छुस्तर्कभूषणम् ।
भूदेवः कीदृगधुना कुत्र वा पठतीति ते ॥ ६७ ॥
भूदेवान्तःपुरं गत्वा ताम्बुलान्येभ्य आनय ।
इत्युक्त्वाभ्यन्तरं प्रेष्य पुत्रं स प्रत्युवाच तान् ॥ ६८ ॥
ज्ञातो भवद्भिर्यो विघ्नः संस्कृताध्ययनेऽभवत् ।
इंरेजीं पठतोऽप्यस्य प्रत्यूहोऽजनि साम्प्रतम् ॥ ६९ ॥
अद्य स्कुलाद्बहिर्भूते काशीनाथेऽस्य शिक्षके ।
अभूत् कोलाहलः श्रेण्यां चपलैर्बालकैः कृतः ॥ ७० ॥
तथापि किल भूदेवः पाठेऽभ्युद्युक्तमानसः ।
उपविष्टो निजे स्थाने कोलाहलमलक्षयन् ॥ ७१ ॥
अथ कोलाहलं श्रुत्वा शिक्षको यावदागमत् ।
तावत्तूष्णीं स्थितांश्छात्रानद्राक्षीत् स मुनीनिव ॥ ७२ ॥
कोलाहलस्य यो मूलं तं स निर्णेतुमक्षमः ।
अतिवुद्ध्यैव भूदेवमुत्प्रैक्षिष्ट कृतागसम् ॥ ७३ ॥

---

६४ । अन्वासत समीपे उपविविशुरित्यर्थः । अनूपसर्गयोगाद्धातोः सकर्मकत्वम् ।

नूनमेतेन धूर्त्तेन शठतेयं प्रकल्पिता ।
नलांश्चालयता विभ्यो व्याधेनेव वनीवृतिः ॥ ७४ ॥
इत्यालोच्यातिबुद्ध्या स भूदेवं समताड़यत् ।
अतिबुद्धिर्हि लोकानां तत्त्वदृष्टिं विलुम्पति ॥ ७५ ॥
एषोऽसहिष्णुस्तं दण्डं भूदेवो बालचापलात् ।
रे विद्खादिसुतेत्युक्त्वा तमुपालब्ध शिक्षकम् ॥ ७६ ॥
अथ क्रुद्धतरात्तस्माद्भीतभीतः पलायितः ।
विद्यालयमहासीत्तं न पुनर्गन्तुमिच्छति ॥ ७७ ॥
इत्यस्य पाठविघ्नोऽयं जातोऽद्य दुरदृष्टवत् ।
इत्युक्त्वा तान् सखीन् विज्ञान् न्यवृतत्तर्कभूषणः ॥ ७८ ॥
हरि नारायणो नाम्ना सार्व्वभौम उपाधिना ।
किञ्चिदुष्ण इवोवाच भूदेवस्य पितामहः ॥ ७९ ॥
दोषमस्य न पश्यामि भूदेवस्य शिशोरपि ।
दण्डयन्तं विना दोषं योऽशाप्सीच्छूद्रमुद्यतम् ॥ ८० ॥
मृदोरपि मुखादस्य तीक्ष्णं यदुदगाद्वचः ।
तन्न दोषः स्वभावो हि ब्राह्मणस्य तथाविधः ॥ ८१ ॥
"यथा नवनीतं हृदयं ब्राह्मणस्य
वाचि क्षुरो निशितस्तीक्ष्णधारः ।
तदुभयमेतद्विपरीतं क्षत्रियस्य
वाङ्नवनीतं हृदयं तीक्ष्णधारम्" ॥
इत्यादि पर्व्वणोऽध्याये तृतीये पौष्यपर्व्वणि ।
भारते पञ्चमे वेदे व्यासो नारायणोऽब्रवीत् ॥ ८२ ॥
स स्वभावो ब्राह्मणस्य दोषो वास्तु गुणस्तु वा ।
कथमेनमतिक्रामेत् सङ्क्रान्तः पूर्व्वतः क्रमात् ॥ ८३ ॥

---

७४ । विभ्यः पक्षिभ्यः पक्षिणो मारयितुमित्यर्थः । सप्तनलीं चालयता पक्षिघातिना व्याधेन वन्या अल्पस्य कृत्रिमस्य च वनस्य वृतिरावरणं; यथा आत्मनः प्रच्छादनार्थं सम्मुखे ध्रियते तथा इयं शठता अनेन धूर्तेन आत्मदोषप्रच्छादनार्थं प्रकल्पितेति भावः । वनीति अल्पार्थे कृत्रिमार्थे वा स्त्रीप्रत्ययेन सिद्धं ।

८३ । पूर्व्वतः पूर्व्वपुरुषेभ्यः क्रमात् पुत्रपौत्रप्रपौत्रादिक्रमं प्राप्य संक्रान्त इत्यर्थः ।

स्वभावं मुनयो जातेर्लक्षणं तात्त्विकं विदुः
कृत्रिमाण्येव लक्ष्माणि यज्ञसूत्रादिकानि तु ॥ ८४ ॥
त्यज्यन्ते पुरुषैर्धर्म्माः शौचाचारादयोऽपरे।
सुदुस्त्यजः स्वभावस्तु प्रताप इव भानुना ॥ ८५ ॥
प्रयुक्तस्तेन भूदेवः स्वभावेन बलीयसा।
क्षुरधाराखरां वाचं परतन्त्र इवादित ॥ ८६ ॥
शूद्रान् प्रति ब्राह्मणानां पिबन्तमपि दुर्वचः।
नातिदोषमहं मन्ये मन्यन्ते तेऽपि नाप्रियम् ॥ ८७ ॥
बिद्ध्वादितनयेत्युक्तिं ब्राह्मणस्य स्वभावजाम्।
कुलीना अपि कायस्था मन्यन्ते कुलपावनीम् ॥ ८८ ॥
शिक्षित्वा किञ्चिदिंरेजीं देवब्राह्मणविद्विषः।
युवानस्त्वद्य ये शूद्रा न सहन्ते त एव ताम् ॥ ८९ ॥
स्मृतो जात्यैव सर्व्वेषां वर्णानां ब्राह्मणो गुरुः।
इति तेभ्यो द्विषन्त्येव शिक्षिताः शूद्रबन्धवः ॥ ९० ॥
स काशीनाथमिश्रोऽपि ब्राह्मणाय द्विषन् हृदा।
दोषं नाम च्छलीकृत्य भूदेवं पर्य्यभूद् ध्रुवम् ॥ ९१ ॥
निमित्तेनोपदेशेन काशीनाथोऽभवद् गुरुः।
ब्रह्मत्वेन तु भूदेवो नित्यं तस्य गुरुर्मतः ॥ ९२ ॥
दुष्कृतं यादृशं तेन शुचिं दण्डयता कृतम्।
पापिनं तं दण्डयता भूदेवेन न तादृशम् ॥ ९३ ॥
गुरोरप्यवलिप्तस्य कार्य्याकार्य्यमजानतः।
उत्पथप्रतिपन्नस्य शासनं न विगर्हितम् ॥ ९४ ॥
ओजायितं शिशुं तात विश्वनाथ क्षमस्व तत्।
सूर्य्यकान्तो वमत्यग्निं सूर्य्येणाप्याहतः पदा ॥ ९५ ॥
तस्मादन्यत्र भूदेवं प्रवेश्याध्यापय स्कुले।
न तत्र भद्रं पश्यामि प्रतीपः स हि शिक्षकः ॥ ९६ ॥
हरिनारायणस्येत्थं मतं ज्ञात्वा महागुरोः।
विश्वनाथोऽभवत्तूष्णीं नोचुरन्ये च किञ्चन ॥ ९७ ॥
अन्विष्यति स्कुलं यावद्विश्वनाथोऽथ निर्भृति।
नवीनमाधवस्तावत्तादृगस्थापयत् स्कुलम् ॥ ९८ ॥
भूदेवोऽथ नवीनमाधवकृते तत्रैव विद्यालये

पूर्व्वस्माद्गुणवत्तरे नवतया निर्वर्तने प्राविशत् ।
ज्ञानञ्चार्जयति स्म तत्र निपुणः पुष्पान्तरं पुष्पतो
धावन् सञ्चिनुते यथा नवनवं भृङ्गो मधूत्साहवान् ॥६६॥

इति श्रीमहेशचन्द्र-कृतौ भूदेवचरिते काव्ये
इंरेज्यध्ययनं नाम चतुर्थः सर्गः ॥

पञ्चमः सर्गः ।

इंरेजीभाषाध्ययनम् ।

भूदेवेनेण्डियानेकाडेमीस्कुलमपाकृतम् ।
कलिः कलुषयाञ्चक्रे तस्य शापादिवागतः ॥ १ ॥
कलिः कलहरूपेण विद्यावेश्म प्रविश्य तत् ।
प्रथमञ्च द्वितीयञ्च शिक्षकावभिनन्मिथः ॥ २ ॥
प्रथमः शिक्षकः पूर्णचन्द्रमित्र इति श्रुतः ।
नवीनमाधव इति द्वितीयोऽप्यभवत् तदा ॥ ३ ॥
लाभं विभजमानौ तौ स्कुलस्य स्थितिभञ्जनम् ।
कलहञ्चक्रतुरुभावर्थो हि कलहाङ्कुरः ॥ ४ ॥
नवीनमाधवः सोऽथ द्वितीयः शिक्षकः क्रुधा ।
विहाय तत् स्कुलं दुष्टमन्यदस्थापयत् स्कुलम् ॥ ५ ॥
उपच्छन्दयितुम् बालांस्तत्पितॄंश्च नवे स्कुले ।
वेतनं त्यज्यतेऽध्यक्षैर्नवे हट्टे करो यथा ॥ ६ ॥
नवीनमाधवेनापि स्वकृते नूतने स्कुले ।
भृतेरग्रहणस्यैव व्यवस्थाकारि तादृशी ॥ ७ ॥
विद्यार्थिनां दरिद्राणां महदेतत् प्रलोभनम् ।
भृतिर्न दीयते यत्र विद्याप्यादीयते च यत् ॥ ८ ॥
अन्वैषीद् विश्वनाथोऽपि पुत्रार्थे तादृशं स्कुलम् ।
नवीनमाधवेनापि तदेव स्थापितन्तदा ॥ ९ ॥
विश्वनाथः सुतं सद्यः प्रावीविशदद: स्कुलम् ।
फलति ह्यचिरादेव पुण्येच्छा पुण्यकर्म्मणाम् ॥ १० ॥
किन्तु तत्रापि भूदेवो न लेभे पठितुं चिरम् ।
दशैव मासानपठत् ततोऽन्यत्र स्कुलेऽविशत् ॥ ११ ॥

दश मासानधीत्यापि विद्यामाप स तत्र याम् ।
अल्पापि सा यशोऽनल्पं तद्यासूत यशोऽन्तरम् ॥ १२ ॥
वार्षिकी या परीक्षासीत्तत्र विद्यार्थिनां स्कुले ।
तान्तीर्णेषु निजश्रेण्यां भूदेवः प्रथमोऽभवत् ॥ १३ ॥
अथ विद्यालयाध्यक्षो ददौ तस्मै पुरष्क्रियाम् ।
यशसा सह तन्नाम वर्णाङ्काः पुस्तिकाः शुचीः ॥ १४ ॥
इत्थं कतिपयैरेव मासैरप्यर्जितास्य सा ।
अतिसर्वसहाध्यायि विद्यासूत यशो बहु ॥ १५ ॥
भूदेवस्य पितृव्यस्य श्यालकच्छिरुनामकः ।
भूदेवाध्ययनश्रेण्यां कश्चित्तत्र स्कुलेऽपठत् ॥ १६ ॥
भूदेवस्यैव भवने तत्पित्रा परिरक्षितः ।
ग्रासाच्छादनदानेन विद्याध्ययनकर्म्मणे ॥ १७ ॥
शास्त्रानिविष्टो दुर्म्मेधा दुष्टो दुष्टमतिश्च सः ।
रहस्युवाच भूदेवं पुस्तिकाभिः पुरस्कृतम् ॥ १८ ॥
"तात श्लाघ्योऽसि भूदेव परीक्षां दुस्तरामपि ।
उत्तीर्य प्रथमो भूत्वा यत् प्राप्तोऽसि पुरष्क्रियाम् ॥ १९ ॥
पतितोऽस्मि परीक्षाया न मे काचित् पुरष्क्रिया ।
किं ब्रवीमि गृहं गत्वा ब्रूहि मे गतिरद्य का ॥ २० ॥
नूनमद्यैव भवनात् पिता ते तर्कभूषणः ।
मामलब्धपुरस्कारं दृष्ट्वा निर्गन्तुमादिशेत् ॥ २१ ॥
तीक्ष्णः स मामनुत्तीर्णं न क्षमेताकृतश्रमम् ।
क्षमेतैव सुतं त्वान्तु किञ्चिद्वा यदि भर्त्सयेत् ॥ २२ ॥
तद् वत्स भागिनेय त्वमनुगृह्णासि मां यदि ।
तदा जीवितुमीशः स्यामन्यथा नास्ति मे गतिः ॥ २३ ॥
पुरस्कारपदे लब्धा अद्य याः पुस्तिकास्त्वया ।
ददासि यदि ता मह्यं तदाहं जीवितुं क्षमे " ॥ २४ ॥
इति प्ररुदितं तस्य श्रुत्वा प्रणयगर्भितम् ।
भूदेवः करुणौदार्यरसार्द्रः समपद्यत ॥ २५ ॥

२४। पुरस्कारपदे पुरस्काररूपेऽधिकारे सत्कारस्थाने इत्यर्थः ।
२५। करुणा दया औदार्यं दातृत्वं महत्त्वं वा ते एव रसौ ताभ्यामार्द्रः मृदुरित्यर्थः ।

उत्तमप्रकृतिर्बालः परार्थे स्वार्थमुत्सृजन् ।
भूदेवः प्रददौ तस्मै पुस्तिका वृतिवेष्टिताः ॥ २६ ॥
भूदेवनामाङ्कितया लेपसंश्लिष्टया दृढम् ।
पत्रावृत्यावृता आसन् परितः पुस्तिकास्तु ताः ॥ २७ ॥
भूदेवस्य करात् सद्यो मञ्जुषामिव तां वृतिम् ।
गृहीत्वा स छिरुर्नाम चिच्छेद च्छलनापरः ॥ २८ ॥
छित्वा भूदेवनामाङ्कं तत् पत्रावरणं छिरुः ।
आपणादपरं पत्रं लेपं च प्राथ्य सोऽग्रहीत् ॥ २६ ॥
आवृत्य तेन पत्रेण पुस्तिकास्ता निरन्तरम् ।
तेन लेपेन तत् पत्रं सर्वतोऽयोजयद् द्रुतम् ॥ ३० ॥
शुष्के च लेपे पुस्तीनां पिधानस्योपरि स्वयम् ।
स्वनामालिखदत्रस्तः कूटलेखपटुश्छिरुः ॥ ३१ ॥
अथ तां पुस्तिकापेटीं हस्तेन स्वयमुद्वहन् ।
भूदेवेन सहागच्छद् विश्वनाथस्य वेश्मनि ॥ ३२ ॥
मयोत्तीर्णा परीक्षेति गत्वाख्यच्च शठश्छिरुः ।
पुस्तिकापेटिकां तां च पुरस्कारमदर्शयत् ॥ ३३ ॥
शृण्वतोऽपि न भूदेवाज्जिह्राय न विभाय वा ।
प्रकाशादथवा सत्यादहो धूर्त्तस्य साहसम् ॥ ३४ ॥

---

२६ । उत्तमा सात्विकी प्रकृतिः स्वभावो यस्य सः उत्तमप्रकृतिः, त्रिविधानां लोकानां मध्ये श्रेष्ठस्वभावो भूदेव इत्यर्थः । तथाचोक्तं केनापि " ते वै सत्पुरुषाः परार्थघटकाः स्वार्थाविरोधेन ये मध्यस्थाः परकीयकार्य-कुशलाः स्वार्थाविरोधेन ये । ते वै मानुपराक्षसाः परहितं यैः स्वार्थतो हन्यते ये निघ्नन्ति निरर्थकं परहितं के ते न जानीमहे " इति ।

२७ । लेपः आटा इति ख्यातं द्रव्यम् ।

२८ । मञ्जुषां पेटीं—प्याकेट इतिख्यातं ।

२९ । भूदेवनामाङ्कं भूदेवस्य (लिखितं) नाम अङ्कश्चिह्नं यस्य तत्तथा ।

३० । निरन्तरं निरवकाशं यथा स्यात्तथा आवृत्य वेष्टयित्वा ।

३१ । कूटलेखे मिथ्यालिखने (जालकरणे) पटुर्दक्षः, तथापि अत्रस्तः अभीतः ।

३४ । प्रकाशात् विद्यालये सर्वविदितात् सत्यात् भूदेवाय पुरस्कारदानादित्यर्थः ।

छिरौ स्म श्लाघमानेऽपि भूदेवो नाह किञ्चन ।
अङ्गीकारं निजं रक्षन् महान् प्रायोऽभिभूयते ॥ ३५ ॥
दृष्ट्वा पुरश्छिरोः श्लाघां भूदेवोऽभूदवाङ्मुखः ।
लज्जा विसृजतो नास्ति किन्तु सा तत् प्रपश्यतः ॥ ३६ ॥
छिरुं परीक्षामुत्तीर्णमनुत्तीर्णमथात्मजम् ।
विश्वनाथः समाकर्ण्य किञ्चिदन्तरदूयत ॥ ३७ ॥
इत्थं धूर्तः पुरस्कारं भूदेवादहरच्छिरुः ।
स्वर्भानुर्मोहिनीमूर्तेर्विष्णोर्हस्तादिवामृतम् ॥ ३८ ॥
तथापि न चिराद् भित्त्वा च्छिरोर्मायां दुरात्मनः ।
कुहेलिकामिवादित्यो भूदेवस्योदगाद् यशः ॥ ३९ ॥
चिरं न च्छाद्यते सत्यं छद्मनापि महीयसा ।
सुदृढेनापि शैलेन गङ्गास्रोतः क रुध्यते ॥ ४० ॥
मासैः कतिपयैरेव स्वयं प्राकाशतैव तत् ।
सत्यं हि ब्रह्मणो रूपं लोकानत्येति सर्वथा ॥ ४१ ॥
कश्चित् पितृव्यो भूदेवस्यैकदा तस्य शिक्षकम् ।
ददर्श भवनेऽन्यत्र दैवगत्यैव योजितः ॥ ४२ ॥
विद्यालयस्य वार्त्तायां पृष्टायामथ शिक्षकः ।

---

३५ । श्लाघमानेऽपि आत्मश्लाघां कुर्वति सत्यपि भूदेवः किञ्चित् न आह स्म नोवाच इत्यन्वयः ।

३६ । विसृजतो मलं मूत्रं वा त्यजतो जनस्य लज्जा नास्ति न जायते परन्तु तत् मलमूत्रविसर्जनं अन्येन क्रियमाणं प्रपश्यतो लोकस्य सा लज्जा यथा भवति तद्वद् भूदेवो लज्जान्वितो बभूव इत्यर्थः ।

३८ । स्वर्भानुरिति । राहुः किल देवतानां पङ्क्तौ वेशं परिवर्त्य उपविश्य मोहिनीमूर्त्तिना विष्णुना परिवेशितममृतं पीतवान् इति पौराणिकी वार्त्ता । राहुर्यथा विष्णुहस्तादमृतं जहार छिरुरपि तद्वत् छलेन भूदेव-हस्तात् पुरस्कारं जहारेत्यर्थः ।

३९ । मायां शाठ्यं । कुहेलिकां नीहारवृष्टिं (कु आशा इति ख्यातां) ।

४१ । ब्रह्मणो रूपं स्वरूपं सत्यं हि सर्वथा लोकान् अतिक्रामति लौकिकच्छलं लङ्घयति ।

विद्याभ्यासे च शीले च भूदेवं प्रशशंस सः ॥ ४३ ॥
भूदेवस्य पितृव्यं तं नत्वोवाच स शिक्षकः ।
भ्रातृजं भवतो मन्ये भूषारत्नं स्कुलस्य नः ॥ ४४ ॥
जात्या गत्या प्रकृत्या च मत्या चोज्ज्वलया श्रिया ।
सोऽतिशेतेऽखिलांश्छात्रान् नक्षत्राणीव चन्द्रमाः ॥ ४५ ॥
परीक्षां वार्षिकीं तीर्णः पूर्णसङ्ख्यामवाप्तवान् ।
स एव प्रथमो जातो मुक्तानामिव कौस्तुभः ॥ ४६ ॥
भूदेवस्य गुणांस्तस्मिन्नित्थं स्तुवति शिक्षके ।
विश्वनाथानुजो भ्रान्तं मेने शिक्षकमेव तत् ॥ ४७ ॥
शिक्षकं तं स विस्मेरो विश्वनाथानुजोऽब्रवीत् ।
उत्पश्यामि तव भ्रान्तिं प्रमादं वा महाशय ॥ ४८ ॥
यस्य प्रशंसां कुरुषे यं ब्रूषे च पुरस्कृतम् ।
श्यालो मम कनिष्ठस्य छिरुर्नाम स बालकः ॥ ४९ ॥
छिरुर्हि पुस्तिकापेटीमात्मनः पारितोषिकीम् ।
प्रदर्श्याद्यः परीक्षायां जातोऽहमिति नोऽब्रवीत् ॥ ५० ॥
भूदेवस्तु मम भ्रातुर्ज्येष्ठस्य तनयः स्मृतः ।
परीक्षामपि नातारीत् स कथं स्यात् पुरस्कृतः ॥ ५१ ॥
इति ब्रुवन्तं भूदेव-पितृव्यं स्माह शिक्षकः ।
"नाहं भ्रान्तः प्रमत्तो वा नूनं यूयन्तु वञ्चिताः ॥ ५२ ॥
छिरुं जानामि भवतो भ्रातुः श्यालं कनीयसः ।
भूदेवमपि जानामि भवतो भ्रातुरात्मजम् ॥ ५३ ॥
भूदेव एव प्रथमः परीक्षां तीर्णवत्स्वभूत् ।
दुर्मेधा दुर्विनीतश्च छिरुस्तामुत्तरेत् कथम् ॥ ५४ ॥
भूदेव एवालभत प्रथमां च पुरस्क्रियाम् ।
संशयो नात्र कर्त्तव्यश्छिरुरेवाब्रवीन्मृषा ॥ ५५ ॥
डेभिड्हेयारितिख्यातः पण्डितश्च वृटिश् पुमान् ।
भूदेवमेव प्राशंसत् स्कुलं द्रष्टुमुपेत्य नः ॥ ५६ ॥

४५ । जात्या ब्राह्मणजातौ उत्पत्त्या, गत्या चेष्टया, प्रकृत्या स्वभावेन, मत्या बुद्ध्या, श्रिया शरीरशोभया च, उज्ज्वलयेति सर्वत्र अन्वेति ।

४८ । विस्मेरो विस्मितः ।

नवीनमाधवेनासौ सादरं हि निमन्त्रितः ।
पर्यैन्नत स्वयं छात्रान् स्कुलमागत्य मानदः ॥ ५७ ॥
नवीनमाधवस्तश्च प्रीतं वरमयाचत ।
अस्य स्कुलस्य शिष्यं मा भवान् कश्चिद् ग्रहीरिति " ॥५८॥
इति श्रुत्वा शिक्षकस्य विश्वनाथानुजो वचः ।
संशयापगमात् प्रीतः स्वमेव भवनं ययौ ॥ ५६ ॥
गत्वैव विश्वनाथाय तमुदन्तं न्यवेदयत् ।
दुर्लभं हि प्रियं सत्यं किन्तद्वक्तुं विलम्बते ॥ ६० ॥
उदन्तं विश्वनाथस्तु तं श्रुत्वा प्रीतिमानपि ।
किञ्चिन्नोवाच भूदेवं मनसेत्थं विचिन्तयन् ॥ ६१ ॥
अहो दाक्षिण्यकारुण्ये भूदेवस्य शिशोरपि ।
याभ्यां नुन्नो ददौ कीर्त्तिं परस्मै स्वार्जितामपि ॥ ६२ ॥
आचरत् साधु भूदेवः साध्वौदार्यं ततान च ।
छिरवे यत् पुरस्कारमयच्छद् यशसा सह ॥ ६३ ॥
दत्त्वा च कृतवान् मौनं तथा कोऽप्यपरो यथा ।
स्वं गौरवं न जानीयान्न च्छिरोरपि लाघवम् ॥ ६४ ॥
महाकुलभवो यादृङ् निन्दायां भवति त्रपा ।
प्रशंसायामपि प्रायस्त्रपा भवति तादृशी ॥ ६५ ॥
विशेषतश्च महतां निर्गच्छन्त्यसवो वरम् ।
तथापि न निजादास्यान्निर्गच्छति निजं यशः ॥ ६६ ॥
अतो नोवाच भूदेवः परीक्षोत्तरणं निजम् ।
पारितोषिकलाभं वा शालीनः स हि बालकः ॥ ६७ ॥
इति सञ्चिन्त्य भूदेवं पिता नोवाच किञ्चन ।
शुभे पथि स्वयं यान्तं को वारयति बुद्धिमान् ॥ ६८ ॥

---

६२ । दाक्षिण्यमार्जवं आनुकूल्यमित्यर्थः, कारुण्यं दया, ते द्वे, ताभ्यां दाक्षिण्यकारुण्याभ्यां नुन्नः प्रेरितः सन् ।

६३ । औदार्यं महत्त्वं दातृत्वं च ।

६६ । असवः प्राणाः ।

६७ । शालीनो लज्जितस्वभावः । तथाच " कुलजनप्रभवस्य लज्जा " इति चण्डी ।

इत्यल्पेनापि कालेन विद्या या तेन सञ्चिता ।
साऽप्युत्तार्य परीक्षां तं यशस्तस्योदपादयत् ॥ ६९ ॥
दृढामपि च्छिद्रोमीयां भित्त्वा तस्योदगाद् यशः ।
प्ररोहति भुवं भित्त्वा यथा वर्षासु कन्दलम् ॥ ७० ॥
उदितं तच्च विमलं यशोऽसूत यशोऽपरम् ।
सन्तानमिव दाक्षिण्यकारुण्यादिगुणाश्रितम् ॥ ७१ ॥
अत्रान्तरे मधुर्नाम चक्रवर्त्युपनामकः ।
स्कुलमस्थापयद् विप्रो नूतनं मुक्तवेतनम् ॥ ७२ ॥
नवं नवं स्कुलं यद् यत् प्रतिष्ठितमभूत्तदा ।
तस्य तस्यैव कर्तारोऽभिन्दंश्छात्रान् स्कुलान्तरात् ॥ ७३ ॥
चक्रवर्ती मधुः सोऽपि भूदेवमभिनत्तथा ।
नवीनमाधवकृतात् स्कुलाद्वद्दु विलोभयन् ॥ ७४ ॥
स उत्कृष्टतराध्यायलोभात्तत्राविशत् स्कुले ।
न त्वधीतिर्मनःपूता तस्य तस्मिन्नवर्तत ॥ ७५ ॥
तथापि पठतस्तत्र पञ्चमे मासि गच्छति ।
तस्याजनि विपत्पातः पठनं स्थगयन्निव ॥ ७६ ॥
गङ्गां त्रिदिवनिःश्रेणीमाश्रित्य ब्रह्मणः पदम् ।
हरिनारायणो लेभे भूदेवस्य पितामहः ॥ ७७ ॥
पितुश्च वत्सलतरे तिरोभूते पितामहे ।
व्यमनायत भूदेवः स्वभावसुमना अपि ॥ ७८ ॥
महागुरोर्निपातेन विश्वनाथश्च तत्पिता ।
पितुः श्राद्धादिदानाय बभूवाकुलमानसः ॥ ७९ ॥
पितामहस्य श्राद्धार्थं नूनमाज्ञां वहन् पितुः ।

---

७० । कन्दलं बीजानां प्ररोहः ।

७१ । भूदेवः परीक्षामुत्तीर्य प्रथमोऽभूदिति यशः कर्तृ दाक्षिण्यकारुण्यप्रभृति-गुणयुक्तमपरमन्यद् यशः कर्म असूत अजनयत् ।

७७ । त्रिदिवस्य स्वर्गस्य निःश्रेणीमधिरोहणीं कृत्रिमसोपानसदृशीं गङ्गां आश्रित्य ब्रह्मणः पदं ब्रह्मलोकं लेभे इत्यर्थः ।

७८ । पितुश्च जनकादपि वत्सलतरे स्नेहवत्तरे इत्यर्थः । व्यमनायत अविमना विमना अभवत् । स्वभावतः सुमना आनन्दितोऽपीत्यर्थः ।

दिनानि कतिचित् पाठाद् भूदेवोऽपि न्यवर्त्तत ॥ ८० ॥
मनसश्चाप्रियतया प्रतिबन्धेन तेन च ।
स्कुलं तत्याज भूदेवस्तन्मधोश्चक्रवर्त्तिनः ॥ ८१ ॥
उत्तरोत्तरमुत्कृष्टं भूदेवः स्कुलमैहत ।
कूपान्नदीं क्रमात् सिन्धुं मत्स्यमूर्त्तिर्यथाच्युतः ॥ ८२ ॥
इत्थं संवत्सरेऽतीते विश्वनाथो महागुरोः ।
सपिण्डीकरणान्तानि कर्म्माणि निरवर्तयत् ॥ ८३ ॥
शुचीभूयाथ भूदेवं तत्पिता तर्कभूषणः ।
उपनिन्ये यथाशास्त्रं स्वयं वर्षे त्रयोदशे ॥ ८४ ॥
आसीन्नाम्नैव भूदेवस्तर्कभूषणनन्दनः ।
जात्याप्यजनि भूदेवः साम्प्रतन्तु दृढव्रतः ॥ ८५ ॥
स व्रतस्यानुरोधेन यं यं भिक्षामयाचत ।
नातृप्यद् बहु दत्त्वापि तस्मै श्रद्धान्वितः स सः ॥ ८६ ॥
भूदेवस्तदशेषमेव गुरवे दत्त्वापि लब्धं धनं
तृप्तिं यन्न तदा जगाम तदिदं बीजं चिरं तद्धृदि ।
स्थित्वा तां गुरुभक्तिकल्पलतिकां दिव्यां पुराजीजनत्
सर्वस्वप्रतिपादनं गुरुपदे तस्याः फलं दृश्यते ॥ ८७ ॥

इति श्रीमहेशचन्द्रकृतौ भूदेव-चरिते काव्ये इंराजि-
भाषाध्ययनं नाम पञ्चमः सर्गः ।

---

८१ । स्कुलस्य अमनःपूतत्वात् ।

८२ । ऐहत इयेष । मत्स्यमूर्त्तिर्विष्णुर्यथा कूपे अमितो नदीं गतः, तत्राप्य-मितः सिन्धुं गतस्तथेत्यर्थः ।

८५ । अनुपनीतो विश्वनाथपुत्रो नाम्नैव केवलेन नाम्ना भूदेव आसीत् सम्प्रति जात्यापि भूदेवो ब्राह्मणोऽजनि अभूदित्यर्थः । दृढं अखण्डित-व्रतं ब्रह्मचर्यं यस्य सः ।

८६ । स भूदेवो व्रतस्य ब्रह्मचर्यस्यानुरोधेन न तूपार्जनस्येति भावः । यं यं जनं । स स सर्वोऽपि तस्मै भूदेवाय बहु दत्त्वापि तृप्तिं न लेभे तस्य ब्रह्मवर्चसदर्शनात् तस्मै श्रद्धाधिक्यं सर्वेषामभूदिति भावः ।

८७ । गुरवे ब्रह्मदात्रे पित्रे च विश्वनाथतर्कभूषणाय लब्धं भिक्षार्जितं तद्धन-मशेषमेन कृत्स्नमेव दत्त्वापि तदा यत्तृप्तिं न प्राप तत्तुल्यप्राप्तिरूपमिदं

षष्ठः सर्गः ।

इंरेजीभाषाध्ययनम् ।

भूदेवस्तदनु गुरोर्गृहीतवेदो
गायत्र्या तरणिमुपास्थित त्रिसन्ध्यम् ।
इंरेजीमपि पठितुं स्कुलं व्यचैषीत्
प्रारब्धान्न खलु निवर्तते महात्मा ॥ १ ॥
आकाङ्क्षीद् भृतिरहितं महच्च डेभिड्-
हेयारित्यभिविदितस्य लण्ड्जस्य ।
प्राज्ञस्य स्कुलमचिरेण स प्रवेष्टुं
पश्यन्ति ह्यपरिगतानुदारचित्ताः ॥ २ ॥
हेयारप्युपनमतो निजे स्कुलेऽस्य
श्रीभाजोऽप्यमलिनतां परीक्षते स्म ।
तस्यासीद् व्रतमपरिष्कृतप्रतीको
विद्यार्थी न खलु विशेत् स्कुलं ममेति ॥ ३ ॥

बीजं कारणमेव बीजमङ्कुरकारणं तस्य भूदेवस्य हृदि क्षेत्रे चिरं दीर्घकालं स्थित्वा पुरा भविष्यति काले गुरुभक्तिरूपां दिव्यां सज्जनमनोरमां कल्पलतां सङ्कल्पपरम्परां लतासदृशीं, अथच दिव्यां दिवि भवां कल्पलतां कल्पवृक्षाश्रितां लतामजीजनत् प्रारोहयत् । अनेन अल्पदानेन मम तृप्तिर्नाभूत् अतः सर्वस्वमेव विश्वनाथाय गुरवे दास्यामीति सङ्कल्पं चकारेति भावः । यस्याः सङ्कल्पलतायाः फलं प्रयोजनं शस्यं च सर्वस्वप्रतिपादनं सर्वस्वदानं अद्यापि दृश्यते । विश्वनाथवृत्तिदानं विश्वनाथचतुष्पाठीदानं चेति भावः । बीजमंकुरकारणे । हेतुतत्त्वाधानशुक्रे इति दिव्यं लवङ्गे धात्र्यां स्त्री-वल्गौ दिवि भवे त्रिषु इति च मेदिनी । तरणिं सूर्य्यं संसारोत्तरणस्य तरणिं नावमिवेति भावः । उपास्थित आराधयामास । व्यचैषीत् अन्वियेष ।

भृतिरहितं वेतनवर्ज्जितं । डेभिड् हेयार् इति नामकस्य लण्डूजस्य इंलण्डदेशभवस्य ।

अपरिष्कृतप्रतीको मलिनावयवः ।

श्रोत्रान्ते शिरसि च विश्वनाथसूनो-
र्घृष्ट्वैकं निवसनखण्डमग्निशौचम् ।
अस्पृष्टं तदपि मलाणुनापि वास-
स्तद् दृष्ट्वा तममनुत स्कुलस्य योग्यम् ॥ ४ ॥
इत्येनं द्विजतनयं परीक्ष्य सम्यङ्-
निश्चित्याप्यमलतनुं न पर्य्यगृह्णात् ।
नूनं स्म स्मरति नवीनमाधवाय
स्वीकारं सुमतिरिमञ्च तस्य शिष्यम् ॥ ५ ॥
भूदेवो यदि च नवीनमाधवस्य
प्रागेव स्कुलमजहाद्विनाभिसन्धिम् ।
साहेबस्तदपि ततः स्कुलात् स्कुलं स्वं
संप्राप्तुं छलमिदमस्य मन्यते स्म ॥ ६ ॥
हेयारा स्कुलगृहमप्रवेशितः स्वं
भूदेवः पितरमुवाच सर्व्ववृत्तम् ।
सोऽप्यध्यापयितुममुं कलेजसंज्ञे
हिन्दूनां पठनगृहे मनश्चकार ॥ ७ ॥
दातव्या भृतिरिह मासि मासि शिष्टै-
रप्यस्वैः खलु रजतानि पञ्च पञ्च ।
इत्यास्ते नियमविधिः श्रुतः कलेजे
वाह्योऽसौ मम कथमित्यचिन्तयत् सः ॥ ८ ॥
सा चिन्ताहृदि शयितापि तस्य पत्यु-
स्तत्पत्न्या कतिपयवासरैरलक्षि ।

---

४ । अग्निशौचं निवसनखण्डं । इस्तिरीयन्त्रेण शुचीकृतं वस्त्रखण्डं । मलाणुनापि मालिन्यकणनापि ।

५ । तव स्कुलस्य च्छात्रं नाहं गृह्णामीति नवीनमाधवाय प्रतिश्रुतं स सुमतिः सुबुद्धिः हेयारसाहेबः स्मरति स्म सस्मार, इमं भूदेवञ्च तस्य नवीनमाधवस्य शिष्यं स्मरति स्म इत्यर्थः । पञ्चमसर्गस्य ५८ श्लोको द्रष्टव्यताम् ।

७ । हेयारा हेयारसाहेबेन ।

८ । अस्वैर्निर्धनैरपि मासि मासि पञ्च पञ्च रजतानि भृतिर्दातव्या वेतनं देयमिति नियमविधिरास्ते असौ नियमो मम कथं वाह्यः मया कथं वोढुं शक्य इति अचिन्तयत् ।

आकारेङ्गितगतिचेष्टितैरपूर्व्वै-
गृह्णन्ति ह्यमलधियो मनोऽपि गूढम् ॥ ९ ॥
चिन्ताभिस्तिमितमिवानुमाय कान्तः
साध्वी साप्यजनि ततोऽधिकं सचिन्ता ।
अर्द्धात्मा ननु कथिता धवस्य जाया
सर्व्वात्मा मम तु मते पतिव्रता स्त्री ॥ १० ॥
एकान्ते पतिमथ दुःखिता सती सा
चिन्ताया अनुयुयुजे निदानमार्य्या ।
किं चिन्ताकुल इव नाथ लक्ष्यसे त्वं
प्राग्वत्ते स्थितिगतयः कथं न भान्ति ॥ ११ ॥
इत्थं स प्रियतमया तयाऽनुयुक्तः
प्रत्यूचे क्षणमवधाय विश्वनाथः ।
सम्यङ्मामवगतवत्यसि त्वमार्य्ये
चिन्तार्त्तोऽस्म्यहमधुना यतो ब्रुवे तत् ॥ १२ ॥
भूदेवः समभिलषत्यसाविदानी-
मध्येतुं क्वचन समुन्नते कलेजे ।
तद्योग्यः स हि मनुते स्कुलानि नीचै-
र्विद्या हि द्रुतमपि सिध्यति श्रमेण ॥ १३ ॥

---

९ । पत्युस्तस्य विश्वनाथस्य । तत्पत्न्या ब्रह्ममय्या । अलक्षि ज्ञाताभूत् ।

१० । स्तिमितमिव आर्द्रमिव स्थिरामिव वा । धवस्य पत्युः अर्द्धात्मा अर्द्धाङ्गं ।

११ । अनुयुयुजे पप्रच्छ । प्रश्नोऽनुयोगः पृच्छा चेत्यमरः । निदानं कारणं ।

१२ । सम्यक् सत्यं ।

१३ । तद्योग्यः समुन्नतकलेजयोग्यः स्कुलानि नीचैर्नीचानि स्वापेक्षया नीच-विद्यार्थियोग्यानि मनुते मन्यते । ननु स्कुल एव एतावन्तं कालमध्यैष्ट कथमिदानीं स्कुलं नीचं मन्यत इत्यतआह विद्या हीति । श्रमेण विलक्षण-प्रयासेन अधीता विद्या द्रुतमपि शीघ्रमपि सिध्यति अतो मत्पुत्रस्य श्रमाधिक्यात् स्कुलोचिता विद्या शीघ्रमेव सिद्धेत्यतो महत्तरं कलेजं प्रवेष्टुमिच्छतीति भावः ।

हिन्दूनामभिमतमस्ति यत् कलेजं
तत्राध्यापयितुमिमं ततोऽहमीहे ।
दातव्यं त्विह नियमेन वेतनं यत्
तद्दद्यां कुत इति चिन्तयास्मि दूनः ॥ १४ ॥
तच्छ्रुत्वा पतिमवदत् प्रिया तदीया
का चिन्ता तव वसुनो न वेद्मि नाथ ।
सन्त्याढ्यास्तव यजमानशिष्यवर्गा-
स्ते तुभ्यं न ददति किं धनं तदल्पम् ॥ १५ ॥
अन्येऽपि प्रचुरधनाः पुरीह सन्ति
प्रायो ये त्वयि बहुमानमाचरन्ति ।
तेभ्यो वा किमु न हि लभ्यते धनं तत्
स्वल्पं हि त्वदनुगुणं न तु प्रभूतम् ॥ १६ ॥
अन्विच्छेद् व्रतनिपुणः क्षुधावसीदन्
राजभ्यो धनमिति मानवं वचो यत् ।
तद्वक्त्राच्छ्रुतमसकृन्मया तदेव
प्रोक्तं ते न पुनरयं ममोपदेशः ॥ १७ ॥
लुम्पन्ती सहजमपि स्मितं मुखेन्दो-
श्चिन्तेदृक् तव न मया कदापि दृष्टा ।
इत्यस्माद् हृदयमिदं विदीर्य्यते मे
दोषः स्याद्यदि मम वाचि तत् क्षमस्व ॥ १८ ॥

१४ । दूनः उपतप्तः ।

१५ । वसुनो धनस्य ।

१६ । त्वदनुगुणं तव प्रयोजनानुकूलं, धनं हि स्वल्पमत्यल्पं न तु प्रभूतं प्रचुरम् ।

१७ । ननु स्त्रीणामुपदेशदानमनुचितं तत् कथं त्वया मह्यमुपदेशः क्रियत इत्याशङ्क्याह अन्विच्छेदित्यादि । राजतो धनमन्विच्छेत् संसीदन् स्नातकः क्षुधेति मानवं वचः मनोर्वचनं तव मुखान्मया असकृत् पुनः पुनः श्रुतं तदेव मया तव समीपे प्रोक्तं नतु ममायमुपदेश इत्यर्थः ।

१८ । तव मुखेन्दोः सहजमपि स्मितं स्वाभाविकमपि मृदु हसितं लुम्पन्ती नाशयन्ती स्मितपूर्वभाषित्वं हि तव स्वभावसिद्धं तच्च अद्य न दृश्यते इति भावः ।

इत्युक्तोपनतमिवाश्रु रुन्धती सा
रक्षन्ती कुशलममीलयद् दृशौ द्वे।
आश्वास्य क्षणमथ तर्कभूषणस्तां
शौण्डीरं वचनमभाषताधनोऽपि ॥ १९ ॥
मा खिन्ना त्वमपि ममैव चिन्तया भू-
श्चिन्तैषा त्वमिव ममानुगा चिराय।
दारिद्र्यं सुहृदिव यद्धि मामुपास्ते
तद्भार्य्यां कथय कथं त्यजामि चिन्ताम् ॥ २० ॥
दारिद्र्यं वरमपि मे सचिन्तमेतन्-
न त्वाढ्या विकृतमुखाः सुखावलोक्याः।
आसन्नानपि महतः कुलप्रदीपान्
खद्योतानिव विमृशन्ति ये मदान्धाः ॥ २१ ॥
कल्याणि स्मरयसि मां मनोर्वचो यत्
तत्तुभ्यं धनमखिलं मनो ददामि।
रक्षेदं मनसि निजे मनो मदीयं
कर्त्तव्यं तदनु विधेहि यत्तवेष्टम् ॥ २२ ॥

१९। उपनतमिव आगतमिव अश्रु नयनजलं रुन्धती प्रतिबध्नती। कुशलं कल्याणं रक्षन्ती रक्षितुं दृशौ चक्षुषी अमीलयत् निमीलितवती।

२०। चिन्ता हि दारिद्र्यस्य दरिद्रताया भार्य्या पोष्या अतएव सुहृदो दारिद्र्यस्य पत्नीव इत्यतस्तां कथं त्यजामि कुटुम्बवत् सापि मया भरणीयेत्यर्थः।

२१। सचिन्तं चिन्तया सह वर्त्तमानं चिन्तानुगतं दारिद्र्यमपि मे वरं मनाक् प्रियं। परन्तु विकृतानि मुखानि येषां तादृशा आढ्या धनवन्तो जनाः सुखेन अवलोक्या दर्शनीया न भवन्तीति शेषः। ये आढ्या मदेन धनगर्व्वेण अन्धाः कार्य्याकार्य्यदृष्टिशून्याः अतएव कुलप्रदीपान् प्रदीपवत् कुलं प्रकाशयत आसन्नान् समीपस्थानपि महतो जनान् खद्योतान् इव ज्योतिरिङ्गनकीटवत् क्षुद्रान् विमृशन्ति वितर्कयन्ति। अन्धा हि निकटवर्त्तिनोऽपि महतः प्रदीपान् खद्योतवत् क्षुद्रान् पश्यन्ति तद्वदिति भावः।

अश्रद्धासीन्मनुवचने पुरा जनानां
गोब्रह्मद्विषि तु कलौ न दृश्यते सा।
तन्नाहं धनमुपयाचितुं धनाढ्यान्
यामीति व्रतमवधारय स्थिरं मे ॥ २३ ॥
अश्रद्धं वितरति वा ददात्यपात्रे
दत्त्वा वा वहति वतानुतापमेव।
श्लाघां वा प्रकटयति प्रदाय किञ्चिद्
दाता कः कथय कलाविहास्ति शुद्धः ॥ २४ ॥
सत्कारो न धनवतां न सान्त्ववादो
नाचारो न च विनयः कुतो महत्त्वम्।
कस्तेषामवमतविप्रपण्डिताना-
मर्थार्थी सविधमपि प्रयातुमिच्छेत् ॥ २५ ॥
एकस्य व्यवहृतिमद्य वच्मि राज्ञो
योऽनल्पं वितरति वार्षिकं धनं मे।
अन्येषामपि धनिनामुखापुलाक-
न्यायेन द्रविणमदं तथैव विद्धि ॥ २६ ॥
दातुं सत्क्षितिसुरपण्डितेभ्य एकां

२५। धनवतामित्यत्र कर्त्तरि षष्ठी, धनवन्तः सत्कारादिकं न कुर्व्वन्तीत्यर्थः। अवमताः अवज्ञाता विप्रपण्डिता ब्राह्मणपण्डिता यैस्तेषां। सविधमपि अन्तिकमपि किमुत गृहमासनं वा।

२६। व्यवहृतिं व्यवहारं। वार्षिकं वर्षे देयं। उखापुलाकन्यायेन स्थालीपुलाकन्यायेन, पितरः स्थाल्युखाकुण्डमित्यमरः। स्थालीपुलाकन्यायश्च स्थालीस्थास्तण्डुला एते सर्व्वे विक्लित्तिभागिनः समकालाग्निसंयोगभागित्वात् प्रतिपन्नवत् इति। यथा स्थाल्यां पच्यमानानां तण्डुलानां मध्ये एकस्यैव तण्डुलस्य शैथिल्यं परीक्ष्य अन्येषां सर्व्वेषामेव तण्डुलानां शैथिल्यं तादृशमेव अनुमीयते तथा एकस्य धनवतो व्यवहारं परीक्ष्य अन्येषामपि धनवतां व्यवहारस्तादृश एव भवितुमर्हतीति निश्चयः क्रियत इति भावः। द्रविणमदस्य धनमदस्य तुल्यकारणकत्वादित्यर्थः।

विज्ञप्तिं प्रकटितवान् प्रकाशपत्रे ।
एकस्मिन्नहनि समेत्य वर्षमध्ये
ग्राह्यं तैर्धनमवधारिते मयेति ॥ २७ ॥
आज्ञाहे पथि पथि डिण्डिमप्रहत्या
नीचानाह्वयति यथा धनं ग्रहीतुम् ।
अस्मानप्यहह तथावमन्यतेऽसौ
विज्ञप्त्या प्रकटितया प्रकाशपत्रे ॥ २८ ॥
तस्माहं धनमुपयाचितुं धनाढ्यान्
यास्यामीत्यवितथमेव ते ब्रवीमि ।
नेच्छामि. क्षितिपतिमप्यमुं प्रयातुं
यो मह्यं बहु वसु वार्षिकं ददाति ॥ २९ ॥
आत्मानं पुरुष इहात्मनैव रक्षे-
दात्मानं निपतितमात्मनोद्धरेच्च ।
शास्त्रीयो विधिरयमेव मेऽवलम्बो
नाढ्यानां मदविकृताननप्रतीक्षा ॥ ३० ॥
कल्याणि त्वमसि मतिर्मम द्वितीया
देहार्द्धं भवसि सुखासुखे च तुल्यम् ।
देहार्द्धं मम भवनाम्बुजे च लक्ष्मी-
स्त्वं प्राणा बहिरबहिश्च वर्त्तमानाः ॥ ३१ ॥
तस्मात्त्वं प्रभवसि यावदेव ताव-
द्गृह्यं नो लघय सखि व्ययं कथञ्चित् ।

---

२७ । क्षितिसुरपण्डितेभ्यो ब्राह्मणपण्डितेभ्यः ।

२८ । डिण्डिमस्य वाद्यभाण्डविशेषस्य (ढोलइतिख्यातस्य) प्रहृत्य ताडनेन ।

२९ । अवितथं सत्यं ।

३० । आत्मानमात्मना रक्षेत्, उद्धरेदात्मनात्मानम् इति च भगवद्गीतायामुक्तो विधिरित्यर्थः । मदाविकृताननप्रतीक्षा मदेन गर्व्वेण विकृतस्य वक्रीकृतस्य आननस्य मुखस्य प्रतीक्षा पुनः पुनर्दर्शनं न मम अवलम्ब इति भावः ।

३१ । सुखञ्च असुखञ्च इति सुखासुखं तस्मिन् । बहिरबहिश्च बहिरन्तश्च वर्त्तमानाः प्राणाः प्राणतुल्या भवसीत्यर्थः ।

शाकेनाप्युदरमिदन्तु पूरयित्वा
जीवामः कथमपि सुव्रते वयञ्च ॥ ३२ ॥
वत्सस्याध्ययनभृतिर्हि पञ्चमुद्रा
उद्‌वृत्ता भवति यथैव मासि मासि ।
सङ्क्षेपं गृहिणि तथा व्ययस्य कुर्य्याः
श्लाघ्यं मे भवतु गृह्यव्रतं त्वयैव ॥ ३३ ॥
तच्छ्रुत्वा प्रियवचनं प्रियस्य साध्वी
सुप्रीता स्मितमकरोत् सुधावदातम् ।
पुत्रस्याध्ययनभृतिञ्च संग्रहीतुं
निश्चिक्येऽनशनमपि स्वयं हृदा सा ॥ ३४ ॥
इत्येवं बहुभिरवर्त्तत स कष्टैः
न त्वाढ्यान् द्रविणमयाचतोरुतेजाः ।
पञ्चास्यो वरमुपवासमभ्युपेया-
न्नाश्नीयात्तदपि मृगं हतं परेण ॥ ३५ ॥
मासान्ते प्रियतमयाथ सञ्चितास्ता
दत्त्वैव द्विजतिलकः स पञ्चमुद्राः ।
हिन्दूनां पठनगृहे कलेजसंज्ञे
भूदेवं तनयमपाठयत् प्रवेश्य ॥ ३६ ॥
भूदेवो वयसि चतुर्दशाब्दमात्रे
तं विद्यानिलयमधिष्ठितोऽध्यगीष्ट ।

---

३२ । गृहे भवं गृह्यं गृहस्थितेर्व्ययमित्यर्थः । लघय लघुं कुरु ।

३३ । अध्ययनभृतिः अध्ययनस्य वेतनम् । गृह्यव्रतं गृहस्थाश्रमरक्षाया नियमः श्लाघनीयः प्रशंसार्हो भवतु इत्यर्थः ।

३४ । हृदा मनसा गूढ़ेन सङ्कल्पेन अनशनमपि भोजनाभावमपि निश्चिक्ये निश्चितवती । अनशनमपि कृत्वा मया पञ्चमुद्रा उद्वर्त्तनीया इति गूढ़ निश्चयं चकारेति भावः ।

३५ । अवर्त्तयत् वृत्तिनिर्व्वाहं कृतवान् । उरुतेजाः महातेजाः । पञ्चास्यः सिंहः । अभ्युपेयात् स्वीकुर्य्यात्, सम्भावनायां लिङ् ।

३६ । द्विजतिलको ब्राह्मणः । हिन्दूनां पठनगृहे कलेजसंज्ञे हिन्दुकलेजे ।

सप्तम्यां निहितपदोऽपि शिष्यपङ्क्तौ
प्राथम्ये स्थित इव रामचन्द्रमित्रात् ॥ ३७ ॥

छात्राणामुपनतितद्विपर्य्ययौ वा
कायस्थः परिगणयन् स्वपुस्तपत्रे ।
भूदेवं जनितवतो विलोक्य नाम
स्मेरास्यः किमपि बभूव शिक्षकोऽसौ ॥ ३८ ॥

सिद्धान्तं श्रुतिमतसङ्गतं न जानन्
म्लेच्छानां वत मत एव पक्षपाती ।
चित्तेन द्विजवरपण्डितावमानी
मानी स व्यवृणुत भूमिगोलविद्याम् ॥ ३९ ॥

भूगोलं ब्रिटिशनुमानतर्कयुक्त्या
नारङ्गोपममिति शिक्षको विवृत्य ।
भूदेवं प्रति सविशेषमब्रवीत् स-
स्मेरस्तत् पितुरनभिज्ञभावमानी ॥ ४० ॥

भूदेव द्विजवरपण्डितः पिता ते
नेदं नो मतमनुमंस्यतेऽपि सत्यम् ।
शङ्के स क्षितिवलयं वदेत्त्रिकोणं
नास्तीदृङ् मतमहहात्र हिन्दुशास्त्रे ॥ ४१ ॥

---

३७ । चतुर्दशानां पूरणश्चतुर्दशः चतुर्दशोऽब्दो वत्सरो मात्रा परिमाणं यस्य तस्मिन् वयसि । रामचन्द्रमित्रादध्यगीष्ट अध्ययमनकार्षीत् । सप्तम्यां श्रेण्यां निहितपदोऽपि प्राथम्ये स्थित इव प्रायः प्रथमोऽभूदित्यर्थः । विरोधाभासश्च ।

३८ । उपनतिरुपस्थितिस्तद्विपर्य्ययोऽनुपस्थितिस्तौ, स्वपुस्तकस्य पत्रे लिखन् सन् भूदेवस्य पितुर्नाम दृष्ट्वा किञ्चिज्जहासेत्यर्थः ।

३९ । द्विजवरपण्डितावमानी ब्राह्मणपण्डितमवजानन्, मानी अभिमानशाली भूमिगोलविद्यां भूगोलविद्यां व्यवृणुत विवृत्य उपदिदेशेत्यर्थः ।

४० । नारङ्गोपमं नारङ्गस्य (कमलालेबुइति ख्यातस्य) फलविशेषस्य तुल्याकारं । अनभिज्ञभावं अनभिज्ञतां मन्यते इति अनभिज्ञभावमानी ।

४१ । सत्यपि नोऽस्माकमिदं मतं नानुमंस्यते नाभ्युपपत्स्यते इत्यर्थः ।

भूदेवः परमगुरूपहासगर्भां
वाचं तां गुरुपदवत्सलो निशम्य ।
उष्णोऽपि प्रतिवचनं न किञ्चिदूचे
दुर्वाचः फलमनुभूय शिक्षितो वा ॥ ४२ ॥
हृन्मर्म्मव्यथकमपि स्वचेतसाऽसौ
शल्याभं कथमपि धारयन् वचस्तत् ।
स्वं वेश्म प्रतिगत एव तातपादा-
नद्राक्षीदपरिजहत् स्कुलस्य वेषम् ॥ ४३ ॥
सद्योऽसौ चरणयुगं पितुर्गृहीत्वा
तं बद्धाञ्जलिरनुनीव पृच्छति स्म ।
भूचक्रं सजलधि हिन्दुशास्त्रकाराः
कीदृक्षाकृति जगदुस्तदुच्यतां मे ॥ ४४ ॥
प्रत्यूचे तं प्रीतिमान् विश्वनाथो
गोलाकारा नन्वियं भूतधात्री ।
गोलाध्याये ज्योतिषे सम्यगुक्ता
कः सन्देहस्तत्र ते तात जातः ॥ ४५ ॥
तथापि यदि सन्देहस्तत् सिद्धान्तशिरोमणेः ।
ग्रन्थस्य गोलाध्यायस्थं वचनं शृणु वत्स मे ॥ ४६ ॥
करतलकलितामलकव-
दमलं सकलं विदन्ति ये गोलम् ।
दिनकरकरनिकरनिहत-
तमसो नभसः सपरिधिरुदितस्तैः ॥ ४७ ॥
सर्व्वतः पर्व्वतारामग्रामचैत्यचयैश्चितः ।

---

४२ । दुर्वाचः फलमनुभूय, शिक्षितो वा शिक्षित इव । वा स्याद्विकल्पोपमयोरित्यमरः । चतुर्थसर्गस्य ऊनत्रिंशश्लोकादारभ्य ऊनषष्टिश्लोकपर्य्यन्ते काशीनाथवृत्तान्ते स्कुलाद्बहिष्करणं यदुक्तं तदेव फलमित्यर्थः ।

४४ । कीदृक्षाकृति कीदृशाकारम् ।

४५ । भूतधात्री पृथिवी । सम्यक् सत्यम् ।

४७ । करतलेन कलितं धृतं यदामलकं आमलक्याः फलं तद्वदित्यर्थः ।

४८ । सर्व्वत इति । पर्व्वता आरामाः, उपवनानि ग्रामा ग्रामस्थगृहप्राका-

कदम्बकुसुमग्रन्थिः केशरप्रसरैरिव ॥ ४८ ॥
इमे द्वे वचने एव प्रमाणं बहु मन्यताम् ।
गोलाध्यायममुं ग्रन्थं ममोद्घाट्य च दृश्यताम् ॥ ४९ ॥
इत्युक्त्वा ग्रन्थमङ्गुल्या निर्दिश्य तमदर्शयत् ।
श्रीविश्वनाथः पुत्राय बहुज्ञस्तर्कभूषणः ॥ ५० ॥
अथ स ग्रन्थमाकृष्य तमुद्घाट्य च दारकः ।
दृष्ट्वा ते वचने तस्मिन्नुज्जीवित इवाजनि ॥ ५१ ॥
पत्रान्तरे स वचने अनुलिख्य ते द्वे
ग्रन्थे जुगोप परिहृष्टमनाः स्वपाठ्ये ।
अन्तः कथञ्चन दधार च हर्षवेगं
यावत् परेद्यवि कलेजगृहप्रवेशम् ॥ ५२ ॥
भूदेवोऽह्नि परत्र शिक्षकममुं गत्वा कलेजेऽब्रवीद्-
गोलत्वं क्षितिमण्डलस्य न हि ते तातोऽभ्युपेयादिति ।
यच्छ्रीमन्नवदद् भवान् न खलु तत्तादृक् स हि ज्ञानवां-
स्तातस्तत्रभवान् ममाभ्युपगतो गोलत्वमेव क्षितेः ॥ ५३ ॥

दादयः चैत्यानि चैत्यवृक्षास्ते कदम्बकुसुमस्य किञ्जल्कतुल्यानि पृथिवी च कदम्बकुसुमकोषवदिति भावः ।

४९ । इमे द्वे वचने एव प्रमाणमित्यत्र उद्देश्यविधेयभावेन अन्वयात् वचनभेदो न दोषाय । उद्देश्यविधेयस्थले लिङ्गवचनमतन्त्रमिति शास्त्रात् ।

५१ । अजनि अभूत् ।

५२ । पत्रान्तरे अन्यस्मिन् पत्रे पत्रसदृशलिखनसाधनद्रव्ये (कागज इति ख्याते) अनुलिख्य अनुकरणेन लिखित्वा स्वपाठ्ये ग्रन्थे तत् पत्रं जुगोप ररक्षेत्यर्थः । कथञ्चन केनापि प्रकारेण अतिकष्टेनेत्यर्थः । यावत् कलेजगृहप्रवेशमिति मर्य्यादार्थयावच्छब्दयोगे द्वितीया । परद्यवि परस्मिन्नहनि तत्परदिने ॥

५३ । भूदेवः परस्मिन् दिने, अमुं रामचन्द्रमित्रनामानं शिक्षकं कलेजे प्राप्य अब्रवीत् । किमब्रवीदित्याह—हे श्रीमन् भवांस्त्वं " ते तातः पिता क्षितिमण्डलस्य गोलत्वं नहि अभ्युपेयात् नाङ्गीकुर्य्यात् " इति यत् अवदत् कथितवानसि तद्वचनं तादृक् तादृशार्थयुक्तं न खलु

शास्त्रीयश्च स्वयमकथयत्तातपादः प्रमायां
गोलाध्याये यदभिहितवान् भास्कराचार्य्य आर्य्यः ।
इत्युक्त्वाऽसौ सपदि वचने दर्शयामास ते द्वे
पत्रारूढे ह्रियमिव ददन्मानिने शिक्षकाय ॥ ५४ ॥
प्राचीनानामपि कृतधियां सूक्ष्मदर्शित्वमित्थं
भूदेवानां भ्रमविरहितं सप्रमाणं समर्थ्य ।
श्रीभूदेवः स्वपितृचरणान् वर्द्धयन् गौरवेण
छात्रैश्चित्रस्तिमितनयनैर्दृश्यमानो दिदीपे ॥ ५५ ॥

इति श्रीमहेशचन्द्रकृतौ भूदेवचरिते काव्ये इंरेजीभाषा-
ध्ययनं नाम षष्ठः सर्गः ॥

नैव भवति । हि यतः ज्ञानवान् बहुज्ञस्तत्रभवान् पूज्यो मम तात क्षितेर्गोलत्वमेव न तु अन्यादृशाकारत्वम् अभ्युपगतः स्वीकृतवान् । अङ्गीकाराभ्युपगमप्रतिश्रवसमाधय इत्यमरः । अत्र युष्मदर्थ-भवत् योगे मध्यमो नेष्यते बुधैरित्यनुशासनात् भवच्छब्दस्य युष्मदि वाच्येऽपि अवददित्यत्र न मध्यमपुरुषः उत्तमपुरुषासम्भवाच्च प्रथमपुरुष इति ।

५४ । तातपाद इति गौरवसूचकः प्रयोगः भट्टारकपादाः समादिशन्तीतिवत् पूज्यपादस्तातोऽकथयदिति भावः । मानिने गर्वशालिने शिक्षकाय रामचन्द्रामित्राय लज्जां ददादिव पत्रारूढे पत्रे स्वयमनुलिखिते ते द्वे वचने दर्शयामासेत्यर्थः । शिक्षकस्ते वचने दृष्ट्वा लज्जितोऽभवदिति भावः

५५ । श्रीभूदेव इत्यत्र श्रीशब्दप्रयोगेण तस्य जयलाभः सूच्यते । जयं भूदेवः इत्थं प्रकारं प्राचीनानामपि अर्व्वाचीनवत् बृटिशपण्डितमतज्ञेभ्यो भिन्नानामपि तादृशं मतमज्ञातवतामपीति भावः । कृतधियां कृता धीश्चिन्ता यैः प्रणिधानमात्रेण परोक्षमपि वस्तुतत्वं पश्यतामिति भावः । भूदेवानां ब्राह्मणानां भ्रमशून्यं सूक्ष्मदर्शित्वं वचनद्वयरूपप्रमाणद्वारा समर्थ्य दृढं कृत्वा आत्मनः पितरं गौरवेण पाण्डित्यातिशयमहिम्ना वर्द्धयन् चित्रेण विस्मयेन स्तिमितानि निश्चलानि भूदेवमात्रविषयकानि नयनानि येषां तादृशैश्छात्रैरितरैः शिष्यैर्दृश्यमानः सन् दिदीपे दीप्तिमत्तरो बभूव जितकाशीव शोभाविशेषं लेभे इति भावः । सर्गसमाप्तौ प्रत्यक्षदेव ब्राह्मणवाचकभूदेवशब्दस्य सर्व्वत्र प्रयोगो ज्ञेयः ॥

सप्तमः सर्गः ।

इंरेजीभाषाध्ययनम् ।

तस्योद्धतप्रकृतिकस्य तु शिक्षकस्य
वादे जयादुपदिशन्निव साधुवृत्तम् ।
आश्चर्यवत् किमपि शिक्षकशिष्यवर्गै
र्भूदेव एष ददृशे निभृतैस्तदन्यैः ॥ १ ॥

छात्रस्तु तेषु मधुसूदनदत्त-नामा
तां श्रेणिमध्युषित एकतमस्तदानीम् ।
भूदेवमद्भुतधियं प्रति सन्न्यधत्त
सख्यार्थिनीमिव पुनः पुनरेव दृष्टिम् ॥ २ ॥

खीष्टीयधर्म्ममधिगम्य पुरा य आसी-
न्मैकेल इत्यभिधया च भुवि प्रसिद्धः ।
पाठे निवृत्तिगत एव समुत्थितः सन्
भूदेवमाशु स सखेव सखायमापत् ॥ ३ ॥

सुप्रातमित्यभिदधच्च करं करेण
धृत्वा ववन्ध सखितामिव तेन दत्तः ।
नामादिकं तदनु तं स च पर्यपृच्छत्
सख्यं वदन्ति हि करग्रहपूर्वमार्याः ॥ ४ ॥

विद्येच्छया च वयसा च तनुश्रिया च
बुद्ध्या च साधुसदृशोरुभयोस्तयोः सः ।
भाषक्रमेण सुदृढोऽजनि सख्यवन्धो
योगः कृतो विटपिनोरिव बाल्यभाजोः ॥ ५ ॥

सम्भाषणेन सह सञ्चरणेन नित्य-
श्चित्तप्रकाशनसहाध्ययनासनैश्च ।

४। सख्यं वदन्ति इति विवाहे यथा कन्यायाः करग्रहपूर्वं तया सह वरः सख्यं बध्नाति तथा अन्यत्रापीति भावः ।

५। योगः कृत इति—योड कलम इति ख्यातः कृत्रिमो योगविशेष इवेत्यर्थः ।

आस्रोरिव प्रणयिनोर्ववृधे तयोः स
प्रेमाश्विनोरिव वियोगमिवासहिष्णवोः ॥ ६ ॥

भूदेव आदरपरो मधुसूदनं त-
माहूय पाठविरतौ दयितं सखायम् ।
तद्विप्रयोगसमयं लघयन्निवासौ
प्रायेण सोदरमिव स्वगृहं निनाय ॥ ७ ॥

आत्मोपमं तमपि तत्र यथोपयोगम्
पानाशनेन परितर्प्य स तृप्त आसीत् ।
श्रीविश्वनाथदयिता च सुतस्य मित्रं
स्नेहेन तं सुतमिवाद्रियत द्रुतेव ॥ ८ ॥

पुत्राय पुत्रसुहृदे च विभज्य तस्मै
सा वत्सला स्वयमदात् परिवेष्य यद्यत् ।
आस्वादि तत्तदशनं मधुसूदनेन
स्नेहेन संस्कृततयेव सुधायमानम् ॥ ९ ॥

अन्येऽपि ये प्रियसुतस्य वयस्यभावाद्
भूदेवसद्म शिशवः सह तेन जग्मुः ।
तेभ्योऽपि सा व्यतरदेव यथोपलाभम्
भोज्यं विभज्य जननीव मुदान्नदेव ॥ १० ॥

किञ्चिद् विषण्णमथवा रजसानुलिप्तम्
भूदेवमित्रमवलोकयति स्म सा चेत् ।
अन्तर्बहिश्च कुरुते स्म तदा प्रसन्नम्
मातेव तं करतलेन परामृशन्ती ॥ ११ ॥

७। तद्विप्रयोगसमयमिति—यदि पाठावसाने तं स्वगृहं न आनेष्यत् तदा तेन मधुसूदनेन सह ततः प्रभृत्येव विरहोऽभविष्यत् । तं स्वगृहमानीय तु कञ्चित् कालं रक्षित्वा तस्य विरहकालं ह्रस्वमिव चकार इत्यत इयमुत्प्रेक्षा ।

८। स्नेहेन वात्सल्येन द्रुता द्रवीभूतेव तमाद्रियतेत्यन्वयः ।

९। तत्तदशनं भोज्यं वस्तु स्नेहेन वात्सल्येन संस्कृततया म्रक्षिततया इवेत्युत्प्रेक्षा । सुधायमानं सुधासदृशं मधुसूदनेन आस्वादि अनुभूतमित्यर्थः ।

१०। अन्नदेव अन्नपूर्णा मूर्त्तिः पार्वतीव ।

भूदेवमन्यमथवा सुहृदं त्वदीयं
सा विश्वनाथ-दयिताद्रियताविशेषम् ।
भूदेवतत्सवयसामत एव साऽभूत्
साधारणी हि जननी जगतां शिवेव ॥ १२ ॥
प्रेम्णि स्थितेऽपि सदृशे मधुसूदनस्तु
भूदेवमात्मभवनं न कदापि निन्ये ।
मन्ये स्थितिं विसदृशीं स्वगृहस्य मत्वा
सम्भावनात्रुटिमसौ सुहृदः शशङ्के ॥ १३ ॥
प्रीतेन दत्तमिव तं मधुसूदनेन
मित्रं स आप मधुसूदनदत्तमित्थं ।
दैवे प्रसेदुषि हि वारिव नारिकेलं
द्वारं विनापि पुरुषं समुपैति लाभः ॥ १४ ॥
दृष्ट्वा तमिष्टसखमध्ययने निविष्टं
तत्स्पर्द्धयेव सुतरां विनिविष्टचेताः ।
भूदेव एष च रतोऽध्ययने बभूव
सङ्गो हि दोषगुणयोः प्रभवो निरुक्तः ॥ १५ ॥
श्रीरामचन्द्र इह शिष्यगणस्य पङ्क्तौ
स्पर्द्धानिदानमकरोन्नियमं हि कञ्चित् ।
अध्यापनाविधिरयं सुकरो यथा स्या-
दन्तेवसत्सु च यथा विजिगीषुता स्यात् ॥ १६ ॥
पङ्क्तौ हि षष्टिरभवन्निह तस्य शिष्या
अध्यापकः पुनरभूत् स्वयमेक एव ।
एकेन दुष्करमिवाकलयन् बहूनां
शिक्षार्पणं प्रतिनिधीनकरोत् स कांश्चित् ॥ १७ ॥

---

१५ । इष्टसखम् प्रियसुहृदम् । दोषगुणयोः प्रभवः कारणम् । प्रभवत्य-
स्मादिति प्रभवः ।

१६ । अन्तेवसत्सु छात्रेषु मध्ये यथा च जिगीषा स्यादित्यर्थः ।

१७ । इह पङ्क्तौ सप्तम्यां श्रेण्यां तस्य रामचन्द्रमिश्रस्य षष्टिसंख्यकाः शिष्या
आसन् । बहूनां षष्टेः शिष्याणां शिक्षादानमेकेन दुष्करमिव आकलयन्
पर्यालोचयन् स रामचन्द्रमिश्रः कांश्चित् प्रतिनिधीनकरोदित्यर्थः ।

यो यः कृती बहुमतो मतिमत्तमश्च
व्युत्पत्तिमांश्च फलवत्पथदर्शकश्च ।
तं तं स शिक्षकवरः किल शिष्यमेव
शिष्यान् परानिह हि शिक्षयितुं न्ययुङ्क्त ॥ १८ ॥
भूदेवमुज्ज्वलधियं मधुसूदनं च
मेधाविनस्त्रिचतुरानितरांश्च तद्वत् ।
चक्रे निजप्रतिनिधीनुपदेशदाने
श्रीरामचन्द्र उचितस्य विधेः प्रणेता ॥ १९ ॥
अध्यापितानपि स ताननुशिष्टशिष्यैः
पर्य्यैक्षत प्रतिपदं परिपृच्छ्य बालान् ।
साधूत्तरं ददति तेषु तु यस्य शिष्या-
स्तं संख्ययागणयदुन्नतया प्रधानम् ॥ २० ॥
भूदेवशर्ममधुसूदनदत्तयोर्ये
शिष्यास्त एव ददुरेषु सदुत्तराणि ।
प्रायेण तावभवतामत एव मुख्यौ
मुख्या बभूवुरितरेऽपि गुणैः कदाचित् ॥ २१ ॥
यत्पक्षगा निजगदुस्त्वसदुत्तराणि
शिष्यस्य तस्य किल नामनि गण्यमाने ।
दोषाञ्जनाङ्कमलिना गुरुणैव दत्ता

---

१८ । कृती निपुणः । बहुमतोऽयमुत्तमश्छात्र इति बहूनामभिमतः । मतिमत्तमोऽन्येभ्यो बुद्धिमान् व्युत्पत्तिमान् संस्कारशाली फलवत्पथदर्शकः यः पन्थाः फलवान् तस्यैव दर्शको दर्शयिता । यस्य बुद्धिः फलमुखी तादृश इत्यर्थः ।

१९ । उचितस्य विधेर्नियमस्य प्रणेता प्रवर्त्तकः । त्रिचतुरान् त्रीन् च चतुरो वा ।

२० । अनुशिष्टैः आदिष्टैः शिष्यैरध्यापितान् । पदे पदे इति प्रतिपदं । यस्य शिष्यस्य शिष्याः साधु सम्यक् उत्तरं ददति तं शिष्यं प्रधानं अगणयत् ।

२१ । प्रायेण बाहुल्येन तौ भूदेवमधुसूदनौ मुख्यौ आद्यौ अभवतां बभूवतुः । अन्येऽपि कदाचित् मुख्या बभूवुः ।

रेखा पपात तनुभागिव लोकनिन्दा ॥ २२ ॥
पक्षस्थितान्निजनिजानत एव बालान्
सम्यक् सुशिक्षयितुमादधुरादरन्ते ।
प्राज्ञादधीत्य परतो निजशिक्षकाद्वा
बुद्ध्याऽथवा निभृतया निजया विभाव्य ॥ २३ ॥
इत्थं परस्परजिगीषव एव तेऽन्त-
र्वर्ग्यान् बहूपदिदिशुः सहपाठिनोऽपि ।
सौहार्दमप्यभिबभूव मिथो जिगीषा
सम्पन्न कापि भुवनेऽस्ति जयस्य तुल्या ॥ २४ ॥
वर्ग्या विजेतुमनसश्च परस्परांस्ते
शिष्या गुणान् समधिकाञ्जगृहुः प्रयत्नात् ।
संघर्षिणो हि गुणसंग्रहमन्तरेण
स्थातुं चिराय गुणिभिः सह न क्षमन्ते ॥ २५ ॥
भूदेव एष मधुसूदनजित् कदाचि-
ज्जिग्ये कदाचिदथ तेन च विद्ययैषः ।
इत्थं परस्परजयेन तयोर्मनीषां
तुल्याममन्यत परीक्ष्य स रामचन्द्रः ॥ २६ ॥
प्रायस्तयोः समधियोरपि सख्यभाजो-
र्धर्म्मस्थितौ मतिगती विषमे अभूताम् ।

---

२२ । दोषस्य अञ्जनाङ्कः कज्जलचिह्नं दोषसूचकोऽञ्जनाङ्क इत्यर्थः, तेन मलिना मलीमसा रेखा शिक्षकेणेव दत्ता मूर्तिमतीव लोकनिन्दा तस्य नामनि पपातेत्यर्थः ।

२३ । निजनिजान् आत्मीयानात्मीयानित्यर्थः । सम्यक् सत्यं सुष्टु शिक्षयितुं आदरं यत्नं, आदधुः चक्रुः । अन्यस्मात् प्रज्ञात् अथवा निज शिक्षकात् अथवा निभृतया एकाग्रया निजया आत्मीयया बुद्धया विभाव्य विशेषेण चिन्तयित्वेत्यर्थः ।

२४ । जयस्य तुल्या सम्पत् लाभः भुवने कापि नास्ति, जय एव सर्व्वापेक्षयाऽधिको लाभ इत्यर्थः । अर्थान्तरन्यासः ।

२५ । वर्ग्या वर्गे भवा इति वर्ग्या एकश्रेणिस्थाः । संघर्षिणः स्पर्द्धावन्तः ।

सर्वत्र चित्तगतयोऽपि पृथग्रुचीनां
नृणां भवन्त्यवयवा इव नैकरूपाः ॥ २७ ॥
विप्रो ययौ पितृपितामहयोः पदव्यां
ख्रीष्टप्रवर्तितपथेन ययौ च शूद्रः ।
केचित् पिबन्ति सुरया परिवर्त्य दुग्धं
दुग्धेन केचन सुरामपि के पिबन्ति ॥ २८ ॥
पूर्वैः श्रितो य इह पूर्वतरानुवृत्तै-
र्भूदेव एष न मुमोच तमार्यधर्मम् ।
भिन्नप्रवृत्तिकतया मधुसूदनस्तु
जग्राह साधुरिति मार्गमनार्यमेव ॥ २९ ॥
काले हि तत्र किल हिन्दुकलेऽशिष्या
भूयांस एव वृटिशामनुकर्त्तुकामाः ।
मद्यादिसेवनविधावपि दुर्विपाके
नापत्रपां न च भियं गणयाम्बभूवुः ॥ ३० ॥
अस्पृश्यमप्यशनजातमभुञ्जतामी
सम्मोहनीमपि सुरां पपुरग्निवर्णाम् ।
आचारशौचविनयार्जवशीलहीनाः
पापानि चक्रुरसुरा इव कामचाराः ॥ ३१ ॥
धर्मं स्मृतीर्गुरुवचांसि च तेऽवमत्य
जातिं स्थितिं कुलयशश्च तृणाय मत्वा ।

---

२७ । मतिगती मतेर्बुद्धेर्गती गमने विषमे विरुद्धे । नैकरूपा अनेकरूपाः ।

२९ । पूर्वैः पितृपितामहैः । तैरपि पूर्वतरान् पितृपितामहान् अनुवृत्तैरनुगतैर्य आर्यधर्म इह संसारे श्रितः सेवितः, भिन्ना भिन्नप्रकारा प्रवृत्तिर्यस्य स भिन्नप्रवृत्तिकः तस्य भावः तया हेतुना अनार्यम् खिष्टीयं धर्मं जग्राह ।

३० । किलेति लोकवार्तायाम् । दुष्टो विपाकः परिणामो यस्य तस्मिन् दुर्विपाकेऽपि अपत्रपां लज्जाम् ॥

३१ । अस्पृश्यम् म्लेच्छयवनादिपक्वमपि अशनजातं अन्नसामान्यम् अग्निवर्णाम् ब्राण्डीति ख्याताम् सम्मोहनीम् सद्य एव मोहजनिकामपि । कामं यथेष्टं चरन्तीति कामचाराः—खामूखेयालीति ख्याताः ।

आचारमूर्ध्नि च निधाय पदं मदान्धा
ऊर्द्ध्वस्थिता व्यदधुरध्वनि हन्त मूत्रम् ॥ ३२ ॥
इत्थं कदाचरणमेव विडम्बयन्तो
बाला दुरन्तमतयो वृटिशान्तदानीम् ।
आराद्धोऽपि निपतिष्यत आत्मनस्तैः
सभ्यानमंस्यत समारोहिते प्रवृत्तान् ॥ ३३ ॥
स्रोतोमुखे भुजबलेन तरन् प्रतीप-
मात्मानमप्यपसरन्तमधः क्रमेण ।
यद्वज्जनः सरिति मन्यत उत्तरन्तं
तद्वन्निपातेऽपि ते विदुरुन्नतिं स्म ॥ ३४ ॥
ज्ञानेन्द्रमोहन इति प्रथितो हि कश्चिद्
दौर्गत्यसागरतले निपपात सद्यः ।
मत्तो मदेन मदनेन च योषितोऽर्थे
खीष्टीयधर्ममवलम्ब्य विगृह्य पित्रा ॥ ३५ ॥

---

३२ । गुरुवचांसि पितृपितामहादीनां वाक्यानि स्थितिं मर्यादाम् ऊर्द्ध्वस्थिता दण्डायमाना एव न तूपविष्टाः वृटिशो हि दण्डायमानाः सन्तो मूत्रं कुर्वन्ति तद्वदिति भावः । अथच अध्वनि पितृपितामहादिभिः क्षुण्णे न्याय्ये पथि मूत्रं व्यदधुरवज्ञां चक्रुरिति भावः ।

३३ । कदाचरणमेव ऊर्द्ध्वस्थितो मूत्रं यथा त्यजति पुरीषमुत्सृज्य यथा जल-शौचं न करोति तथा निन्दितमाचारमेव न तु बलवीर्याध्यवसाय-कौशलादिषु अभिज्ञत्वमिति भावः । आराद् दूरे ।

३४ । प्रतीपं तरन् प्रतिस्रोतः सन्तरन् । क्रमेण अधोऽपसरन्तमपि आत्मानं शरीरम् उत्तरन्तं उच्चैर्गच्छन्तं मन्यते तथा निपातमपि उन्नतिं विदुः स्म ।

३५ । दुर्गतस्य दरिद्रस्य भावो दौर्गत्यं दारिद्र्यं, तदेव उत्तरीतुमशक्यतया सागर इव तस्य तले अधोभागे अविलम्बेनैव निपपात । तस्य पित्रा हि आत्मसम्पत्तेरधिकारात्तं व्यवच्छिद्य भ्रातुष्पुत्राय सर्वा सम्पद् दत्तेति स चिरं दारिद्र्ये मग्नोऽभूत् । योषितोऽर्थे काञ्चित् ब्रिटिश्‌कन्यकां विवोढुमित्यर्थः । पित्रा विगृह्य विरोधं कृत्वा पितुराज्ञां अवज्ञायेत्यर्थः ।

खीष्टीयधर्ममवलम्ब्य फलं तदीयं
काले परत्र बुभुजे मधुसूदनोऽपि ।
वृत्तिं विनाङ्गभुव आत्मन एव मृत्युं
मृत्युं मृतोऽपि पुनरुक्तमिवाध्यगाद् यः ॥ ३६ ॥
पापस्य नात्मनि फलं यदि [illegible]
जायेत तर्हि तनयेषु [illegible] तत् ।
तत्रापि नो यदि [illegible] तेषाम्
पच्येत न त्वफल[illegible] ॥ ३७ ॥

---

३६ । परत्र मरणादुत्तरस्मिन् काले मधु[illegible] खीष्टीयधर्मावलम्बनस फलं बुभुजे अनुबभूव । आर्याणां [illegible] आत्मनो नित्य[illegible]त् खीष्टीय मतेऽपि आत्मनो विनाशरहित[illegible]त् प्राणत्यागात्परत्रापि काले आत्म तिष्ठति जीवितावस्थायां कृतस्य शुभाशुभकर्मण: फलं च भुङ्क्ते अत स परधर्मग्रहणस्य निजधर्मत्यागस्य च अशुभं फलं बुभुजे इति भाव: किं फलं बुभुजे इत्यत आह वृत्तिं विनेति । मृतोऽपि यो मधुसूदन आत्म[illegible] एव आत्माभिन्नस्य आत्मस्वरूपस्येति यावत् अङ्गभुवआत्मजस्य पुत्रस्य वृत्तिं विना जीविकानिर्वाहोपायं धनादिकं [illegible] द्वितीयामिव मृत्युं अध्यगात् प्राप "अङ्गादङ्गात् [illegible] जायसे, आत्मा वै पुत्रनामासि"इत्यादि [illegible] तस्य मृत्युं आत्मन एव मृत्युं द्वितीयवा[illegible] भाव: । मधुसूदनस्य एकतर: पुत्रोऽन्नाभ[illegible] परत्र काले ममार इत्यत इयमुक्ति: ।

३७ । पापस्य फलं यदि आत्मनि स्वस्मिन् [illegible] जायेत न [illegible] (सम्भावनायां लिङ्) तर्हि तनयेषु आत्मन: पुत्रेषु तत्फलं [illegible] पक्वं भवति । यदि तत्रापि तेष्वपि न विपच्येत तदा तेषां तनयेषु पौत्रेषु पच्येत पक्वं भवेत् । अधर्मस्तु, तु पक्षान्तरे, अधर्मोऽफल एव निष्फल एव न भवति । तथा चोक्तं मनुना " यदि नात्मनि पुत्रेषु न चेत्पुत्रेषु नप्तृषु । न त्वेव तु कृतोऽधर्म: कर्तुर्भवति निष्फल:" इति । मधुसूदनस्य स्वधर्मत्यागस्य फलं तत्पुत्रेषु ददृशे इति भाव: ।

नात्यक्ष्यदेष यदि धर्ममदूरदर्शी
वृत्तिं विना न तनयोऽस्य तदाऽमरिष्यत् ।
मन्ये स्वजातिरथवा स्वजनोऽस्य कश्चिद्
यत्नेन तं शिशुमनाथमपालयिष्यत् ॥ ३८ ॥
अन्योऽपि योऽस्य तनयो मधुसूदनस्य
द्रव्यं विनापि किल जीवितवान् कथञ्चित् ।
देशोद्भवा धनिन एव तमन्वरक्षन्
भैक्ष्येण जातकरुणाः श[illegible]प्रपन्नम् ॥ ३९ ॥
इत्थं स्वधर्ममपहाय परस्य धर्मं
बालास्तथा जगृहुरुद्धतिमन्त एके ।
अन्ये पुनर्यदि [illegible]त्वा जहुरात्मधर्म-
[illegible]मार्यचरितं [illegible]हरेव लौल्यात् ॥ ४० ॥
भूदेव इत्थमपवर्त्तितधर्म[illegible]
कालप्रवाहमभितः पतितोऽपि धीरः [illegible]

---

३८ । अदूरदर्शी भाविफलादर्शी एष मधुसूदनो यदि धर्मं न अत्यक्ष्यत् स्व-धर्मत्यागं यदि न अकरिष्यत् तदा अस्य तनयो वृत्त्यभावेन हेतुना न अमरिष्यत् (क्रियातिपत्तौ लृङ्) कथमित्यत आह मन्ये इति । अस्य कश्चित् स्वजातिः समानजातीयः अथवा स्वजनो बन्धुजनः कुटु-म्बो वा अनाथं तं शिशुं मधुसूदनपुत्रं अपालयिष्यत् इत्यहं मन्ये सम्भाव[illegible] [illegible]र्मत्यागादेव तेषां द्वेषात् ते तं न पालयामासुरिति [illegible] ।

३९ । ननु कथं पूर्वोक्तं सम्भावयसि इति तद्युक्तिमाह अन्योऽपीति । द्वितीयः पुत्रो हि शरणागतः सन् स्वधर्मं त्यक्तवतोऽपि पुत्रः स्वदेशी-यानां करुणापात्रमभूत् । भिक्षाणां वृन्दमिति भैक्ष्यं बहुभ्यो बह्वीर्भिक्षाः अवाप्य कथञ्चित् जीवितवान् न तु खीष्टानां दयापात्रमभूदिति भावः ।

४० । उद्धतिमन्तोऽविनीताः । एके केचित् । आर्यचरितम् आर्यैर्हिन्दु-भिः कृतं । लौल्यात् चापल्यात् मिष्टान्नादिलोभादित्यर्थः ।

४१ । अपवर्तितः परिवर्तितः विपर्यस्त इति यावत् । धर्मरूपः सेतुः संसार-पारगमनोपायो येन तादृशं कालस्य प्रवाहं स्रोतः अभितः तस्य

आलम्ब्य पित्र्यमनुशासनकल्पवृक्षं
नाधः पपात न पदाच्च पदं चचाल ॥ ४१ ॥
संसर्गवानपि स तैर्दुरितप्रसक्तै-
र्नालिप्यत स्थिर[illegible] दुरिताणुनापि ।
तोयेषु मग्नमपि प[illegible]
न स्यात्कदाचि[illegible] लिप्तम् ॥ ४२ ॥
एकत्र तैः सह [illegible]
नात्याचरद् [illegible] ।
क्रीडन्नपि प्र[illegible]
रत्येति कोकि[illegible] ॥ ४३ ॥
स्वानेव केव[illegible]
पङ्के कलङ्ककलुषा [illegible]
अन्यानपि [illegible]
धारा हता इव गिर[illegible] ॥ ४४ ॥
विस्माय्य कश्चिदुपहासगिरा ।[illegible]

प्रवाहस्याभिमुखे "अभिमुखार्थेभ्यश्च" इत्यनेन तसिः । तद्योगे षष्ठ्यर्थे द्वितीया । पितृतः आगतमिति पित्र्यं [illegible] एव कल्पवृक्षस्तं आलम्ब्य अधोऽनुखे तो न पपा[illegible] पदमपि न चचालेत्यर्थः ।

४२ । दुरितेषु पापेषु प्रसक्तैरासक्तैः । दुरिताणु[illegible] प्रतिवस्तूपमामाह तोयेष्विति । पङ्कजिनी[illegible] लवलेशकणाणवः इत्यमरः ।

४३ । स्वधर्मं न अत्याचरत् स्वधर्ममतिक्रम्य न [illegible] । जाति धर्मं कोकिलसामान्यस्य नियमम् ।

४४ । कलङ्ककलुषा लोकनिन्दया मलिना अमी बा[illegible] एव पङ्के पापे निपातयन्तो न विरता बभूवुः परन्तु अन्यानपि स्थितिमतो मर्यादाशालिनो बालान् सम्पातयामासुः धाराहताः वृष्टिधारया विश्लेषिताः पर्वतस्य प्रस्तरा यथा स्खलन्तः पतन्तः सन्तः स्थितिमतः स्थैर्यशालिनो-ऽन्यानपि तरुप्रभृतीन् पाषाणान् वा पातयन्ति तद्वदिति भावः ।

वादे परं परमपि द्रविणैर्विलोभ्य ।
अग्राहयन्निजमतं त इमेऽभ्युपायैः
को नेच्छति स्वगणवृद्धिमभीष्टसिद्ध्यै ॥ ४५ ॥
भूदेवमार्य[illegible]स्तु कयापि गत्या
धीरं न तं [illegible] बहवोऽपि शेकुः ।
[illegible] निपातयन्तः
[illegible] क्रमन्ते ॥ ४६ ॥
[illegible]
[illegible] ।
[illegible]
[illegible] ॥ ४७ ॥
[illegible]
नान्वग् ययौ द्विजसुतो [illegible] न्यमाङ्क्षीत् ।
रक्षंस्तु [illegible] प्रतीपम्
मीनावतार [illegible] विष्णोः ॥ ४८ ॥

---

४५ । विस्माय्येति । उपहासवाक्येन एकान्तेनेत्यर्थः । कञ्चित् बालं विस्माय्य [illegible] भं कृत्वेति यावत् । अपरं वादे धर्मविचारे विजित्य [illegible] ष्टान्नादिभिर्द्रव्यैस्तन्मूल्यैर्वा विलोभ्य इत्थं नाना- [illegible] स्वमतं तान् अग्राहयन् । अत्रार्थान्तरन्यासः । [illegible] भीष्टस्य स्वमतवृद्धेः सिद्ध्यैइत्यर्थः ।

[illegible] न्यभ्युपायेन, तथा च मेदिनी गतिः स्त्रीमार्गदशयो- [illegible] रिति । मनागपि ईषदपि ।

४७ । [illegible] चतुरो बुद्धिमान् । उन्नता आशा यस्य स उन्नताशः । [illegible] अन्तरायान् विघ्नान् । भोगान् उपभोगसाधनानि विषवत् तत्याज च ।

४८ । चरितस्य सच्चरित्रस्य प्रलयो विनाशः तस्य प्रवाहे स्रोतसि तीव्रेऽपि प्रखरेऽपि स द्विजसुतो भूदेवो न अन्वग् ययौ अधोऽपससार । न च न्यमाङ्क्षीत् निमग्नोऽभूत् । तु परन्तु वेदसमयान् वेदाचारान् रक्षन् सन् प्रतीपं प्रतिस्रोतः विपरीतमिति यावत् । अतरत् सन्ततार ।

तेषां दुष्टधियां प्रवर्तनवशाद् भूदेवशर्मा क्वचित्
खीष्टीयं मतमस्मरद् यदि तदाप्यालोकतेवाग्रतः ।
उद्बाष्पां जननीं निवारणपरां स्नेहाद् गृहीत्वा करे
तातं धर्ममयं च शासतमिव क्षुण्णां सृतिं प्राक्तनैः ॥ ४६ ॥

इति श्रीमहेशचन्द्रकृतौ भूदेवचरिते काव्ये इंरेजीभाषा-
ध्ययनं नाम सप्तमः सर्गः ॥ ७ ॥

अष्टमः सर्गः ।

इंरेजीभाषाध्ययनम् ।

भूदेवोऽधीतिकाले [illegible] नियोजितः ।
बालोऽपि [illegible]यामास यजमानान् क्वचित् क्वचित् ॥ १ ॥
नित्ये कर्मणि युक्तश्च पौरोहित्येऽपि योजितः ।
धर्मे जातदृढश्रद्धो गुरुणा परवानभूत् ॥ २ ॥
ब्राह्मणस्य दरिद्रस्य पण्डितस्य स आत्मजः ।
आसीद्भोगविलासेभ्यः प्रकृत्यैव पराङ्मुखः ॥ ३ ॥

सागरवारि सागरस्य जले विष्णोर्मत्स्यावतार इव इत्यर्थः ।
वार्वारीत्यमरः ।

४९ । दुष्टं ध्यायन्तीति दुष्टधियः अथवा दुष्टा धीर्येषां त[illegible] गायिनां प्रवर्तन-
वशात् प्ररोचनायत्तत्वात् यदि क्वचित् कदाचित् खीष्टीय[illegible] रस्मरत्
चिन्तयामास तदापि किमुत जिघृक्षाकाले इत्यर्थः । अग्रतः सम्मुखे उद्बाष्पां
उद्गताश्रुं मातरमालोकतेव अपश्यदिव । कीदृशीं मातरं स्नेहात्
वात्सल्यात् करे गृहीत्वा निवारणपरां निवारयन्तीं धर्ममयं धर्मात्मकं
तातं पितरं च अग्रतः आलोकतेव, कीदृशं प्राक्तनैः पूर्वपुरुषैः पितृ-
पितामहादिभिः क्षुण्णां प्रहतां सृतिं पन्थानं शासतमुपदिशन्तमिवेत्यर्थः ।
भूदेवशब्दचिह्नितः सप्तमः सर्गः ॥

३ । प्रकृत्यैव स्वभावेनैव अथवा कारणेनैव पराङ्मुख आसीत्, तथाच
मेदिनी प्रकृतिर्गुणसाम्ये स्यादमायादिस्वभावयोः । यौनो लिङ्गे

दरिद्रतनयस्यास्य धनिपुत्रैश्च सङ्गतम् ।
नायुज्यैतावजानद्भिर्योग्यं योग्येन युज्यते ॥ ४ ॥
प्रभुत्वविरहादित्थं धनस्य च विपर्ययात् ।
विवेकस्य च सद्भावादनर्थस्तस्य नाजनि ॥ ५ ॥
कं विदध्यादनर्थं वा तस्यैकाकि तु यौवनम् ।
तापितं ब्रह्मचर्येण दग्धं बीजमिवाफलम् ॥ ६ ॥
स्थूलेनाशनजातेन स्थूलेनाच्छादनेन च ।
[illegible]थञ्चिद् वर्त्तमानोऽसौ [illegible]पे विद्यार्जनं तपः ॥ ७ ॥
विद्या[illegible]यसनयोगाय मध्या[illegible]ऽपि द्विजात्मजः ।
नाभुङ्क्तो[illegible]पूरं स योगीव मितभोजनः ॥ ८ ॥
जागराय निशायां च विद्या[illegible]यसनहेतवे ।
श[illegible] " [illegible] दुग्धपक्वमभुङ्क्त सः ॥ ९ ॥
अधीतिरेव च्छात्राणां परम[illegible]च्यते ।
न सिध्यत्यन्यथा विद्या तत्तपश्चरणं विना ॥ १० ॥
लक्ष्मीः सिध्यति लोकानां छलेन च बलेन च ।
सरस्वती तु तपसा विना नैव प्रसीदति ॥ ११ ॥
अतोऽतप्यत भूदेवो विद्याभ्यासं महत्तपः ।
दुःखं नाजीगणत्तत्र क्व दुःखेन विना सुखम् ॥ १२ ॥
जलोपयोगहोरायां युक्ता अन्ये ततस्ततः ।

इति । [illegible]णपण्डितस्य आत्मजत्वं भोगविलासेभ्यः पराङ्मुखी-
[illegible]व कारणमिति भावः ।

[illegible] । ननु "यौवनं धनसम्पत्तिः प्रभुत्वमविवेकता । एकैकमप्यनर्थाय किमु तत्र चतुष्टयं" इति व्यासेनोक्तस्यानर्थकारणस्य यौवनस्य प्रादुर्भावात् कथं तस्यानर्थो नाजनि इत्याशङ्क्याह प्रभुत्वविरहादिति । पितुः पराधीनतया प्रभुत्वाभावः । दरिद्रपुत्रतया धनविपर्ययो धनाभावः । अविवेकतायाः प्रतिबन्धकस्य विवेकस्य च सत्त्वात् अनर्थस्यासद्भाव इति भावः ।

१० । उच्यते शास्त्रकारैरिति शेषः । तथा च शास्त्रम् "छात्राणामध्ययनं तपः" इति ।

भुक्तपीता यदाच्छात्रा चिक्रीडुः काममुद्धताः ॥ १३ ॥
भूदेवस्तु तदाप्यासीदध्याये युक्तमानसः ।
क्षुधं तृष्णां च विस्मृत्य त्यक्त्वा चान्यद्विनोदनम् ॥ १४ ॥
तपोऽनुरोधाद् भूदेवो लोभं तत्याज सर्वथा ।
मिष्टान्नमप्युपनतं व्यावर्त्तयदनादरात् ॥ १५ ॥
"दास्यत्यस्य पिता मूल्यं [illegible] ।
इत्य[illegible] ॥ १६ ॥
[illegible] निन्दुर[illegible]
भूदेवस्य [illegible] ॥ १७ ॥
दोष[illegible] न्ध[illegible] ।
[illegible] रयन्[illegible]जत्पदात् ॥ १८ ॥
गुणा[illegible]
तथा [illegible] वर्द्धयत ॥ १९ ॥
सत[illegible] तस्य [illegible] ।
सौरभा[illegible] पद्मस्येव रवेर्महः ॥ २० ॥
मध्यं कृशतरं तस्य वक्षो व्यूढतरं क्रमात् ।
अखर्ववपुषः पर्वाण्यासन् गूढतराणि च ॥ २१ ॥

---

१३ । होरा राश्यर्द्धभागः । अत्र तु लक्षणया सूर्यस्य राश्यर्द्धभाग[illegible] कालो बोद्धव्यः तथा च सार्द्धदण्डद्वयात्मकः [illegible] इत्यर्थः । जलोपयोगहोरायां जलपाना[illegible] मिति यावत् ।

१५ । उपनतमुपस्थितम् ।

१८ । दोषपिच्छिलमपि पिच्छिलस्थानवद्दोषका[illegible] संस्कारदण्डं संस्कार एव मया इदमेव [illegible] मित्यादिरूपो निश्चय एव दण्डो यष्टिस्तं धारयन् पदाद्धर्माधिकारान् स्खलित इत्यर्थः ।

१९ । प्रत्युत पक्षान्तरे तस्य नवं यौवनं गुणानेवाकर्षज्जनयामास । अध्ययनं काममभिलाषं शक्तिं सामर्थ्यं च वर्द्धयामास इत्यर्थः ।

२१ । व्यूढतरं पूर्वापेक्षयापि संहतं पृथुलं वा, पर्वाणि ग्रन्थयः ।

तस्य रोषणपाषाणघृष्टं हेमेव कान्तिमत् ।
गात्रं स्निग्धतरं चासीद् यौवनेन परिष्कृतम् ॥ २२ ॥
अलक्ष्यतोदरे तस्य रेखा रोम्नामुरस्यपि ।
हेम्नि मारकतीवाभा श्मश्रुराजिस्तथानने ॥ २३ ॥
दिदृक्षू इव लावण्य लक्ष्मीं दीर्घतरे दृशौ ।
अपाङ्गयोररज्येतां विनैव मदविक्रियाम् ॥ २४ ॥
विद्याभ्यासतपःकष्टक्लिष्टस्यापि विधूपमम् ।
अदृश्यत सदा तस्य [illegible]स्मितमिवाननम् ॥ २५ ॥
इत्थं लक्ष्मीसरस्वत्यौ सप[illegible]ावपि तस्य तत् ।
मुखं लाव[illegible]पीयूषलोभादिव चुचुम्बतुः ॥ २६ ॥
परीक्षां सं तथा[illegible]ीत् सरस्वत्या प्रसादतः ।
[illegible]याः पञ्चमीं श्रे[illegible] मदर्का[illegible] यथैकदा ॥ २७ ॥
सोपानादिव सोपान[illegible] [illegible]श्रेणीं यथोत्तरम् ।
उत्कृष्यन्ते समुत्तीर्णाश्छात्रा इत्युन्नति[illegible]ः ॥ २८ ॥
भूदेवस्तु तमुल्लङ्घ्य क्रमं ब्राह्मणनन्दनः ।
त्रिविक्रम इव प्रांशुर्द्विगुणामुन्नतिं ययौ ॥ २९ ॥
धीमान् हिन्दुकलेजं स यत्राब्दे प्राविशत्ततः ।
परत्रैवोत्तताराब्दे परीक्षां वार्षिकीं तथा ॥ ३० ॥
दत्त्वा परीक्षां सप्तम्याः श्रेण्याः षष्ठीं विलङ्घ्य सः ।
श्रेणीमेकपदे प्राप पञ्चमीं यत्तदद्भुतम् ॥ ३१ ॥
[illegible]छात्रास्तेन सहोन्नताः ।
[illegible]दत्ताद्याः पञ्चमीं श्रेणिमुद्ययुः ॥ ३२ ॥
अधीयानस्य पञ्चम्यां श्रेण्यां तस्य प्रसेदुषी ।
इंलिश्भाषा स्फुरद्धासा चुचुम्ब वदनाम्बुजम् ॥ ३३ ॥

---

२२ । रोषणपाषाणः स्वर्णकाराणां चाकचक्यजनकः प्रस्तरविशेषः । परिष्कृतमलङ्कृतम् ।

२८ । यथोत्तरं उत्तरमनतिक्रम्य उपरिगतांश्रेणीमिति फलितार्थः ।

३३ । यथा प्रसेदुषी प्रीतिमती काचित् स्त्री हसन्ती सती नायकस्य पुत्रस्य वा मुखं चुम्बति तथा प्रसेदुषी प्रसादगुणविशिष्टा इंलिश्भाषा हासमिव प्रकाशं गता तस्य भूदेवस्य मुखं चुचुम्ब पस्पर्शेत्यर्थः ।

संवादपत्र-मूर्त्या सा प्रैवेद् अब्जारवारिति ।
प्रकाशमाना ददृशे भूदेवस्यास्यचुम्बिनी ॥ ३४ ॥
संवादपत्रमर्थात्तद् रहस्यपरिदर्शकम् ।
भूदेवेन प्रणीतं च लि[illegible]तं च स्वपाणिना ॥ ३५ ॥
अशक्तस्तन्मुद्रयितुं त[illegible] [illegible] करोत् सः ।
स्वयमेवालिखत्तेन [illegible] स्वयमेव च ॥ ३६ ॥
सश्रेणिगेभ्यश्छा[illegible] [illegible] [illegible] ।
ददौ संवादपत्रं त[illegible] [illegible] क्रमात् ॥ [illegible] ॥
एकेन दृष्टमितरस्तेन [illegible] परः ।
इति क्रमेण तेऽपश्य[illegible] पत्रं [illegible] तत् ॥ [illegible] ॥
अध्यगीषत तत्प[illegible] [illegible] लम् [illegible]
उच्चिन्वन्ति हि [illegible]
इंलिश्भाषा प्र[illegible] [illegible] ।
लक्ष्मी[illegible] [illegible] स[illegible]ङ्गानि[illegible] ॥ ४० ॥
तस्य रू[illegible] दृष्ट्वा विद्यार्थं चानुरागिताम् ।
कन्यावन्तो द्विजास्तस्मै स्पृहयामासुरात्मना ॥ ४१ ॥
वरार्थिनां कथा का वा ये रूपगुणकाङ्क्षिणः ।
विरुद्धा अपि तस्यासन् रूपं दृष्ट्वा [illegible] ॥ [illegible] ॥
पुमान् सिमिलियान् नाम वृटिश[illegible] [illegible] तम् ।
आलोक्य भिन्नधर्मापि च[illegible] [illegible]नि ॥ ४३ ॥
प्रायेण वृटिशो विज्ञा अपि [illegible]
आत्मनो गौरवर्णत्वादार्यवंश्यान् हि [illegible]
तथैव श्यामवर्णत्वादार्य[illegible] [illegible] ।

---

३७ । सश्रेणिगेभ्यः समानां श्रेणिं प्राप्तेभ्यः । अथवा स भूदेव[illegible] इ. पृथक् पदद्वयम् ।

४० । इत्थं संवादपत्ररूपेण प्रसन्ना प्रसादगुणान्विता इंलिश्भाषा तस्य कण्ठवलम्बिनी कण्ठाश्रिता बभूव, अत्रापि नायिकाव्यवहारारोपो बोद्धव्यः लक्ष्मीः सौन्दर्यसम्पत्तु तस्य सर्वाण्यङ्गानि व्यापेत्यर्थः । अत्रा समासोक्तिः ।

४४ । वेदर्बाहिष्कृतानपि आत्मनः स्वान् आर्य्यवंश्यान् मन्वते जानन्ति ।

भारतस्थायिनो विप्राननार्य्यानेव मन्वते ॥ ४५ ॥
तच्छ्रुत्वा सिभिलियान् सोऽपि विप्रान् भारतवासिनः ।
मनसामन्यतानार्य्यान् वचसोपजहास च ॥ ४६ ॥
अत्रत्यं सुहृदं कश्चित्कदाचित्स सिभीलियान् ।
वादानुवादरसिकः यदुवाच तदुच्यते ॥ ४७ ॥
वयमार्य्या इति ब्रूत [illegible]द् यूयं तन्न तात्त्विकम् ।
तथाह्यन्यत्र भूदेवान् [illegible]स्मास्वार्य्यलक्षणम् ॥ ४८ ॥
[illegible]कस्मिन्नेव भूदेव आर्य[illegible]क्षणमीक्ष्यते ।
आक[illegible]रतश्च स प्रांशुरव[illegible]तश्च वर्णतः ॥ ४९ ॥
इत्थं तुष्टा[illegible] भूदेवं निन्दन्न[illegible]पि स भूसुरान् ।
परवानिव कान्त्य[illegible] च तस्या[illegible]कृत्या च दिव्यया ॥ ५० ॥
दृष्ट्वा [illegible] यौवनश्रियम् ।
भूदेवस्याभवन्मुग्धाः श्राभ[illegible]परे तु किम् ॥ ५१ ॥
कलिकातापुरीरत्नं ठक्कुरोपाधिकोऽस्ति यः ।
विप्रवंशो धनज्ञानदानमानगुणोज्ज्वलः ॥ ५२ ॥
तस्यावतंसो वंशस्य महाढ्यः कोऽपि ठक्कुरः ।
द्रष्टुं हिन्दुकलेजं तदेकदा समुपागमत् ॥ ५३ ॥
श्रेण्याः श्रेणीं परिक्रम्य सर्वांश्छात्रान्निरूपयन् ।
भूदेवं पञ्चमश्रेण्यां सोऽपश्यद्देवसन्निभम् ॥ ५४ ॥
तं दृष्ट्वा विस्मित इव धीमन्तं नवयौवनम् ।
ठ[illegible]च्छ नाम गोत्रं च वेश्म च ॥ ५५ ॥
[illegible]र्वं ततो ज्ञात्वा शिक्षकेभ्यः स ठक्कुरः ।
विद्याभ्यासस्य योग्यत्वं चरितं चाशृणोच्छुचि ॥ ५६ ॥

४५। आर्य्यवंशभवानपि भारतस्थान् विप्रान् अनार्य्यानेव मन्यन्ते इत्यर्थः ।

४७। अत्रत्यं अत्र भारतवर्षे भवम् ।

४८। वयमार्य्या आर्य्यवंश्या इति यत् यूयं ब्रूथ तत् तात्त्विकं सत्यं न भवतीति शेषः ।

४९। आकारतः आकारेण प्रांशुर्दीर्घः । वर्णतो वर्णेन अवदातो गौर इत्यर्थः ।

५६। ततो भूदेवात् पृष्टं जिज्ञासितं सर्वं ज्ञात्वा तस्य शिक्षकेभ्यस्तस्य विद्याभ्यासयोग्यतां शुचि पवित्रं चरितं च अशृणोदित्यर्थः ।

इत्थं रूपगुणान् ज्ञात्वा यौवनं च नवोदयम् ।
कन्यारत्नप्रदानस्य सत्पात्रं तममन्यत ॥ ५७ ॥
अप्सरस्तुल्यरूपाया भूदेवं देवरूपिणम् ।
वरं स्वदुहितुर्योग्यं मनसाकल[illegible]सुधीः ॥ ५८ ॥
स्वजनेभ्यो विवेकिभ्यः पा[illegible] [illegible] ।
कन्या तदास्मै देयेति त[illegible] [illegible]गतिः ॥ ५९ ॥
ततश्छलेन भूदेवं म[illegible]र्शयितुं [illegible] ।
आनेतुं तत्सखा[illegible] सादरं [illegible] ॥ ६० ॥
ते भूदेवं प्रि[illegible] [illegible] पियं[illegible] ।
ठक्कुरस्य[illegible] तस्य [illegible] ॥ ६१ ॥
अविद्वानेव [illegible] [illegible] ।
शुद्ध[illegible] [illegible] ॥ ६२ ॥
अथ भूदेव[illegible] [illegible] ठक्कुर[illegible] ।
प्रीतः [illegible] जनानुज्ञे तेना[illegible] [illegible]सुकान ॥ ६३
अन्तःपुरपुर[illegible] भूदेवस्यान्त[illegible] ।
निरूप्य [illegible] रूपं ममज्जे प्रीतिसागरे ॥ ६४ ॥
मधुरं भाषितं श्रुत्वा वैदग्ध्यविनयान्वितम् ।
स्वजनाः सकलास्तस्य सुखमभ्यभवन् पर[illegible] ॥ ६५ ॥
आसन्नां रजनीं दृष्ट्वा गृहं गन्तुं कृतत्वरः ।
मुहूर्तं तद्गृहे स्थित्वा भूदेवः स [illegible] ॥ [illegible]

---

५९ । पात्रं कन्यादानस्य वरः स्वजनेभ्य आत्मीयेभ्यो [illegible] [illegible]युक्तेभ्यो यदि रोचते तेषामपि मतो भ[illegible] [illegible] तदा अस्मै कन्या देया[illegible] मनोगतिरभिप्रायः ।

६० । वरं रमणीयं जामातरम् । तस्य सखीन् सुहृदः ।

६१ । आश्रवं वचने स्थितम् ।

६२ । अविद्वानेव अजानन्नेव । सख्यस्य सौहार्दस्य अनुरोधात् ।

६३ । आलपितुं आलापं कर्तुम् ।

६४ । अन्तरालतः व्यवधानतः ।

६५ । विदग्धस्य भावो वैदग्ध्यं तच्च विनयश्च ताभ्यामन्वितं युक्तम् ।

अथ गत्वालयं मात्रे स सर्व्वं स्पष्टमब्रवीत् ।
नाथं श्रीविश्वनाथं साऽप्यवोचत् सुव्रता रहः ॥ ६७ ॥
ठक्कुरस्याभिसन्धिं तं दूरदर्शी विचक्षणः ।
वितर्क्यापि सुखं किञ्चिन्नोवाच तर्कभूषणः ॥ ६८ ॥
एकदा ठक्कुरः सोऽथ स्वसङ्कल्पस्य सिद्धये ।
दूतं संप्रेषयामास भूदेवपितुरन्तिकम् ॥ ६९ ॥
स कार्य्यकुशलम्मन्यो [illegible]तोऽगच्छत् कृतत्वरः ।
[illegible]श्वनाथं समुद्दिश्य स[illegible]ज्ञानानन्दमन्दिरम् ॥ ७० ॥
अथा[illegible]य गृहं श्रीमद्विश्व[illegible]थं यथाविधि ।
विनयावनत[illegible] ततो नत्वाऽतिष्ठच्छुभाशयः ॥ ७१ ॥
विलोक्य विश्वना[illegible]स्तं ब्राह्मणं गृहमागतम् ।
यथाविधि [illegible] सम्यगासने ॥ ७२ ॥
परिश्रमः किमर्थोऽयं क्षुद्रे पर्णा[illegible] मम ।
निवेद्यो यदि सद्विप्र तदा साधु निवेद्य[illegible]म् ॥ ७३ ॥
उक्तवत्येवमानम्रे विबुधे तर्कभूषणे ।
दूतः कृतार्थम्मन्यः स हृष्टो मधुरमब्रवीत् ॥ ७४ ॥
दूतोऽहं प्रेषितो धीमन् श्रुतशीलवते स्वयम् ।
त्वत्सुताय सुतां दातुं ठक्कुरेण सतेच्छता ॥ ७५ ॥
श्रीमतोऽलङ्कृतं यद्वत् श्रिया वाचा च तत् कुलम् ।
[illegible]स्यापि तद्वत् [illegible] वक्तव्यं किमितोऽधिकम् ॥ ७६ ॥

---

६७ । [illegible]ता एकपत्नीव्रतं सुष्ठु कुर्व्वतीत्यर्थः ।

६८ । अभिसन्धिं आशयम् । वितर्क्य उन्नीय । सुखमनायासेन ।

६९ । अन्तिकं समीपे ।

७० । सतो ज्ञानस्य आनन्दस्य च मन्दिरं गृहमिव विश्वनाथं तदाख्यं भूदेव-पितरं अन्यत्र सच्चिदानन्दमयं विश्वनाथं विश्वप्रभुम् ।

७२ । आसयत् उपावेशयत् ।

७३ । क्षुद्रे पर्णालये पर्णनिर्म्मिते क्षुद्रगृहे ।

७४ । आ सम्यग् नम्रे नते विनीते ।

७६ । श्रिया लक्ष्म्या कान्त्या च । वाचा विद्यया मधुरवचनेन च ।

ख्यातयोः कुलयोर्लोके यशसा विद्यया श्रिया ।
ख्यातयोः श्रीमतोः श्लाघ्यः सम्बन्धः सर्व्वथोचितः ॥७७॥
निशा यथा शशाङ्केन शङ्करेण शिवा यथा ।
हरिणा श्रीर्यथा तद्वत् त्वत्सुतेनास्तु तत्सुता ॥ ७८ ॥
विबुधस्तव पुत्रोऽसौ भूदेवो देवसन्निभः ।
श्रीप्रज्ञागुणनाम्नीर्ब्बिद्... [illegible] ॥ ७९ ॥
शुचिव्रता तत्सुतापि श्रीविद्याशील... [illegible] ।
अस्ति योग्यगुणेति ... [illegible] ... ॥ ८० ॥
एवं निगद्य विरते ... [illegible] ... भिधातरि ।
स्मयमानोऽब्रवीत् स ... [illegible] ॥ ८१ ॥
सत्यं त्वयेनं दौत्यं ... जाने ... विश्रुतम् ।
श्रीविद्याभूषि... [illegible] ॥ ८२ ॥
विद्यानुरागि... [illegible] ... यद्गुहे ।
... [illegible] ... ख्यातिप्रतिभा द्विज ॥ ८३ ॥
शु... [illegible] ...मय्यः श्रीविद्याशीलसेविताः ।
... [illegible] ... सदा ... राजन्ते कमला इव ॥ ८४ ॥
... [illegible] ... सुशीला ... [illegible] ...लिने ।
... [illegible] ... दित्सवः कन्यां यतन्ते तत्कुलोद्भवाः ॥ ८५ ॥

७७ । ... प्रशंसनीयः ।

७८ । त्वत्सुतेन भवत्पुत्रेण भूदेवेन, तनया इत्यर्थः ।

७९ । देवसन्निभः देवोपमः ।

८० । शुचिव्रता पवित्रव्रतनिरता इत्यर्थः ।

८१ । अभिदधातीति अभिधाता सतः अभिधा... [illegible] ... सन्नभिधाता तस्मिन् सद्वक्तरीत्यर्थः । स्म... [illegible]

८२ । दौत्यञ्च दूतकर्म्मञ्च । प्रख्यातिं प्रसिद्धिं आगतं प्राप्तम् ।

८३ । अवज्ञाता तिरस्कृता गीष्पतेः सुराचार्य्यस्य प्रतिभा यैस्ते तथोक्ताः ।

८४ । शुचिव्रताः पवित्रव्रतरताः, दयामय्यः कृपाप्रचुराः, श्रीः सम्पत् कान्तिश्च विद्या ज्ञानं शीलं सद्वृत्तं तैः सेविता विभूषिताः ।

८५ । दित्सवः दातुमिच्छवः । तत्कुलोद्भवाः ठक्कुरवंशजाः ।

एतच्च ज्ञायते विप्र ख्यातं तस्य कुलं महत् ।
विशेषतो वदान्यत्वं न जहाति कदाप्यहो ॥ ८६ ॥
वराय भूमिरत्नाश्वरथशय्यादियौतकाः ।
महार्हाः संप्रदीयन्ते निलयाश्च नभःस्पृशः ॥ ८७ ॥
पिरालिवंशसम्भूतैस्तैस्तथापि न युज्यते ।
एतत्कुलप्रथातो हि सम्बन्धोऽस्माकमीदृशः ॥ ८८ ॥
*वचनैरेवमन्यैश्च तेजस्वी तर्कभूषणः ।
प्रत्याख्यायैव सम्बन्धं तं दूतं निराकरोत् ॥ ८९ ॥
प्रत्याख्यातोऽथ दूतः स प्रत्यावृत्य ततः सुधीः ।
न्यवेदयदिदं सर्वं ठक्कुराय यथानयम् ॥ ९० ॥
विधेर्नियोगतः प्रश्चा[illegible]स्तर्कभूषणः ।
धर्म्ये [illegible] [illegible]मिष्टमथार्पयत् ॥ ९१ ॥
ततोऽन्विष्याभिजातस्य विप्रस्य शुद्धचेतसः ।
चट्टोपाध्यायवंश्यस्य श्रीपञ्चाननशर्म्मणः ॥ ९२ ॥
कन्यां लक्षणसम्पन्नां सुशीलां सद्गुणोज्ज्वलाम् ।
समं स स्वजनैः प्रीत्या भूदेवेनोदवाहयत् ॥ ९३ ॥

८६ । वदान्यत्वं दातृत्वं दानशक्तिरितियावत् ।

८७ । [illegible]र्हाः । नभः स्पृशन्तीति नभःस्पृशः विशाला निलयाः प्रासादा इत्यर्थः ।

[illegible] ईदृशः [illegible]

८९ । [illegible] [illegible]नाबध्य ।

९० । प्रत्यावृत्य परागत्य ।

९१ । अथ ठक्कुरेण सह सम्बन्धप्रत्याख्यानानन्तरं श्रीविश्वनाथतर्कभूषणो विधेर्नियोगात् विधेः प्रेरणातः भवितव्यतात इति यावत् । धर्म्ये धर्म्मादनपेते । इष्टं हितोन्मुखम् । आर्पयत् न्ययोजयत् ।

९२-९३ । ततः चित्तनियोजनानन्तरम् । अभिजातस्य कुलीनस्य । चट्टोपाध्यायवंश्यस्य तदाख्यवंशजातस्य शुद्धचेतसः निर्म्मलचित्तस्य विप्रस्य सद्ब्राह्मणस्य लक्षणसम्पन्नां शुभलक्षणयुक्तां सुशीलां चरित्रवतीं सद्गुणोज्ज्वलां सद्गुणोपेतां ।

* स्वजनेत्यादि-दवाहयदित्यन्ताः (५९—९३) श्लोकाः केनचिद्

एलोकेशीति युक्ताख्या स नीलालुलितालका ।
अयस्कान्तमणीवायः सद्यः पत्युर्मनोऽहरत् ॥ ६४ ॥
भूदेवस्य विवाहमङ्गलविधिः सोऽभूद्यथा प्रीतिदः
स्वग्रन्थे ननु पारिवारिकसदा[illegible]प्र[illegible] तथा ।
तेनैव स्वयमभ्यधा[illegible] [illegible] भूय[illegible] मया [illegible]र्यते
प्रीतेः स्वानुभवैकगोचरत[illegible] [illegible] स्वोक्तिः प्रमाणं दृढम् ॥ ६५ ॥

इति श्रीमहे[illegible]न्द्रकृते भूदे[illegible] [illegible]रिते काव्ये [illegible]िभ[illegible]
[illegible]यवर्णनं [illegible] [illegible]ष्टमः सर्गः ॥

[illegible]

[illegible] सर्गः ।

[illegible]वयनम् ।

[illegible]ता[illegible]दि भूदेवो न[illegible] [illegible]वर्णिनीम् ।
व[illegible] [illegible] श्वशुरागारवासिनीम् ॥ १ ॥

[illegible] [illegible]ाजता; ।

[illegible] [illegible], [illegible]देवेनोद्वाह[illegible] [illegible] [illegible]यन्तप्रयोजक [illegible] [illegible]स्थ[illegible] [illegible] [illegible] प्रयोग [illegible]कतुर्न [illegible]

९४ । नीलाश्च ते आ[illegible] [illegible] [illegible] सा तादृशी अतएव एलोके[illegible] युक्त[illegible] [illegible] नाम यस्याः सा तादृशी । अयस्कान्तमणीवेत्यत्र अय[illegible] [illegible] मणी अयस्कान्तमणी म[illegible]शब्दस्य वैकल्पिकस्त्रीत्वं [illegible] [illegible] तथा च रत्नं मणिर्द्वयोरश्मजातौ मुक्तादिकेऽपि चेति अमरः । एवं च उपमानोपमेययोर्भिन्नलिङ्गतादोषश्च परिहृतः ।

९५ । प्रीतेः स्वानुभवेत्यादिरर्थान्तरन्यासः । प्रीतेः आत्मन एव अनुभवमात्रस्य अनुव्यवसायस्य केवलस्य विषयः न तु अन्यस्य अतः कारणात् स्वोक्तिरेव प्रीतेर्दृढम् प्रमाणम् इत्यतो मया विवाहमङ्गलविधेः प्रीतिदत्वं न वर्णितम् इति भावः ।

१ । वर्णीव ब्रह्मचारीव, वर्णिनो ब्रह्मचारिण इत्यमरः, वरवर्णिनीमुत्तमां वधूं पत्नीं

अविप्लुतब्रह्मचर्यो यौवनेऽपि समाहितः ।
विद्यामेव तपस्तेपे स युक्तशयनाशनः ॥ २ ॥
षोड़शग्रासमात्रं स हविष्यं बुभुजे दिवा ।
सागोशस्यञ्च यत्किञ्चिद्यामिनीं दुग्धसंस्कृतम् ॥ ३ ॥
लघ्वाहारो लघुस्वप्नो लघुहस्तोऽन्यकर्म्मसु ।
स लेभे योग्यतां कर्तुं शास्त्रचिन्तां गरीयसीम् ॥ ४ ॥
दृष्टिर्भृङ्गीव पुष्पेषु ग्रन्थे[illegible] समसृज्यत ।
त[illegible] धीश्च तदर्थेषु मधु [illegible]व निरन्तरम् ॥ ५ ॥
सोऽधीत्य केवलान् पाठ्या[illegible] ग्रन्थान्नैव न्यवर्तत ।
प्रतितिष्ठति [illegible] क्वापि प्रार्थ[illegible]ोत्सर्पिणी सताम् ॥ ६ ॥
[illegible]नतानुन्नतान् ग्र[illegible]न् दिद[illegible]ुरपि नाप सः ।
उत्थाय हृ[illegible] [illegible]णां मनोरथाः ॥ ७ ॥
तथापि ग्रन्थवणिजे यावदध्ययनं [illegible] ।
एकस्मै धारयित्वाऽसौ ग्रन्थानपठदाहृत[illegible]न् ॥ ८ ॥
स हि ग्रन्थवणिक् तस्य विप्रपुत्रस्य सूनृतैः [illegible]
श्रिया च वशमापेदे कः परः प्रियवादिनाम् ॥ ९
मधुसूदनदेनामा विप्रभक्तः स वाणिजः ।

[illegible] [illegible]पि किमुत दहेन नायु[illegible] न [illegible] न सस्मार इतिभावः।
२। अविप्लुतमखण्डितं ब्रह्मचर्य्यं [illegible] [illegible]ावो यस्य सोऽविप्लुतब्रह्मचर्यः, [illegible] [illegible]तः। युक्तशयनाशनः युक्तं मितं शयनं निद्रा [illegible] [illegible]ञ्च यस्य तादृशः ।
३। य[illegible]ना सर्वां रात्रिं व्याप्येत्यर्थः । सागो सबुदाने[illegible] भाषा ।
४। लघ्वाहारादिकं गरीयःशास्त्रचिन्ताया हेतुः अभूत् इति कार्य्यकारणयोर्विरोधाभासः ।
६। उत्सार्पिणी उद्गमनशीला सतां प्रार्थना कुत्रापि स्थाने न प्रतितिष्ठति प्रतिष्ठां लभते सक्ता सती नावतिष्ठति इति भावः—ततोऽपि उच्चैर्धावतीति फलितार्थः ।
८। धारयित्वा ऋणं कृत्वा ग्रन्थानाहृत्य अपठादित्यर्थः "धाधुर्धारयतेः" इत्यनेन चतुर्थी ।
९। सूनृतैः प्रियसत्यवचनैः, श्रिया शरीरका[illegible]

अकस्मादिव तस्यासीत् क्रीतदास इवाभवः ॥ १० ॥
भूदेवो वणिजस्तस्य प्रापदापणमेकदा ।
वृत्तिशब्दाभिधानस्य क्रयार्थं महतः स्वयम् ॥ ११ ॥
पितरं मातरं वापि नार्थ[illegible]त स तत्पणम् ।
जानन् स्वगृहदारिद्र्यं [illegible] तयोऽर्थनाम् ॥ १२ ॥
स्वयं सञ्चित[illegible] प्राप्ता [illegible] ।
कला दश च [illegible] ॥ १३ ॥
तस्यैव ग्रन्थविक्रेतु[illegible] पुरो[illegible] ।
गत्वैकमभिधान[illegible] ॥ १४ ॥
विप्रमालोक्य [illegible]
उपवेश्यासने [illegible]
स सर्वाण्यभिधानानि [illegible]
[illegible] कोशमेक[illegible]
[illegible] याचमाने [illegible] ।
[illegible] तस्मै [illegible] ॥ १७ ॥
[illegible] सर्व[illegible] तदिदं मम ।
[illegible] मत्रैव मे [illegible] ॥
[illegible] तद्वचनम् ।
[illegible] पुनरब्रवी[illegible]
[illegible] ऽध्यसि बाल[illegible]
[illegible] यदेव भाषसे ।

---

१० । वणिजो [illegible] नैगमो [illegible] वणिक इत्य[illegible] [illegible] वचने स्थित इत्यमरः ।

१२ । ततः पितुर्मातुश्च [illegible] ।

१३ । कला रजतस्य [illegible] भागः, कला [illegible]मितिख्याता दश [illegible] कानि द्वे च रजते इत्यर्थः ।

१६ । कोशं शब्दाभिधानग्रन्थमित्यर्थः ।

१७ । मधौ मधुसूदने क्वचिदेकस्य ग्रहणेऽपि समुदायस्य ग्रहणं—यथा भीमो भीमसेनः, तद्वदत्रापि ।

२० । सनिर्बन्धम् आग्रहेण सह वर्तमानम् ।

चतुर्भ्यो रजतेभ्यश्चेन्न्यूनेन लभसे क्वचित् ।
ग्रन्थमेनं तदा तुभ्यं नूनं दास्याम्यृते पणम् ॥ २१ ॥
याचस्व विपणीः सर्वाः सर्वानप्यापणानिह ।
सत्यं मयोक्तं मिथ्या वा ततो मे कथयिष्यसि ॥ २२ ॥
तच्छ्रुत्वोत्थाय भूदेवो विपणेर्विपणिं भ्रमन् ।
न याचित्वा[illegible] [illegible] तोऽधिकं ॥ २३ ॥
[illegible]तोऽथ भूदेवस्तत्रैव प्रत्यगात् ।
[illegible]नोऽगलत् [illegible]ऽधिकं [illegible] ॥ २४ ॥
तं [illegible] [illegible]सुतः ।
सुकुमार[illegible] दयार्द्रः [illegible] ॥ [illegible] ॥
[illegible] विश्रम्य भूदेव मधुर[illegible]
[illegible] [illegible]स्तु मम श्रमः ॥ २६ ॥
जन्सन्स डिक्[illegible] म न [illegible]
[illegible] मूल्येन किमुता[illegible]
किन्तु दातुं न शक्तिर्मे चत्वारि रजतान्यपि ।
याव[illegible]न्तु ताव[illegible] ॥ २८ ॥
ततोऽधिकं याचसे चे[illegible] [illegible]शिषम
[illegible] ॥

[illegible]

[illegible] अर्थात्

[illegible]

[illegible] मूल्येन। [illegible] अन्यः [illegible] विक्रेता जन्सन्स-डिक्सनीरी दातुं नेच्छति ततोऽल्पी[illegible] मूल्येन दातुं नेच्छति इति किमुत वक्तव्यमित्यर्थः ।

२८ । यावच्छक्यं शक्तिपर्य्यन्तं मया [illegible]मेवेत्यर्थः शक्यस्य इयत्तापर्य्यन्तमित्यर्थः "यावदवधारणे" इत्यनेन सूत्रेणाव्ययीभावः, अवधारणं इयत्तापरिच्छेदः ।

२९ । नास्ति किञ्चन धनं येषां तेऽकिञ्चनास्तेषां आशीरेव सर्वस्वं सर्वं धनमित्यर्थः ।

अन्यो यदि न लाभः स्यात्तथापि यशसा सह ।
विप्राय विद्यादानस्य पुण्यं लाभोऽस्तु ते महान् ॥ ३० ॥
पुस्तकव्यतिरेकेण कथं विद्या प्रसाद्यताम् ।
तथाहि पण्डितैरुक्तं ग्रन्थी भवति पण्डितः ॥ ३१ ॥
इत्युक्तवति भूदेवे तस्य वि[illegible]नुरागिताम्
तादृशीं ग्रन्थविक्रेता ज्ञात्वा प्रीततरोऽजनि ॥ ३२ ॥
उवाच च मनाक् स्मित्वा हर्षोद्रेकमिवोद्गिरन् ।
साधु साधु वटो यस्य विद्यायां सक्तिरीदृशी ॥ ३३ ॥
अनेनैव पणेनैतद्दत्तं [illegible] पुस्तकं मया ।
किन्तु येन गृहीतं मा प्रकाशोऽभूद[illegible] पणः ॥ ३४ ॥
ग्रन्थान् क्रेतुमशक्तोऽपि तान् [illegible]ध्येतुमिच्छसि ।
अतस्त्वयि मम श्र[illegible] [illegible] ॥ ३५ ॥
पुस्तकेष्वपि [illegible]षु गुरुषु प्रेरकेष्वपि ।
बालाः [illegible]येण दृश्यन्ते विद्याभ्यासात्पराङ्मुखाः ॥ ३६ ॥
[illegible] दातुमशक्तेऽपि गुरौ दारिद्र्यदुःस्थिते ।
संग्रहीतुं स्वयं त्वन्तु यावच्छक्यं प्रयस्यसि ॥ ३७ ॥
[illegible]त्मना सञ्चितेनापि भैक्ष्यलब्धेन यद्भवान् ।
[illegible] [illegible]णाति वसुना त[illegible]दद्भुतम् ॥ ३८ ॥
अ[illegible] स्वहस्त[illegible] प्रायशस्तेन दारकाः
क्रीणन्ति हि क्रीडनकं [illegible]ल्नं वाथ तत्क्षणात् ॥ ३९ ॥
स्वोपार्जितेन वसुना को बालः क्री[illegible]
ग्रन्थं त[illegible]न्यो विद्यायै त्यक्त्वा सर्वं विलोभनम्

---

३१ । प्रसाद्यतां प्रसन्ना क्रियेत । ग्रन्थव्यतिरेकेण विद्यायाः प्रीणनोपायोऽन्यो नास्ति इत्यर्थः ।

३३ । मनाक् स्मित्वा ईषद्धसित्वा, ईषद्धासमेव हर्षातिरेकमित्युत्प्रेक्षा । सक्तिरासक्तिः असाधारणोऽभिनिवेश इति फलितार्थः ।

३४ । येन मूल्येन गृहीतं तन्मूल्यप्रकाशं माकार्षीः तथात्वे अन्येषामपि तादृशेन मूल्येन अभियोगः स्यादिति भावः ।

३७ । प्रयस्यसि प्रयासं करोषि प्रयत्नं करोषीत्यर्थः ।

३८ । भिक्षाणां वृन्दं भैक्ष्यम् भिक्षाणां समूहेन लब्धेन वसुना धनेनेत्यर्थः ।

अहो इयं विचित्रैव पवित्रायति-दर्शिनी ।
अजातश्मश्रुरेखस्याप्यवालस्येव ते मतिः ॥ ४१ ॥

त्वय्यनन्तफलं दानं दानपात्रं त्वमेव सत् ।
तुभ्यं दत्तो वराटोऽपि भद्रायैव ध्रुवं भवेत् ॥ ४२ ॥

[illegible] पावनं यथा ।
यथा प[illegible] हस्त[illegible]तं धनम् ॥ ४३ ॥

तुभ्यं [illegible] याहक् प्रवर्तते ।
[illegible]न्तरुच्चकैः ॥ ४४ ॥

[illegible] पुरातनैः ।
[illegible] ॥ ४५ ॥

[illegible] पठितार्थ ग्रन्थान[illegible]
[illegible] ॥ ४६ ॥

इत्युक्त्वा ग्रन्थविक्रेता [illegible] ।
प्रणत्य सह तं ग्रन्थं भूदेवाय [illegible] मुदा ॥ ४७ ॥

ततःप्रभृति भूदेवो बहून् ग्रन्थान् पुरातनान् ।
यथाप्रयोजनं तस्मै [illegible] सुधीः ॥ ४८ ॥

इत्थमर्घं विनि[illegible] पुस्त[illegible] ।

[illegible]

४१ । [illegible] अजाता अनुत्पन्ना श्मश्रूणां [illegible] यस्य [illegible] [illegible] परिणत[illegible] निर्मल तव [illegible]दर्शिनी । उत्तरकाल[illegible]यतिरि[illegible] ।

४२ । त्वमेव सत् उत्कृष्टं दानपात्रं । [illegible] कपर्दकोऽपि । कोपं कुपस्येद ।

४४ । [illegible] उच्चकैः अत्यन्तम् ।

४[illegible] । मधुसूदनद[illegible] इत्यत्र "[illegible]" इत्यनेन सूत्रेण वैकल्पिकः सन्ध्यभावः ।

४८ । प्रयोजनमनतिक्रम्येति यथाप्रयोजनं प्रयोजनानुसारेणेत्यर्थः ।

४९ । अर्घं मूल्यं । तदर्थं तस्य पुस्तकस्य अर्थं अभिधेयं हृदा अन्तःकरणेन धारयन्नित्यर्थः ।

ग्रन्थस्य सारभूतोऽर्थो यस्य जागर्ति चेतसि ।
किं तस्य भारभूतेन तेन कार्य्यं सुमेधसः ॥ ५० ॥
मधुसूदनसाहाय्यात् ग्रन्थानध्येतुमाप सः ।
मरौ वार्वारिधौ चाग्नि ददात्यभिमुखो विधिः ॥ ५१ ॥
तथापि तस्य दारिद्र्यं विघ्नशङ्कामजीजनत् ।
वेतनं हि कलेजस्य बहु [illegible]मशेषयत् ॥ ५२ ॥
मासानां षोड़शानां स वेतनं धारयन्नृणम् ।
अध्यक्षानुग्रहादेव कलेजेऽतिष्ठदच्युतः ॥ ५३ ॥
रजतानां कथङ्कारमशी[illegible] तद्दीयतां मया ।
अशोधिते वेतने च [illegible]जेदध्यक्ष एव मा ॥ ५४ ॥
इति शङ्काकुलोऽधीतौ निराश [illegible] सोऽभवत् ।
मधुसूदनदत्तस्तु शङ्कां तस्य [illegible]तर्कयत् ॥ [illegible] ॥
सखायमेकदोवा[illegible] [illegible]देव मधुसूदनः ।
सख्यावि[illegible] स्थिते मा भैः प्रदेयाद्वेतनात्सखे ॥ ५६ ॥
पि[illegible] मे जलपानार्थं मासि मासि ददाति यत् ।
न त्वां मोचयिष्यामि वसुनास्माहणाद्ध्रुवम् ॥ ५७ ॥
[illegible]न्यं मन्यसे माञ्चेदथवा सुहृदं प्रियम् ।
म[illegible]पि मन्यस्व स्वमेव स्वं तदा सखे ॥ ५८ ॥
तवा[illegible]प माता [illegible] भोज्यन्ते भोजनञ्च मे ।
ममाप्यर्थस्तवार्थोऽस्तु [illegible] त्वं तेन शोधय ॥ ५९ ॥

---

५१ । मधुसूदनसा[illegible]य्यात् मधुसूदन दे नाम्नो ग्रन्थावि[illegible]त्वात् इत्येकोऽर्थः, अन्यश्च मधुसूदनस्य परमेश्वरस्य साहाय्यादित्य[illegible] तएव अर्थान्तरन्यासः [illegible]गच्छते ।

५२ । अशोषयदित्यस्यापि कर्तृपदं [illegible]रिद्यम् ।

५३ । अच्युतोऽभ्रष्टः सन् [illegible]लेजादभ्रष्ट इत्यर्थः ।

५५ । व्यतर्कयत् सम्भावयामास ।

५६ । इह अस्मिन् जने मयीति भावः ।

५७ । जलस्यपानं पीयते येन तत्पानं जलपानोपकरणम् मिष्टान्नादि तदर्थमित्यर्थः ।

५८ । अनन्यं आत्माभिन्नं । मम स्वमपि मम धनमपि स्वमेव स्वं आत्मीयमेव धनं मन्यस्व जानीहि ।

सख्यसूत्रेण सर्वस्वं नीरन्ध्रं स्यूतमावयोः ।
तवार्थोऽसौ ममार्थोऽयमित्थं बुद्धिन्तु मा कृथाः ॥ ६० ॥
कलेजमेतन्मा त्याक्षीर्नैराश्यमपि मा गमः ।
प्रत्यासीदति विद्या त्वां निरस्थो मापदा तु ताम् ॥ ६१ ॥
भूदेवः सुनृतां वाचं श्रुत्वा प्रियसखस्य ताम् ।
मित्रलाभं परं लाभममन्यत महामतिः ॥ ६२ ॥
अथ प्रेमरसेनार्द्रः प्रत्यूचे प्रीतिगद्गदम् ।
सखे धन्योऽस्मि यत् त्वं मे सुसखा सम्पदापदोः ॥६३॥
विचिकित्सा न मे काचिद् ग्रहीतुं त्वदुपक्रियाम् ।
सखा ह्यात्मैव कथितस्तादृशस्तु विशेषतः ॥ ६४ ॥
जानामि तव सौहार्द्दमकृत्रिममिदं सखे ।
याचित्वा [illegible] त्वां मोचयितुमिच्छसि ॥ ६५ ॥
ऋणादुन्मुक्तमात्मानं मन्येऽहं [illegible] सौहृदात् ।
सखे परन्तु नाद्यैव वसुनो मे प्रयोजनम् ॥ ६६ ॥
शेषस्य वेतनस्यार्थे शिक्षको मां यदा वदेत् ।
तदा त्वां ज्ञापयिष्यामि तिष्ठतु प्रणयोऽधुना ॥ ६[illegible]

---

६० । आवयोर्मम तव च सर्वस्वं सर्वमेव धनं सखित्वरूपे[illegible] नीरन्ध्रं निरवकाशं स्यूतं वस्त्रद्वयमिवेत्यर्थः, [illegible] अर्थो धनं अयं मम अर्थो मम धनं इति बुद्धिं ।

६१ । नैराश्[illegible] [illegible]कथमित्यत आह—विद्या त्वां प्रत्यासीदति तव क्रमेण [illegible]था भवति। आपदा आपत्पातेन तां विद्यां मा निरस्थः मा निक्षिप पदा चरणेन मा दूरीकुरु इत्यपि व्यज्यते ।

६२ । सुनृतां प्रियां सत्याञ्च ।

६३ । सुसखेति " न पूजार्थस्वतिभ्यां" इत्यनेन समासान्तनिषेधः ।

६६ । ऋणादुन्मुक्तामिति कचिद्भाव्यर्थो भूतवदङ्गीक्रियत इति न्यायेन उन्मोचनस्य निश्चिततया भूतवदङ्गीकरणाद् भूते निष्ठा ।

६७ । तिष्ठतु प्रणयोऽधुना—मम प्रणयः प्रार्थना ऋणयाचना इदानीं तिष्ठतु, अथवा तवऋणदानस्य प्रार्थना इदानीं तिष्ठतु, अथवा तव मम च प्रणयः प्रीतिरधुना तिष्ठतु मनस्येव तिष्ठतु इदानीं प्रकाशो मा भूदिति भावः ।

आगामिनीं नदीं ज्ञात्वा पथि कः पथिकः पुरः ।
तितीर्षुस्तामदृष्ट्वापि वस्त्रमुत्कृष्य गच्छति" ॥ ६८ ॥
इत्युक्त्वा तस्य भूदेवो हस्तं हस्तेन धारयन् ।
प्रेम्णा स्मितमुखः सख्युर्हस्तगं वस्त्विवाग्रहीत् ॥ ६९ ॥
इत्थं स वेतनं देयं धारयन्नपि निर्वृतः ।
परीक्षां दातुमक्षमे [illegible] ॥ ७० ॥
तदा [illegible] नन्यतिप्रभाम् ।
[illegible] ॥ ७१ ॥
[illegible]
[illegible] ॥
[illegible] पस्तनी ।
[illegible] ॥
[illegible]
[illegible] मार्गगमी ॥ ७४ ॥
[illegible] श्चतुर्थ्याश्च पञ्चम्याँ [illegible] ।
[illegible] परीक्षाम्नु [illegible] ॥ ७५ ॥
[illegible]
[illegible] ॥
[illegible]
[illegible] ॥ ७७ ॥
[illegible] परीक्षा [illegible]

---

६८ । यथा [illegible] नदीं [illegible]
पथिकः [illegible] गच्छति [illegible]
ज्ञात्वा [illegible] भावः
७० । निर्वृतः [illegible] ।
७१ । नन्वि [illegible]
७२ । ज्याय [illegible] मित्यर्थः ।
७५ । आवर्तः श्रेण्याः ।
७७ । समवेत्य संगत्य मिलित्वेति यावत् ।

चक्रुस्ते प्रार्थनां काञ्चित्पञ्चैव प्रतिभान्विताः ॥ ७८ ॥
द्वितीयश्रेणिगैश्छात्रैः सहागामिनि वत्सरे ।
यथा परीक्षां दद्यामस्तथास्त्वनुमतिश्च वः ॥ ७९ ॥
इत्यावेदनपत्रं ते ज्ञुनियर्वृत्तिभागिनोम् ।
परीक्षां दित्सवः काप्तेन्साहेबाय समर्पयन् । ८० ॥
काप्तेन् रिचार्डसन्नामा साहेबः सोऽपि तादृशीं ।
उन्नतेः प्रार्थनां तेषामन्वजानान्महामनाः ॥ ८१ ॥
मन्ये सम्वादपत्रं स तत्तदृष्ट्वा प्रसेदिवान् ।
तादृश्या उन्नतेर्योग्यांश्छात्रांस्तान्सम्भावयत् ॥ ८२ ॥
त्रिगुणामुन्नतिं लिप्सूनेकयैव परीक्षया ।
तान् श्रुत्वा व्यस्मयन्तैके छात्राश्चान्य उपाहसन् ॥ ८३ ॥
कोलाहल[illegible] संजल्पतां मिथः ।
छात्राणां निश्चितवतामाशामि[illegible]म्भवाम् ॥ ८४ ॥
समजल्पन् मिथस्ते हि भूदेवप्रमुखा इमे ।
पञ्चमश्रेणिगास्तंतु परीक्षां शक्नुयुः कथम् ॥ ८५ ॥
कथञ्चिद्यदि तां ततु पारयेयुस्तथापि ते ।
उत्कर्षं शक्नुयुर्गन्तुं न वेत्यत्रास्ति संशयः ॥
[illegible] परीक्षित
तथापि द्वे कथं श्रेण्यावुल्ल[illegible]मवाप्नुयुः ॥ ८७ ॥
चतुर्थीञ्च तृतीयाञ्च श्रेण्यावुल्लङ्घितुं यदि ।
युग[illegible]स्तर्हि द्वितीयां श्रेणिमाप्नुयुः ॥ ८८ ॥

---

७८ । [illegible] नवनवोन्मेषशालिनी बुद्धिस्तया विशिष्टा इत्यर्थः ।

८२ । प्रसेदिवान् प्रसन्नभूतः सम्भावयत् सम्भावयामास ।

८३ । एके केचिच्छात्रा व्यस्मयन्त विस्मयं लेभिरे अन्ये च उपाहसन् उपहासं चक्रुरित्यर्थः ।

८४ । एषां परीक्षार्थिनां भूदेवादीनामा[illegible]सम्भवां विसम्वादिनीं निश्चितवतां मिथः परस्परं संजल्पतां कथनोपकथनं कुर्वतां छात्राणां महान् कोलाहलोऽभूदित्यर्थः ।

८५ । मिथः परस्परं ते छात्राः समजल्पन्, किं समजल्पन्नित्याह भूदेवप्रमुखा इति ।



आरोहेयुर्द्वितीयाञ्चेच्छ्रेणीमत्रैव हायने ।
भाविन्यब्दे परीक्षेरंस्तदा तच्छ्रेणिगैः सह ॥ ८९ ॥
द्विगुणामुन्नतिं कश्चिल्लभेतापि कदाचन ।
त्रिगुणामुन्नतिं किन्तु न लेभेऽद्यापि कश्चन ॥ ९० ॥
लभेरंस्तां कथमिमे विसम्वादिमनोरथाः ।
इत्यन्तेवासिनः सर्वे सञ्जल्पं चक्रुरीर्ष्यया ॥ ९१ ॥
भूदेवप्रमुखान् पञ्च साक्षादप्यहसन् परे ।
सङ्घर्षिणो हि गुणिनां छिद्रमेव विचिन्वते ॥ ९२ ॥
भूदेवा[illegible]नु किञ्चि[illegible] प्रत्यु[illegible]लतोऽपि तान् ।
फलेन हि ब्रुवन्त्यार्या [illegible]स्तु मुखौजसा ॥ ९३ ॥
[illegible] प्राप्ते परीक्षा[illegible] निर्वाचकः ।
[illegible] कर्लेजा[illegible] [illegible] ॥ ९५ ॥
[illegible] पक्षपाती पर्य्यैक्षत स पञ्च तान् ॥ ९५ ॥
[illegible] प्रसादेन [illegible]
[illegible] [illegible] ॥ ९६ ॥
[illegible] स्थिते श्रेण्यौ समुत्ती[illegible]कदैव ते ।
[illegible] तामाशां [illegible] श्रेणिमध्ययुः ॥ ९७ ॥
[illegible] लेभे [illegible] उन्नतम् ।
भूदे[illegible]स्तां बहुगु[illegible] प्रापन्नेकदा ॥ ९८ ॥
[illegible]व पुरा[illegible] [illegible]
[illegible]ऽजनि [illegible] नासीत् पूर्वं पश्चाच्च [illegible] ९९ ॥
तृती[illegible]
[illegible]

---

९१ । विसम्वा[illegible] [illegible] मनोरथा आशा येषां ते विसम्वादि-मनोरथाः ।

९२ । सङ्घर्षिणः स्पर्द्धमानाः जनाः गुणिनां छिद्रमेव अन्विष्यन्ति ।

९३ । मुखौजसा मुखस्यैव तेजसा ब्रुवन्ति न तु फलेनेतिभावः ।

९७ । ते पञ्च द्वे श्रेण्यौ समुत्तीर्य्य ईर्ष्यतां ईर्ष्यावतां छात्राणामाशाञ्च उत्तीर्य्य अतिक्रम्य द्वितीयां श्रेणिमेकदैव उदयुः ।

छात्रः पुनः पञ्चमपङ्क्तिगोऽपि
भूदेवशर्म्माजनि च द्वितीयः ॥१००॥

इति कृतमतिर्भूदेवोऽसौ त्रिविक्रमवत्क्षणात्
त्रिपदगमनीं विद्यागत्या जगाम समुन्नतिम्।
समधिकगुणां वृत्तिं श्लाघ्यामगादपि मासिकीं
तदनु च तया वृत्त्या शिष्टादृणात् स्वममूमुचत् ॥ १०१ ॥

इति श्रीमहेशचन्द्र-कृतौ भूदेवचरिते काव्ये त्रिगुणोन्नतिर्नाम नवमः सर्गः ॥

दशमः सर्गः।

विद्याध्ययनम्।

वृत्तिं स्कलेज्ञाबुथ मासि मासि
सारस्वतीं वा प्रथमां सुदृष्टिम्।
भूदेवशर्म्मा प्रतिपद्य पापा-
दृणादितापान्मुमुचे क्रमेण ॥ १ ॥

[illegible] लब्धाम
विभज्य वृत्तिं बहुभ[illegible]यः।
एकेन भागेन भृतं नवीन-
[illegible]र्न्येन पुरातनीश्च ॥ २ ॥

१०१। त्रिपदगमनीं त्रिभिः पदैर्गम्यते प्राप्यते या या तादृशीं समुन्नतिं एकया विद्यागत्या विद्यानुशीलनेन जगाम। समधिका गुणा यस्यास्तां वृत्तिं जीविकां मासिकीं मासि मासि देयामित्यर्थः। शिष्टादवशिष्टादृणात् स्वमात्मानं अमूमुचत् मोचयामास। भूदेवशब्दाङ्कितोऽयं सर्गसमाप्तिश्लोकः॥

१। वृत्तिं स्कलार्सिप् इति ख्यातां जीविकां, सारस्वतीं सरस्वतीदेव्याः आद्यां कृपादृष्टिमिव, वृष्टिं प्राप्य यथा तापान्मुक्तो भवति तथेति भावः। मुमुचे इति कर्म्मकर्तरि प्रयोगः।

२। वृत्तिं वेतनं।

शिष्टेन भागेन च पाठयोग्यान्
ग्रन्थान् यथाशक्त्यपणिष्ट शिष्टः ।
तथापि शिष्टं यदि किञ्चन स्यात्
पितुः पदे तर्हि मुदे ददे तत् ॥ ३ ॥
स्वोपार्जितेऽर्थे स्वकरं गतेऽपि
न तस्य भोगेषु बभूव लिप्सा ।
विकारहेतौ सति विक्रियन्ते
येषां न चेतांसि त एव धीराः ॥ ४ ॥
स सप्तभिर्वाष्टभिरेव मासै-
रशोधयद् वेतनशेषमित्थम् ।
[illegible] मधुसूदनाद्वा
न [illegible] कलेजा[illegible] ॥ ५ ॥
सौहार्द[illegible]स्य न शङ्कया वा
न लज्जया वा मधुसूदनस्य ।
सोऽर्थं ग्रहीतुं विरराम किन्तु
प्रयोजनस्येतरथैव सिद्ध्या ॥ ६ ॥
भग्नेऽपि तस्मिन् प्रणये प्रियेण
[illegible]या न दुःखी [illegible] ।
प्रयोज[illegible] [illegible]तिप्रयस्य
[illegible]यतो [illegible] ॥ ७ ॥

---

३ । शिष्टेन अवशिष्टेन [illegible] क्रीणाति स्म, [illegible] [illegible]नात [illegible] यावत् ।

४ । विकारहेतावित्यादि [illegible] [illegible] आभानकवत् उक्त[illegible]मिति न चोरितः [illegible] । एवमन्यत्रापि ।

५ । स्वं धनम् ।

६ । इतरथा अन्येन प्रकारेण [illegible] प्रयोजनस्य ऋणशोधनस्य सिद्ध्या निष्पत्त्या हेतुना विररामेत्यर्थः, अर्थव्यवहारो हि प्रायेण मैत्रीं विघटयति इत्यतः सौहार्दभङ्गस्य शङ्का जातेतिभावः, परन्तु तेन हेतुना न विरराम इति भावः ।

७ । तस्मिन् प्रणये प्रार्थने अर्थदानप्रार्थने प्रियसखेन भूदेवेन भग्नेऽपीत्यर्थः ।

उच्चैः पदञ्च प्रचुराञ्च वृत्तिम्
ऋणाच्च मुक्तिं युगपत्स लब्ध्वा ।
विद्याप्रसादाद् द्विगुणां ववन्ध
विद्यासु भक्तिं पठने च सक्तिम् ॥ ८ ॥

उभौ सखायौ मधुसूदनश्च
भूदेवशर्म्मा स च मन्त्रयित्वा ।
कलेजपुस्तालयपुस्तकानि
द्रष्टुं समस्तान्युपचक्रमाते ॥ ९ ॥

स चेत्तयोरध्यवसाय उच्चै-
र्नासीत्प्रपूर्णोऽब्धिपिपासुतेव ।
तथापि विद्याध्ययने प्रसक्तिं
सुदुष्करां काञ्चिदपि व्यनक्ति ॥ १० ॥

अवाचयद्वा कति पुस्तकानि
दिनैः कियद्भिः कतरः सखेति ।
प्रायेण तौ द्वाववकाशकाले
समाख्यतां बन्धुवरैः समेत्य ॥ ११ ॥

तुल्यप्रवृत्ती यदि तौ सखायौ
तुल्यश्रमौ पुस्तकवाचने च ।
पारायणेनाशुतरेण [illegible]
स्तथापि भूदेवमधश्चकार ॥ १२

[illegible] दृष्ट्या मधुसूदनोऽसौ
भूदेवशर्म्मा तु विशेषदृष्ट्या ।

---

८ । सक्तिमासक्तिं अनुरागाधिक्यमिति यावत् ।

९ । उपचक्रमाते आरभाते ।

१० । अब्धिपिपासुता समुद्रपानाभिलाष इव उच्चैरुन्नतः सोऽध्यवसायो यदि प्रपूर्णो नासीत् तथापि सोऽध्यवसायः सुदुष्करां प्रसक्तिमासक्तिं व्यनक्ति सूचयति ।

११ । समाख्यतां संख्यां कृतवन्तौ ।

१२ । आशुतरेण शीघ्रतरेण पारायणेन पुस्तकस्य पारगमनेन भूदेवं अधश्चकार अतिक्रान्तवानित्यर्थः

अवाचयत् पुस्तकमित्यवैमि
पारायणे शैघ्यविलम्बबीजम् ॥ १३ ॥
इत्थं तयोरध्ययनस्य काले
श्रीरामगोपाल इति प्रसिद्धः ।
व्यज्ञापयद्धिन्दुकलेजशिष्यान्
प्रबन्धमेकं लिखितुं मनोज्ञम् ॥ १४ ॥
आद्यां द्वितीयामथवाधिरूढः
श्रेणिं हि यो हिन्दुकलेजशिष्यः ।
स्त्रीभ्योऽपि विद्या प्रतिपादनीये-
त्यर्थानुकूलं रचयेत् प्रबन्धम् ॥ १५ ॥
तस्मै मया हेममयी प्रशस्ति-
र्विद्यागुणस्यैव पुरस्क्रियार्थम् ।
मेडाल्नाम्नी प्रतिपादनीया
प्रबन्ध उत्कृष्टतमो यदि स्यात् ॥ १६ ॥
तत्कल्प एवाथ भवेद् यदीयः
प्रबन्धलेखो दृढयुक्तिसारः ।
तस्मै च देयैव तथा प्रशस्ति-
दुर्[illegible] [illegible]पि [illegible]
[illegible] वोदय [illegible]
[illegible] गुणा[illegible] ।

---

१३ । सामान्येन द्वाभ्यां [illegible] मधु[illegible]: पुस्तकमवाचयन् पाठितवान् परन्तु भूदेवशर्मा[illegible] विल[illegible]ण [illegible] अवाचयत् इति तस्य शैघ्र्यस्य हेतुः भूदेवस्य विल[illegible] हेतु[illegible] भावः ।

१६ । प्रशस्तिः प्रशंसापत्रं [illegible]र्टिफिकेट् इति ख्याता प्रतिपादनीया देया ।

१७ । तत्कल्पस्तस्मात् प्रबन्धात् ईषदूनः । दुर्वर्णाद् रजताज्जाता, अपिः समुच्चये सुष्ठु वर्णजातं अक्षरसामान्यं यस्याः सा सुवर्णजाता, शोभनार्थप्रकाशकाः तस्या वर्णाः सौन्दर्य्ययुताश्च भविष्यन्तीति भावः। अथच दुर्वर्णजाता रजतजातापि सुवर्णजाता हिरण्मयीति विरोधाभासः । अत्र अपिर्विरोधे ।

१८ । आद्यावलम्बिता प्रथमश्रेणिस्थाः ।

विज्ञापनां हिन्दुकलेजशिष्या
प्राद्यावलीगास्त्ववजज्ञुरेव ॥ १८ ॥

ऊचुश्च ते देशभवस्य पुंसो
विज्ञापनायां किमिहादरेण ।
सतो यदीयं बृटिशोऽभविष्यत्
तदा यतिष्यामहि नूनमत्र ॥ १९ ॥

इंलण्डवाचा लिखितं प्रबन्धं
देशोद्भवः को नु विचारयेन्नः ।
न च प्रबन्धस्य गुणागुणानाम्
परीक्षकोऽस्यास्ति बृटिश् मनीषी ॥ २० ॥

इति ब्रुवन्तः प्रथमावलिस्था
विद्यावलेपान्नवयौवनास्ते ।
प्रत्यादिशंस्तस्य तृणाय मत्वा
विज्ञप्तिमुत्साहयतः सतोऽपि ॥ २१ ॥

द्वितीयपङ्क्तेरपि हन्त शिष्या-
स्तदेव तेषां मतमन्वगच्छन् ।
अग्रेसरो येन पथा प्रयाति
[illegible]ऽपि ॥ [illegible] ॥

प्रबन्धलेखाद्विरतेष्व[illegible]
मन्येषु शिष्ये[illegible]ममानवत्तु ।
[illegible]मिव न स व्यरंसीन्-
मतं स्वतन्त्रं हि विवेक[illegible]जः ॥ [illegible] ॥

अजीगणत्तु ह्रियमद्विती[illegible]यो
भूत्वा स एको लिखि[illegible]तु प्रब[illegible]म् ।

---

१९ । बृटिशः सतः पण्डितस्य यदि इयं [illegible] विज्ञापन[illegible] अभविष्यत् तदा नूनं अत्र विज्ञापनायां अयतिष्यामहि यत्न[illegible]करिष्य[illegible]म । क्रियातिपत्तौ लृङ् ।

२१ । प्रथमावलिस्थाः प्रथमश्रेणिस्थाः, छात्राः इति शेषः, विद्यावलेपात् विद्या-गर्वात्, प्रत्यादिशन् निराकृतवन्तः, उत्साहयतः उत्साहं ददतोऽपि सतः पण्डितस्य रामगोपालघोषस्य विज्ञप्तिं निराचक्रुरित्यर्थः ।

२३ । विवेकभाजो विवेचनायुक्तस्य जनस्य मतं स्वतन्त्रं स्वप्रधानम् ।

सार्थांस्त्यजन्नप्यपथप्रवृत्ता-
नेको हि जिह्वेति सदध्वगोऽपि ॥ २४ ॥

तस्मात् स वाचा दृढ़युक्तिभाजा
प्रियस्य सख्युर्मधुसूदनस्य ।
वैमत्यमुच्छिद्य निबन्धलेखे
प्रवृत्तिमाधत्त विविक्तचित्तः ॥ २५ ॥

भूदेव एवं तमुदाजहार
भ्रातः कुतस्ते भ्रम एष जातः ।
सतामपि श्लाघ्यगुणा बुधा ये
द्वेषः कथं देशभवेभ्य एभ्यः ॥ २६ ॥

स्वदेशिनामेव महाजनानां
स्तुतिश्च निन्दा च हिताहिते नः ।
प्रकाशते यो न निजेऽपि देशे
किं दूरगेणापि गुणेन तेन ॥ २७ ॥

उदाहराभ्यत्र सखे तवैकम्
वाक्यं महद्दाशरथेः सुराज्ञः ।
[illegible]कण्ठभाजो
[illegible] ॥ २८

२४। अद्वितीय [illegible] एक एकाकी ह्रियं लज्जां अज- गणद् [illegible] प्रवृत्तान् अपथे गच्छतः सार्थान् सहचरान् त्यजन् सद [illegible] जिह्वेति लज्जत इति भावः ।

२५। वैमत्यं—[illegible] विमतस्तस्य भावो वैमत्यं विरुद्धं मतमिति फलितोऽर्थः । [illegible] चित्तं यस्य स विविक्तचित्तः । आधत्त जनयामास ।

२६। ये बुधाः बुद्धिमन्तः सतामपि पण्डितानामपि श्लाघनीयगुणशालिनः एभ्यः द्वेषः कथम् ।

२७। हिता च अहिता च इति हिताहिते, स्तुतिर्हिता उपकारिका निन्दा च अहिता अपकारिका इति क्रमेणान्वयः ।

२८। पूजितो राजा सुराजा तस्य सुराज्ञो दशरथपुत्रस्य रामस्य ।

उद्धृत्य सीतामधिकृत्य लङ्कां
विभीषणाय प्रतिपाद्य रामः ।
पुरीमयोध्यां प्रतिगन्तुमिच्छ-
न्नयाचि भक्तेन विभीषणेन ॥ २९ ॥
लङ्कानगर्य्यां स्वभुजार्जितायां
राज्यं विधेहीह विभो चिराय ।
भक्तस्य सेवां प्रतिगृह्य चास्य
प्रपूरयेच्छां नतकामपूर ॥ ३० ॥
कनीयसे चोत्तरकोशलानां
रताय राज्यं भरताय देहि ।
विमातुराशापि तव प्रसादात्
सम्पद्यतां सास्तु च राजमाता ॥ ३१ ॥
इत्युक्तवन्तं चरणौ गृहीत्वा
प्रत्यब्रवीत्तं रघुवीरसिंहः ।
दूरे विदेशेऽभ्युदयेन किं वा
राज्येन किं शत्रुजयेन वा किम् ॥ ३२ ॥
उपक्रियन्ते सुहृदो न येन
नापक्रियन्ते [illegible] येन
दूरे विदेशेऽभ्युदयेन
किं वा फलं [illegible] शतायु[illegible]ऽपि ॥ ३[illegible] ॥
न गी[illegible]मत्र जनैर्यशो य[illegible]
कर्णौ न वा यश्च दहत्यरी[illegible]णाम् ।
लोकान्तरस्थेन सुधांशु[illegible]व
दवीयसा किं यशसा[illegible] तेन ॥ ३४ ॥
सुखेन जीवन्तमपि [illegible]वासे
चिरं सुसम्पन्नमपि [illegible]भुं धिक् ।

---

२९ । प्रतिपाद्य दत्त्वा ।

३० । अस्य भक्तस्य मम । नतानां काममभिलाषं पूरयतीति नतकामपूर ।

३३ । शतायुषः शतं वत्सरा आयुर्जीवितकालो यस्य तस्यापि ।

३४ । दवीयसा दूरादपि दूरवर्तिना ।

यः स्मर्य्यते हन्त मृतः सगोत्रै-
र्वार्त्ता न चेद् द्वादशवार्षिकी स्यात् ॥ ३५ ॥
दूरस्थितानां किमिहादरेण
द्वेषोऽप्यणुः स्यात्प्रतिवेशिनां चेत् ।
विपद्यमानं सहसान्तिकस्था-
दृते परित्रातुमलं न दूरः ॥ ३६ ॥
समीपवर्ती कथितोऽन्तरङ्ग-
स्तिष्ठंस्तु दूरे बहिरङ्ग एव ।
हित्वान्तरङ्गं बहिरङ्गपूजा
चक्षुः परित्यज्य नखस्य रक्षा ॥ ३७ ॥
अतोऽन्तरङ्गान्सुहृदश्च हित्वा
दूरे विदेशे स्वभुजार्जितेऽपि ।
न रोचते मे क्षणिकोऽपि वास-
श्चिरप्रवासस्य पुनः कथा का ॥ ३८ ॥
इत्युक्तवान् युक्तिविशेषयुक्तं
सम्भावयिष्यन् [illegible] बन्धून् ।
लब्धां पुरीमप्यपहाय हैमीं
[illegible]: स्वदेशं पुनरा[illegible] ॥ [illegible]
[illegible] तथा[illegible]
प्रमाण[illegible] पुरुषो[illegible]
[illegible] मतं तदीयम्
[illegible] गतः स पश्चात् ॥ ४० ॥

---

३५ । द्वादशवर्षपर्य्यन्तं [illegible] विरहि[illegible] मरणं अवधारयन्ति ज्ञातय इति स्मृतिः ।

३६ । अणुरपि अल्पोऽपि [illegible] स्यात् । अन्तिकस्थात् ऋते समीपस्थं विना, परित्रातुमलं स[illegible] न [illegible]भवतीत्यर्थः ।

३७ । चक्षुस्त्यक्त्वा नखस्य रक्षा यथा अनुचिता तथा समीपवर्तिनं त्यक्त्वा दूरवर्तिनो बहिरङ्गस्य समादरोऽनुचित इति तं माकार्षीदित्यर्थः ।

४० । सम्भावय समाद्रियस्व, पुरुषोत्तमस्य पौरुषशालिनां श्रेष्ठस्य रामस्य उक्तिं वाक्यं प्रमाणय प्रमाणं जानीहीत्यर्थः ।

अन्यच्च यूयं यदि देशभाजा-
मवज्ञया पालयत स्थितिं न ।
युष्माकमप्यायतिषु स्थितिन्ते
तथैव भङ्क्ष्यन्ति तदेति मन्ये ॥ ४१ ॥
अतो भवद्भिर्निजदेशभाजां
सतां न भेद्यः कलयाऽपि मानः ।
युष्मान् यथोत्साहयते स विद्वान्
उत्साह्यतां सोऽपि तथा भवद्भिः ॥ ४२ ॥
इत्थं स वह्नीरुपपाद्य युक्ती-
र्भूदेवशर्म्मा मधुसूदनस्य ।
अशोचितां विज्ञजनेष्ववज्ञां
व्यावर्त्तयद्देशविभूषणेषु ॥ ४३ ॥
भूदेववाचा मधुसूदनस्य
व्यावर्त्यमाने हितया मते तु ।
शिष्या द्वितीयालिगताः परीक्षां
सर्वेऽप्यदित्सन् प्रतियोगिनीं ताम् ॥ ४४ ॥
द्वितीयपङ्क्तेरथ सर्व एव
छात्राः प्रबन्धानभिलिख्य यत्नात् ।
उपानयन् विज्ञवराय [illegible]
गोपालघोषाय पृ[illegible] पृथ[illegible] ते ॥ ४५ ॥
घोषः [illegible] विज्ञैरपरैः समेत[illegible]
सर्वान् प्रबन्धान् बहुधा [illegible]चार्य्य ।
कृतिं मधोरेव समाख्य[illegible]ाम्

४१। स्थितिं मर्य्यादां यदि न पालयत त[illegible] आयतिषु उत्तरकालेषु ।

४२। कलयापि अंशतोऽपि मानो न भेद्य[illegible] ।

४३। वह्नीर्युक्तीरुपपाद्य योजयित्वा [illegible]शविभूषणेषु विज्ञजनेषु अशोचितां मूर्खस्यैव योग्यां अवज्ञां व्यावर्त्तयत् व्यवच्छिन्नवान् ।

४४। हितया उपकारिण्या भूदेववाचा, द्वितीयालिगताः द्वितीयश्रेणिस्थिता-श्छात्रा इत्यर्थः, प्रतियोगिनीं सङ्घर्षवतीम् ।

४५। उपानयन् समीपमानिन्युः ।

विद्वांश्च भूदेवकृतिं द्वितीयाम् ॥ ४६ ॥
प्रबन्धभाषा मधुसूदनस्य
मनोहरासीद् वृटिशो यथोक्तिः ।
युक्तिस्तु भूदेवकृतेरुदारे-
त्यासीन्मतं तत्र परीक्षकाणाम् ॥ ४७ ॥
सत्कारमाद्यं मधुसूदनोऽगा-
न्मेडालनाम्नीं कनकप्रशस्तिम् ।
भूदेवशर्म्मा त्वगमद् द्वितीयां
पुरस्क्रियां तां रजतप्रशस्तिम् ॥ ४८ ॥
इत्थं तयोरेव यदा निरीयु-
र्यशःश्रियो हिन्दुकलेजमध्ये ।
अन्ये तदा निष्प्रभतामवापु-
र्ग्रहा इवादित्यशशिप्रकाशे ॥ ४९ ॥
गृहीतभाषो वृटिशोऽथ विद्वाद्-
भिपलुणार्यैरिजिति प्रसिद्धात् ।
अङ्कादिविद्याः स सुखेन हृद्याः
प्राग्जन्मसिद्धा इव शिक्षते स्म ॥ ५० ॥
[illegible]
[illegible] तुल्यौ ।
[illegible]तीयतुस्[illegible] [illegible]र्थान्
[illegible]निर्वाश[illegible]टयेन्दुसूर्यौ ॥ ५१ ॥
[illegible]शर्म्मा[illegible]सनश्रमेण
ज[illegible] सर्वं [illegible]णितस्य तत्त्वम् ।
काव्या[illegible]नुरक्तो गणिते विरक्तो
मधुस[illegible] [illegible]तिमावलेन ॥ ५२ ॥
अत्रान्त[illegible] [illegible] कस्मात्
प्रतीपबुद्धि[illegible]धुसूदनोऽभूत् ।

---

४६ । आद्यां समाख्यत प्रथमां गणय[illegible]स ।

४७ । उदारा महती, आसीदिति पूर्वेणान्वयः ।

४९ । यशः श्रियो यशोरूपाः सम्पदः, निरीयुर्निर्गता बभूवुः ।

५० । सुखेन अकष्टेन ।

खीष्टीयधर्म्मं सुहृदोऽप्यनुक्त्वा
जग्राह गूढ़ं स हि हिन्दुनिन्द्यम् ॥ ५३ ॥
मन्येऽयमुच्चैः पदमुच्चलामी-
त्यचिन्तयित्वैव परत्र भीतिम् ।
धर्म्मं विरुद्धं सहसा स लोलो
मीनः स्थलारोहमिवाललम्बे ॥ ५४ ॥
अशुद्धमेतत् खलु हिन्दुधर्म्मं
खीष्टीयधर्म्मन्तु विशुद्धमेव ।
इत्यादिकोक्तिस्त्वविवेकमूला
सर्वो हि धर्म्मो ह्यविशुद्धियुक्तः ॥ ५५ ॥
आलोकमन्धात्तमसो विशामी-
त्यालोच्य यो मुञ्चति जातिधर्मम् ।
तमेव जानामि तमःप्रविष्टं
न भाविनीं पश्यति दुर्गतिं सः ॥ ५६ ॥
उक्तं फलं सप्तम एव सर्गे
बभूव यादृङ् मधुसूदनस्य ।
स्वजातिधर्म्मं परिहृत्य लौल्यात्
खीष्टीयधर्म्मं [illegible]श्रितस्य ॥ ५[illegible] ॥
गुणप्रशंसा मधुसूदन[illegible]
भूदेव एव व्यथि[illegible]तात्मनै[illegible]म्
विद्यानुरागी सुकविर्गुण[illegible]
मधुः सुतीक्ष्णप्रतिभश्च किन्तु ॥ ५८ ॥
खीष्टीयधर्म्मं यदि नाग्र[illegible]ष्य-
न्न चाकरिष्यद्द् यदि [illegible]चसङ्ग[illegible] ।
तदा स्वदेशस्य मुखं [illegible]शोभि-

---

५३ । प्रतीपबुद्धिः प्रतिकूलमतिः ।

५४ । लोलश्चपलः ।

५५ । अविशुद्धियुक्तः इति—तथाच सांख्यकारिका " दृष्टवदानुश्रविकः स ह्य-
विशुद्धिक्षयातिशययुक्तः" इति ।

५८ । इत्थं वक्ष्यमाणप्रकारं, गुणप्रशंसा आत्मना स्वयमेव व्यथित चकारेत्यर्थः ।

मुक्तानिभैः स्मेरमिव व्यधास्यत् ॥ ५९ ॥

यथा तथा वास्तु स तेन नास्ति
काचिच्छुभाशा खलु हिन्दुजातेः ।
खीष्टीयधर्म्माश्रयिणोऽन्यजाते-
र्निन्दन्ति हि प्राणवदेव धर्म्मम् ॥ ६० ॥

इहैव जन्मान्तरमाश्रिता वा
जातिं कुलं धर्म्मपरिच्छदाख्याः ।
पुरातनं चिह्नमशेषमेव
खीष्टानभूताः परिवर्जयन्ति ॥ ६१ ॥

खीष्टीयधर्म्मं परिगृह्य मन्ये
मधुर्न दध्यौ पितरावपीष्टौ ।
अन्ये पुनः के सुहृदोऽन्तरङ्गाः
सजातयो वाऽथ समानदेशाः ॥ ६२ ॥

[illegible] इत्येव विभिन्ननामा
विभिन्नवेशश्च विभिन्नकर्म्मा ।
खीष्टानभूतो [illegible]
विभिन्नमाकारमिवाभिपेदे ॥ ६३ ॥

[illegible]कदा दृष्टमना [illegible]
[illegible]नानुरोधात् ।
[illegible] त[illegible]यामवि[illegible]स्वरेण
[illegible]कथमप्यदूरः ॥ ६४ ॥

[illegible] स समं सतीर्थैः
प्र[illegible]कुलेजमौज्झत् ।

---

५९ । स्मेरमिव सह[illegible]मि[illegible]व्य[illegible]त् [illegible]करिष्यत् ।

६० । यथा तथा वा[illegible] ग्रन्थकारस्य उक्तिः । प्राणवत् प्रियं धर्म्ममेव निन्दन्ति इति उपका[illegible]व कुर्वन्तीति भावः ।

६१ । धर्म्मं परिच्छदं वे[illegible] नाम च ।

६२ । इष्टौ प्रियौ पितरावपि न दध्यौ न सस्मार ।

६४ । अदूरो निकटवर्ती सन् स्वरेण कण्ठध्वनिना कथमपि केनापि प्रकारेण सोऽयमिति प्रत्यभिज्ञातवान् इत्यर्थः ।

अध्येतुकामश्च पुनर्विवेश
त्रिशप्कलेजं शुचिमन्यमानः ॥ ६५ ॥
अधीत्य मासान् कतिचित् स तत्र
माद्राजदेशं चपलो जगाम ।
अपव्यवस्थे हृदये हि लोकैः
सुदुर्लभं स्वास्थ्यमपीन्द्रलोके ॥ ६६ ॥
अथान्यदन्योऽपि तवो युवैकः
खीष्टीयधर्म्मं बहु मन्यमानः ।
जग्राह चण्डीचरणाभिधानः
स्थलायनं मीन इवाल्पबुद्धिः ॥ ६७ ॥
इत्थं खीष्टमतग्रहे ग्रहिलतां दृष्ट्वा बहूनां तदा
भूदेवोऽपि मनागभूच्चलमना धर्म्मं तमालम्बितुं ।
प्रायो गड्डलिकाप्रवाहविधया लोकाः श्रयन्ते गतिं
संसर्गो गुणदोषयोः पदमथो तारुण्यमुच्छृङ्खलम् ॥ ६८ ॥

इति श्रीमहेशचन्द्रकृतौ भूदेवचरिते काव्ये विद्याध्ययनं नाम दशमः सर्गः ॥

एकादशः सर्गः

विद्याध्ययनम्


अथैकत्राहि भूदेवो भूदेवतनयोऽपि सन् ।
न चकार विधिं सान्ध्यं देवनीराजनादिकम् ॥ १ ॥

---

६६ । हि यतः, हृदये अपव्यवस्थे व्यवस्थाशून्ये सति इन्द्रलोकेऽपि स्वास्थ्यं प्रकृतिस्थता दुर्लभमिति ।

६८ । खीष्टमतस्य ग्रहे ग्रहिलतां निर्बन्धं बहूनां दृष्ट्वा । मनाक् ईषत् । गड्डलिकानां मेषाणां प्रवाहस्य विधया प्रकारेण, मेषाणां मध्ये प्रथमो मेषो यया दिशा गच्छति तयैवापरेऽपि अनुगच्छन्ति तद्वत् । पदं कारणम् ।

१ । भूदेवतनयोऽपि ब्राह्मणात्मजोऽपि सन् । नीराजना आरात्रिका (आरति) ।



सान्ध्यस्य देवकृत्यस्य भारमारोपितं पुरा ।
पितुराज्ञेति सोत्साहश्चिरादुद्वहद्धि सः ॥ २ ॥
तत्राह्नि विश्वनाथोऽपि नासीद्वेश्मनि तत्पिता ।
नियमस्यान्यथाकारे कारणं येन पृच्छ्यताम् ॥ ३ ॥
भुक्त्वा शयाने भूदेवे तत्पिता गृहमागतः ।
शुश्राव देवतासेवा नेदानीमप्यभूदिति ॥ ४ ॥
तच्छ्रुत्वा देवतासेवां निर्वर्त्य स्वयमेव सः ।
भुक्त्वा निषण्णः पप्रच्छ गृहिणीं गृहमङ्गलाम् ॥ ५ ॥
भूदेवस्यासुखं कच्चित् किञ्चिन्नाजनि सुव्रते ।
यत्सेवां सोऽद्य नाकार्षीद्देवानां नियतामपि ॥ ६ ॥
इति ब्रह्ममयी देवी पृष्टा पतिमभाषत ।
शान्तं पापमसौ शेते भूदेवः स्वस्तिमांस्तव ॥ ७ ॥
आदिष्टोऽपि मया नासावकार्षीद्देवतार्चनम् ।
[illegible]स्य चाकरणे किञ्चिन्नावोचन्मम कारणम् ॥ ८ ॥
[illegible] श्रुत्वा विश्वनाथः [illegible] मनसो गतिम् ।
[illegible]न्यथा शङ्कमानोऽपि निशि तूष्णीमवास्थित ॥ ९ ॥
[illegible]द्यवि समुत्थाय विश्वनाथः कृताह्निकः ।
[illegible] सुतमासीनम[illegible]म् ॥ १० ॥
वि[illegible] साम्ना पप्रच्छ नन्दनम् ।
कि[illegible]करोर्देवतार्चनम् ॥ ११ ॥
प्रश्नम[illegible]कार्यं भूदे[illegible] धृष्ट इवोत्तरम् ।

---

७ । शान्तं पापं—[illegible]मसुखं [illegible]वृत्तम् भवत्विति आशीः ।

८ । मम समीपे का[illegible] न [illegible]चत् । ममेति सामीप्यसम्बन्धे षष्ठी, म[illegible]
शृणु इत्यादिवत् ।

९ । अन्यथा शङ्कमानो[illegible] विपरी[illegible] संशयमानोऽपि तूष्णीमवास्थित निःशब्द[illegible]
मवस्थितोऽभूत् ।

१० । परेद्यवि परस्मिन्नहनि परदिने इति यावत् ।

११ । तमन्वास्य तेन सह उपविश्य । अनुशब्दयोगादासधातोः सकर्म[illegible]
कत्वम् । नन्दनं पुत्रम् । साम्ना सान्त्वेन अत्यर्थमधुरवचसा इत्यर्थः [illegible]
ह्यो भूतकल्ये ।

बालक्रीड़ामहं मन्ये यत्तु पुत्तलिकार्चनम् ॥ १२ ॥
शालग्रामः शिलाभेदो मतो न पुनरीश्वरः ।
शिलामयी च प्रतिमा बालक्रीड़नकं मता ॥ १३ ॥
मृच्छिलादारुसारासु प्रतिमासु जड़ास्वपि ।
विश्वेशत्वेन विश्वासः कस्य प्रेक्षावतो भवेत् ॥ १४ ॥
आसीन्ममापि विश्वासो बालकस्य तथाविधः ।
साम्प्रतन्तु स विश्वासो बाल्येनैव समं गतः ॥ १५ ॥
ईशोऽयमिति देवोऽयमिति वा साम्प्रतं मम ।
सत्यं ब्रवीमि विश्वासो जड़ेषु न हि जायते ॥ १६ ॥
न चेज्जायेत विश्वासः फलं किं तैस्तदार्चितैः ।
अतो नाकरवं ह्योऽहं व्यर्थं तेषां प्रपूजनम् ॥ १७ ॥
इत्यप्रियं निशम्यापि सुतस्य वचनं पिता ।
नाभवद्विस्मितोऽत्यर्थं नाप्यपारज्यत क्रुधा ॥ १८ ॥
स्वगतं मन्त्रयामास सहिष्णुस्तर्कभूषणः ।
शङ्कितं यन्मया पूर्वं तदेवैतद् विजृम्भते ॥ १९ ॥
अध्यापितवतः पुत्रं म्लेच्छभाषामसत्फलाम् ।
ममैव कर्मणो नूनं फलमेतद्विपच्यते ॥ २० ॥
तदद्य [illegible] वा परमुपा[illegible] ।
इममेवानुनेष्यामि यदि स्ने[illegible]ति ॥ २१ ॥
इति स्वगतमालोच्य अकाश तर्कभूषणः ।
स्मितपूर्वमवोचत्तं पुनः स्नेहमिवोद्गिरन् ॥ २२ ॥
यदि तात न विश्वासः प्रतिमादिषु ते भवेत् ।

---

१२ । धृष्टः प्रगल्भः लज्जाभयशून्य इति यावत् ।

१४ । मृच्छिलादारूणि साराः स्थिरांशा यासां तासु जड़ास्वपि इति अपिरेवार्थे अचेतनास्वेवेत्यर्थः प्रेक्षावतो बुद्धिमतः ।

१७ । अर्चितैस्तैः जड़ैः शिलादिभिः किं फलं किमपि फलं नास्तीतिभावः । ह्योऽतीते कल्ये ।

१८ । विस्मितो विलक्षः । न अपारज्यत अपरक्तो नाभवत् अनुरागव्यत्ययं न प्राप ।

१९ । विजृम्भते उदयति ।

माकार्षीस्तर्हि तत्सेवां करिष्याम्यहमेव ताम् ॥ २३ ॥
परन्तु गिरमेकां मे कुरु वत्स विमत्सरः ।
अद्यप्रभृति गङ्गायां स्नातव्यं ते मया सह ॥ २४ ॥
गङ्गां दृष्ट्वैव मन्ये ते प्रसीदेदाविलं मनः ।
तत्र स्नात्वा च जानामि शारीरमुदयेत् सुखम् ॥ २५ ॥
जननीव करस्पर्शैस्तरङ्गैः सुखशीतलैः ।
अन्तर्बहिश्च सन्तापं स्नातां हरति जाह्नवी ॥ २६ ॥
अद्भुतानि च गङ्गायां वह्न्यालोकयिष्यसि ।
तरीरर्णवयानानि वाष्पीयतरणीरपि ॥ २७ ॥
नानादेशागताल्लोकान् श्रद्धाभक्तिसमन्विताम् ।
पश्यतस्ते प्रमोदश्च बहुदृष्टिश्च सम्भवेत् ॥ २८ ॥
ईदृशी चित्तवृत्तिश्च न स्थास्यति चिरं तव ।
मन्ये जायेत विश्वासो हिन्दुधर्मे निरत्ययः ॥ २९ ॥
[illegible]त्युक्त्वोत्थाप्य भूदेवं गङ्गां पतितपावनीम् ।
[illegible] ययौ स्नातुं तेनैव सह सत्वरः ॥ ३० ॥
[illegible]ाह्नव्यां पितरि [illegible] तर्पणादिकमाह्निकम् ।
[illegible]ाचरत्येव भूदेवः शीघ्रं स्नातो[illegible]भवत् ॥ ३१ ॥
[illegible]माणः पितरं गङ्गायाः परमां श्रियम् ।
[illegible]यमा[illegible]लादिव ॥ ३२ ॥
ना[illegible] पण्डितान् वालिशांस्तथा ।
[illegible]रूपान् [illegible]ांश्च धनिनो निर्धनानपि ॥ ३३ ॥
जड़ा[illegible]पि ग[illegible] तेषां भक्तीरलक्षयत् ।
मात[illegible]ां भक्तिभ्योऽपि गरीयसीः ॥ ३४ ॥

---

२४ । विमत्सरः [illegible]गत[illegible]यशुभद्वेषो यस्य सः । हिन्दूनां शुभद्वेषं त्यक्त्वा मम गिरं कु[illegible] ।

२५ । मन्ये उत्प्रेक्षे, ते तव [illegible] कलुषं मनः प्रसीदेत् प्रसन्नं भवेदित्यर्थः ।

२६ । स्नातां स्नानं कुर्वतां । स्नाधातोः शत्रन्तस्य रूपम् ।

२९ । निरत्ययः अत्ययादपगमान्निष्क्रान्तः अखण्डनीय इत्यर्थः ।

३२ । बलादिव बलं विधायेव । ह्रियमाणः आकृष्यमाणः ।

३३ । वालिशान् मूर्खान् । सौम्यरूपान् मनोज्ञरूपान् । विरूपान् विकृतरूपान् ।

काँश्चित् प्रणमतो गङ्गामपश्यद् भुवि दण्डवत् ।
आ रोमभ्योऽपि हर्षेण पूर्णान् पुलकितात्मनः ॥ ३५ ॥
नेत्राभ्यामश्रुपूर्णाभ्यां ददर्श स्तुवतोऽपरान् ।
स्रोतो भक्तिरसस्यान्तरमात इव मुञ्चतः ॥ ३६ ॥
उपहारैर्महामूल्यैः क्षौमालङ्करणादिभिः ।
अर्चतो बहुभिर्गङ्गां सर्वस्वेनेव काँश्चन ॥ ३७ ॥
तेषां तथाविधा भक्तीः पश्यतोऽजनि मानसम् ।
भूदेवस्यापि भावार्द्रं सतां सङ्गो हि पावनः ॥ ३८ ॥
स्नात्वोत्थितेन भूदेवः सहितः स हितैषिणा ।
प्रत्याजगाम धाम स्वं गुरुणा करुणात्मना ॥ ३९ ॥
मधुरं चतुरं पित्रा स्निग्धमालपता पथि ।
उपदिष्टो हितं धर्म्यं नालङ्घयदसौ श्रमम् ॥ ४० ॥
गत्वा गेहं पितुः स्नेहलालितः स्नेहसंस्कृतम् ।
अन्नं जनन्याः स्नेहेन भूयः संस्कृतमाहरत् ॥ ४१ ॥
भुक्त्वा पीत्वा ययौ काले कलेजं स द्विजात्मजः ।

३५। पुलको रोमाञ्चः स जातो येषां ते पुलकिताः पुलकिता आ[illegible] शरीराणि येषां ते पुल[illegible] तान् [illegible] अतएव [illegible] रोमभ्योऽपि आ रोमपर्यन्तं हर्षेण पूर्णान् हृष्टरो[illegible]त्यर्थः । कैमुतिकन्यायेन हृदि हर्षेण पूर्णान् रोमस्वपि हर्षपूर्णानिति भावः ।

३६। अश्रुवर्षिभ्यां नेत्राभ्यां विशिष्टान् अपरान् स्तुवतः स्तुतिं कुर्वतः ददर्श । कीदृशानित्यत्र उत्प्रेक्षते, अन्तः अन्तःकरणे शरीरमध्ये अमातः मानमप्राप्नुवतः अपर्याप्तस्य भक्तिरसस्य स्रोतः प्रवाहमिव मुञ्चतः त्यजतः नेत्राभ्यां मुञ्चत इत्यर्थः ।

३९। करुणात्मना करुणः करुणाविशिष्ट आत्मा मनो यस्य तेन गुरुणा पित्रा सहितः ।

४१। पितुः स्नेहेन वात्सल्यात्मकेन प्रेमविशेषेण लालितः आदृतः सन् गेहं गत्वा स्नेहसंस्कृतं स्नेहेन घृतादिना संस्कृतं मधुरीकृतं अन्नं जनन्या मातुः स्नेहेन वात्सल्यरसेन भूयः पुनरपि संस्कृतं मधुरतरीकृतमन्नम् आहरत् बुभुजे ।

किं कर्तव्यमिति ध्यायन्नध्वन्युद्भ्रान्तचे[illegible]ः ॥ ४२ ॥
स संस्कारवशादेव श्रेणीमध्यवसन्निजाम् ।
शिक्षकेणोपदिष्टन्तु नावाबुध्यत किञ्चन ॥ ४३ ॥
अथापराह्णे तस्याह्नो विसृष्टोऽध्ययनालयात् ।
हेदुयादीर्घिकाख्यस्य सरसस्तीरमासदत् ॥ ४४ ॥
स तस्य सरसस्तीरे शीतवातोपसेविते ।
तप्तस्य मनसः कञ्चित्प्रशमं समभावयत् ॥ ४५ ॥
उपस्पृश्य हिमस्पर्शं जलं शाद्वलशीतले ।
आसीत्तीरे निषण्णोऽसौ विषण्णेनैव चेतसा ॥ ४६ ॥
व्यगाहत कलिस्तस्य स्वभावशुचि मानसम् ।
कलुषञ्चाकरोत्सद्यः सरो दन्तीव मानसम् ॥ ४७ ॥
हृदि तस्य कलौ जाते वेदवैवेलधर्मयोः ।
विहस्तं तद्भूद्देवदैत्ययुद्धाङ्गनोपमम् ॥ ४८ ॥
[illegible] प्रभुर्व[illegible]सामर्थ्यान् पर्यालोच्यदेकतः ।
मिस्नरी[illegible] [illegible] वाक्य[illegible]र्थानन्यतः पर्यचिन्तयत् ॥ ४९ ॥
[illegible] चेव स्वयमुद्वित्थमुत्थितः संशयो दृढः ।
[illegible]त कथं [illegible] विना ॥ ५० ॥
[illegible] [illegible]दा ।
[illegible] निष्कामयद् [illegible]मां [illegible]यत् ॥ ५१ ॥

४२। अध्वनि पथि। उद्भ्रान्ता निश्चयमप्राप्ता चेतना बुद्धिर्यस्य स उद्भ्रान्तचेतनः।

४३। संस्कारवशात् अभ्यासवशात्। अध्यवसत् अधिकृत्य उपाविशत्।

४४। हेदुयादीर्घिका—हेदुयादिघीति।

४५। समभावयत् प्रशमस्य सम्भावनां चकार।

४६। उपस्पृश्य आचम्य। शाद्वलं नवतृणयुक्तञ्च तत् शीतलञ्चेति शाद्वलशीतलं तस्मिन्।

४७। कलिः कलहः। मानसं मनः। मानसं सरो मानससरोवरम्।

४८। तत् हृदयं विहस्तं व्याकुलमभूत्। वेदधर्मो देवसदृशः वैवेल्धर्म्मो दैत्यसदृश इति तयोर्युद्धक्षेत्रतुल्यं व्याकुलमभूदित्यर्थः।

४९। मिस्नरीणां खिष्टीयधर्माचार्याणाम्।

किं वा निमित्तमासाद्य त्यजेयं वत्सलं गुरुम् ।
अप्युपोष्य स्वयं यो मां स्वभोज्येनापुषच्चिरम् ॥ ५२ ॥
मया तु चिन्तितं कुप्येत् पिता मम दुरुक्तिभिः ।
तेन च्छलेन तमहं त्यक्ष्यामि मनसो रुजा ॥ ५३ ॥
सत्यं निमित्तं दूरेऽस्तु मिथ्यापि नहि दृश्यते ।
अपदिश्यापि यदहं विहातुं पितरं क्षमे ॥ ५४ ॥
कोपस्थानेऽपि नाकुप्यत् साम्नैव प्रत्युताब्रवीत् ।
माकार्षीर्देवतासेवां विश्वासो यदि नास्ति ते ॥ ५५ ॥
ईदृग् गतिश्च चित्तस्य न स्थास्यति चिरं तव ।
शङ्के त्वामनुतापाग्निर्न चिरादुदितो दहेत् ॥ ५६ ॥
इत्याह यत् पिता स्नेहात् तत् सत्यं च हितं च मे ।
चिरं बद्धो हि स स्नेहः कथं व्यभिचरेन्मयि ॥ ५७ ॥
विश्वासो यत्र नैव स्यात् किं फलं तस्य सेवया ।
विश्वासेनैव जानामि ध्रियते निखिलं जगत् ॥ ५८ ॥
विश्वासादेव विश्वासो विश्वासादेव सौहृदं ।
विश्वासाद्व्यवहारश्च चिरमत्र प्रवर्तते ॥ ५९ ॥
यत्र मे नास्ति विश्वासो विश्वस्यात् स कथं [illegible]
अविश्वासे च का प्रीतिरप्रीतौ च कुतः फलं ॥ ६० ॥
ईशेऽपि चेन्न विश्वासस्तदा [illegible] न तुष्यति ।
पितुरेव वचो मन्ये परमं सत्यमच्छलम् ॥ ६१ ॥
पिता युक्तमुदारं च मम पथ्यमुपादिशत् ।
तमहं त्यक्तुमिच्छामि कपटेन धिगस्तु माम् ॥ ६२ ॥
इच्छतोऽपि पितृत्यागं मम कष्टमुदेति यत् ।
स्फुलिङ्गं तदिदं मन्ये पश्चात्तापस्य भाविनः ॥ ६३ ॥
मया च त्यक्तयोः पित्रोश्चित्ते तीव्रा व्यथा भवेत् ।
धिङ् मां कृतघ्नं विश्वासघातकं पितृघातिनम् ॥ ६४ ॥

५२ । वत्सलं स्नेहवन्तम् ।

५३ । मनसो रुजा मनोव्यथया छलेनेति अभेदेनान्वयः ।

५४ । अपदिश्यापि छलीकृत्यापि ।

५५ । साम्नैव सान्त्ववादेनैव ।

६२ । पथ्यं हितम् ।

अवोचं पौरुषं वाक्यं यदहं पितरं प्रति ।
तेनैव मन्ये व्यथते हतो दिग्धेषुणेव सः ॥ ६५ ॥
वत्सलाया जनन्याश्च विस्मरेयमहं कथम् ।
द्रुतैरिवात्मनः स्नेहैस्तन्यैर्या मामवर्द्धयत् ॥ ६६ ॥
आत्मनीव ज्वरस्पृष्टे या च मय्यप्युपावसत् ।
तस्या एवाभ्यसूयामि धात्र्यै निस्त्रिंशनिर्घृणः ॥ ६७ ॥
कृतज्ञः सेण्टपल्नामा कविः सम्यग् वचोऽब्रवीत् ।
पित्रोर्मुदे नरकमप्युत्सहे गन्तुमित्यदः ॥ ६८ ॥
अहं पुनस्तयोरेव विप्रियं कर्तुमुद्यतः ।
नरकेऽपि मम स्थानं मन्ये नास्ति कृतघ्नतः ॥ ६९ ॥
मिसेस् बुयिल्सन् मम का मिस्नरीपुरुषाश्च के ।
बैबेलमपि किं वा मे यीयसूख्रीष्टश्च को मम ॥ ७० ॥
येषां जिघृक्षता धर्मं त्यक्तव्यौ पितरावपि ।
अहो वत मम भ्रान्तिर्वञ्चकानां गिराभवत् ॥ ७१ ॥
पुष्पाणि मधुमन्तीव यान्याहुर्वचनानि ते ।
नूनं विषफलान्याशु जनयिष्यन्ति तानि मे ॥ ७२ ॥
[illegible] फलानामद्येदं ध्रुवमुद्भेदलक्षणम् ।
[illegible]पाङ्कुरः पाप उद्भिनत्तीव मे मनः ॥ ७३ ॥
पित[illegible] मम सर्वस्वं पितरौ मे महागुरू ।
पितरौ परमात्मा मे तावेव परमेश्वरौ ॥ ७४ ॥
तयोरेव वचः सत्यं विश्वास्यं वेदवन्मम ।

---

६५ । दिग्धेषुणा दिग्धशरेण विषलिप्तबाणेनेव इति फलितार्थः ।

६६ । जनन्या विस्मरेयं जननीं विस्मरेयमित्यर्थः । स्मृत्यर्थस्य कर्मणि षष्ठी । या द्रुतैर्द्रवीभूतैः स्नेहैरिव स्तन्यैः स्तनभवैर्दुग्धैः ।

६७ । आत्मनि कलेवरे ज्वरेण स्पृष्टे यथा उपवसति तथा मय्यपि ज्वरेण स्पृष्टे सति उपवासं चकार । धात्र्यै धारणकर्त्र्यै मात्रे निस्त्रिंशः खड्गः स इव निर्घृणः निर्दयः ।

७१ । जिघृक्षता ग्रहीतुमिच्छता जनेन ।

७३ । पापो दुष्टः। अनुताप एव अङ्कुरः, मे मनः उद्भिनत्तीव उद्भिद्य उत्पद्यते इवेत्यर्थः ।

मन्ये तदेतत् फलति शापवद्वचनं पितुः ॥ ७५ ॥
पित्रोर्यदि प्रियं कर्तुं यावच्छक्यं न शक्नुयाम् ।
तथापि त्वप्रियं नैव करिष्यामीति मे मतिः ॥ ७६ ॥
पुत्रं प्रति पितुः स्नेहः कियानिति न वेद्मि चेत् ।
तथाप्यनुमिनोमीमं दृष्ट्वा श्रुत्वा परस्य च ॥ ७७ ॥
श्रुतो दशरथः पुत्रमेकं त्यक्त्वा चतुर्ष्वपि ।
ममार तद्वियोगस्य रुजा सोढुमशक्यया ॥ ७८ ॥
मन्ये दशरथस्येव पितुः सर्वस्य चेतसि ।
आयते पुत्रविश्लेषे व्यथा मर्मनिकृन्तनी ॥ ७९ ॥
पितुराज्ञाविघातेन न पुनर्व्यथयामि तम् ।
रामो दशरथस्येव धारयामि पितुर्गिरम् ॥ ८० ॥
गङ्गास्नानं करिष्यामि पित्रा सह दिने दिने ।
तदनादरपापस्य प्रायश्चित्तं तदस्तु मे ॥ ८१ ॥
इत्यादीनि बहून्यन्तस्तस्य चिन्तयतो मुहुः ।
पेतुरश्रूणि नेत्राभ्यां प्रक्षाल्येव हृदो मलम् ॥ ८२ ॥
किञ्चित् प्रसन्नहृदयस्त्यक्त्वाश्रु सहसंशयम् ।
निश्चित्य पित्रोरत्यागमुत्तस्थौ सरसस्तटात् ॥ ८३ ॥
पश्यन्निव पितुर्मूर्त्तिं पुरः स स्नेहकोमलाम् ।
गृही प्रातिष्ठत गृहमनुरक्ते दिनेश्वरे ॥ ८४ ॥
भूदेवस्याथ मनसो निष्क्रान्तमिव सर्वतः ।
अन्धकारं दिशो व्यापत् सदसद्दृष्टिरोधकृत् ॥ ८५ ॥
अन्धकारनिरुद्धेऽपि पथि गच्छन् स नास्खलत् ।
ज्ञानप्रदीपभासेव पुरो दर्शितसत्पथः ॥ ८६ ॥

---

८१ । तदनादरपापस्य तस्य पितुरनादरः स एव पापं तस्य ।

८२ । अन्तः करणे चिन्तयतः । हृदो मलं संशयरूपम् ।

८३ । सहसंशयं संशयेन सह वर्तमानं अश्रु त्यक्त्वा ।

८४ । दिनेश्वरे सूर्ये अनुरक्ते ततः परं रक्तवर्णे सति अथच अनुरक्ते अनुरागवति सति।

८५ । मनसोऽन्धकारं मोहात्मकं दिग्व्यापकमन्धकारन्तु नैशं तयोरभेदाध्यवसा-
नात् अतिशयोक्तिरिति तन्मूलकोत्प्रेक्षालङ्कारः ।

८६ । अन्धकारेण खीष्टीयमतग्रहणसङ्कल्पेन निरुद्धे आवृतेऽपि पथि सदाचारे ।

भ्रान्त्वापि दिवसं सर्वं विपथे यो हि दारकः ।
सायं गृहपथं पश्येत् सोऽपि जीवेदशङ्कितः ॥ ८७ ॥
अथ प्रविश्य भवनं भूदेवः पादयोः पितुः ।
प्रणम्य तस्थौ विनयी गङ्गास्नात इवानघः ॥ ८८ ॥
विश्वनाथोऽपि भूदेवं हृष्टवद्वीक्ष्य हृष्टवत् ।
वत्स प्रीतश्चिरं जीवेत्याशिषा तमयूयुजत् ॥ ८९ ॥
लक्षणैर्विश्वनाथस्तैः प्रणामविनयादिभिः ।
बुबुधे विबुधः सूनोर्मतस्य परिवर्तनम् ॥ ९० ॥
इत्थं यद्यपि मुक्तवान् ग्रहिलतां खीष्टीयधर्मग्रहे
भूदेवो न तथापि हिन्दुचरिते धर्मे दृढं श्रद्दधे ।
नाकार्षीत् प्रतिमासु दैवतधियं नापूजयच्चापि ताः
विश्वासो यदि नास्ति मा कुरु तदेत्युक्तिं पितुर्धारयन् ॥९१॥

इति श्रीमहेशचन्द्रकृतौ भूदेवचरिते काव्ये
विद्याध्ययनं नामैकादशः सर्गः ॥

द्वादशः सर्गः ।

विद्याध्ययनम् ।

अथाश्रवीभूय विधेरनुग्रहात्
क्रमेण भूदेव उदस्तसंशयः ।
विगाहितुं जह्नुसुतां दिने दिने
जगाम पन्थानमनुव्रजन् पितुः ॥ १ ॥
निरीक्ष्यमाणः पितरं पदे पदे
प्रणम्यमानं निखिलैर्जनैः पथि ।

---

८७ । विपथे विरुद्धे धर्मपथे । गृहपथम् आत्मनो धर्मपथम् ।

८९ । भूदेवं हृष्टवत् हृष्टस्य तुल्यं दृष्ट्वा विश्वनाथोऽपि हृष्टवत् हृष्टस्य तुल्यः स

९१ । ग्रहिलतां निर्बन्धं । दैवतधियं देवबुद्धिं । ताः प्रतिमाः ।

१ । आश्रवीभूय पितुर्वचने स्थितो भूत्वेति सम्बन्धः । वचने स्थित आश्र
इत्यमरः ।

द्विजात्मजो नात्मन एव केवलं
महागुरुं तं जगतोऽप्यमन्यत ॥ २ ॥
पितोच्चकैर्द्यौः परमं तपः पिता
पिता च धर्मः स च मूर्तिरीशितुः ।
ध्रुवं प्रसन्ने पितरि प्रियङ्करे
जगत्पितेशोऽपि खलु प्रसीदति ॥ ३ ॥
स विश्वनाथः प्रससाद तत्पिता
यदा हि भूदेवमनुव्रतं प्रति ।
स विश्वनाथोऽपि जगत्पिता तदा
ध्रुवं प्रसन्नोऽजनि सत्प्रवृत्तिदः ॥ ४ ॥
तथाहि तत्राह्नि कलेजमीयिवान्
द्विजात्मजः पुस्तकमीश्वरेच्छया ।
करे सतीर्थस्य ददर्श कस्यचिद्-
हियुन्स एसेजिति नामधेयकम् ॥ ५ ॥
किमत्र वस्तु प्रतिपादितं सखे
वदेति पृष्टः सहपाठ्युवाच सः ।
इहास्ति भोः ख्रीष्टमतस्य रक्षसो
रदावलीभञ्जनवस्तु किञ्चन ॥ ६ ॥
निशम्य तत् तस्य वचस्तदीक्षितुं
समुत्सुकोऽयाचत विश्वनाथजः ।

---

२ । आत्मनो महागुरुं पितरम् । जगतो महागुरुं महोपदेशकम् ।

३ । उच्चकैरुन्नतः, कीदृगुन्नत इत्याह–द्यौराकाशः आकाशवदुन्नत इत्यर्थः । "खात् पितोच्चतरस्तथा" इति महाभारतोक्तेः । अथवा द्यौः स्वर्गः "पिता स्वर्गः पिता धर्मः पिता हि परमं तपः" इत्युक्तेः । द्योदिवौ द्वे स्त्रियावभ्रं इति, सुरलोको द्योदिवौ द्वे इति चामरः ।

४ । अनुव्रतं अनुगतम् ।

५ । ईयिवान् गतवान् । सतीर्थस्य स्वगुरोः शिष्यस्य ।

६ । वस्तु इतिवृत्तं विषय इति यावत् । रदावली दन्तश्रेणी, भज्यते भिद्यते येन तत्, रदावलीभञ्जनं दन्तभञ्जस्य द्वारम् वस्तु विषयः । किञ्चन अनिर्वचनीयमिति यावत् ।

इदं सखेऽद्यैव निरीक्षितुं मम
त्वमर्पयाहर्वरमेकमन्ततः ॥ ७ ॥
अथ प्रदत्तं सहपाठिनामुना
प्रियेण डेविड् हियुमः कृतिं कृती ।
ददर्श तत्पुस्तकमात्तकौतुकः
पदे पदे कञ्चन हर्षमादधत् ॥ ८ ॥
अधीत्य तत्पुस्तकमात्मतुष्टिदं
स तादृशोऽन्या विविधाश्च पुस्तिकाः ।
पपाठ टम्पेन् गिवनादिनामकैः
सुधीभिरिंलिश्वचसैव निर्मिताः ॥ ९ ॥
विषद्रुबीजं सुचिरेण तस्य तै-
र्यदुप्तमासीद् हृदि मिस्नरीनरैः ।
तदाशु सर्वं ज्वलितो विपश्चितां
ददाह तेषामुपदेशपावकः ॥ १० ॥
स मिस्नरीणां गदितं मतं मतिं
समस्तमेवामनुत प्रतारणाम् ।
पराभिसन्धानमहो कथं भवे-
न्मनोरमा पद्धतिरार्यधर्मिणाम् ॥ ११ ॥
कुलस्य जातेश्च गुरोश्च वञ्चनं
कृतघ्नताया अपि यद्विमोचनम् ।
कथं तदस्त्वाचरणं सतां गतिः
कथं च धर्मः परमस्तदुच्यताम् ॥ १२ ॥

७। अन्ततः एकमहर्दिनं व्याप्य वरं त्वर्पय इत्यन्वयः । अर्थः सुगमः ।

८। आत्तकौतुकः गृहीताध्ययनकौतूहलः । हर्षं प्रीतिमादधत् उत्पादयत पुस्तकम् ।

९। तादृशस्तादृशीः तत्सदृशीरित्यर्थः । तादृशशब्दस्य रूपम् ।

१०। मिस्नरीनरैः पाद्रीनामकपुरुषैः खीष्टधर्मप्रचारकपुरुषैरित्यर्थः ।

११। गदितं वचनं, मतं सिद्धान्तं, मतिं बुद्धिं । आर्यधर्मिणाम् आर्याणां धार्मिकाणां मनोरमः पन्थाः कथं भवेदित्यर्थः ।

१२। विमुच्यते येन तद्विमोचनं कृतघ्नतायास्त्यागसाधनमित्यर्थः । सतां

अहो ममासौ कुरुचिर्विपर्यगात्
प्रमोहनिद्रापगता मदश्च्युतः ।
पितृद्वयं वञ्चयितुं ह्यकारणम्
प्रवृत्तिरासीन्मम मिस्नरीगिरा ॥ १३ ॥
इतीव निश्चित्य यदा स सत्पथं
ददर्श भूयोऽभिजनक्रमागतम् ।
अपृच्छदाहूय सुतं पिता तदा
तमेकदा किञ्चन क्लृप्तसंशयः ॥ १४ ॥
न यद्ययं खीष्टमतं गृहीतवां-
स्तथापि शुद्धाचरणे स्थितो न वा ।
प्रसङ्गिनोऽस्य श्वशुरस्य संश्रवात्
समीपवर्त्ती स हि कृष्णमोहनः ॥ १५ ॥
स खृष्टधर्मी जवनान्नभोजन-
स्तदीयसंसर्गमवाप्य वाप्ययम् ।
सुतोऽपि मे तादृगभोज्यभोजनं
समाचरेदित्यभिशङ्कते मनः ॥ १६ ॥
तदद्य जानाम्यनुयुज्य किं वदेत्

जनानां गतिर्गम्यं कथमस्तु कथं च परम उत्कृष्टो धर्मोऽस्तु तत्कथ्यता मित्यर्थः (नैव भवतीति फलितोऽर्थः) ।

१३ । विपर्यगात् विपरीता अभूत् । प्रमोहो महद्वैचित्र्यं स निद्रेवेति प्रमोहनिद्रा । मदो गर्वः अहमुन्नतिं गच्छामीति अहङ्कारः । पितृद्वयं मातापितरौ ।

१४ । अभिजनक्रमागतं कुलक्रमेणागतम् । किञ्चन कमपि क्लृप्तः कल्पितः संशयः सन्देहो येन ।

१५ । प्रसङ्गिनः प्रकृष्टं सङ्गं कुर्वतोऽस्य भूदेवस्य श्वशुरस्य संश्रवात् सम्बन्धात् सम्पर्कं प्राप्य कृष्णमोहनो हि समीपवर्ती आसन्नः अव्यवहित-सम्पर्कभागित्यर्थः ।

१६ । खृष्टधर्मी खृष्टस्य धर्मं गृहीतवान् । खृष्टशब्दस्य उच्चारणं त्रिविधं श्रूयते खृष्टेति खिष्टेति खीष्टेति च इत्यतः तस्य शब्दस्य त्रिरूपत्वं कल्प्यते इति खृष्टेत्युक्तं । वाप्ययं अयमपि वेत्यर्थः ।

कदापि मन्ये वितथं न मे वदेत् ।
चिरस्य सत्यं व्रतमेष चेत्त्यजेत्
तदा चिकित्सास्य रुजः कथं भवेत् ॥ १७ ॥
इति स्वयं शङ्कितवानमङ्गलं
स विश्वनाथाभिधतर्कभूषणः ।
तनूजमाहूय समन्वयुङ्क्त तम्
प्रियेषु वात्सल्यमघं हि शङ्कते ॥ १८ ॥
कुटुम्बगन्धं श्वशुरान्वयेन ते
बिभर्त्ति वन्द्यो इति कृष्णमोहनः ।
श्रुतं मया तस्य किलानुरोधत-
स्त्वमप्यभोज्यं बत भुक्तवानिति ॥ १९ ॥
जनश्रुतिः सा किमृताथवानृता
न वेद्मि तत्त्वं वद त्वमेव मे ।
जनोऽन्यथा वृत्तमपीक्षतेऽन्यथा
मनस्तु जानात्यखिलं यथातथम् ॥ २० ॥
पवित्रगोत्रप्रभवस्त्वमुन्नतिम्
प्रयातुमेवार्हसि कल्पवृक्षवत् ।

---

१७ । अनुयुज्य पृष्ट्वा । अस्य भूदेवस्य रुजो मनोविकारस्य चिकित्सा प्रतीकारः ।

१८ । समन्वयुङ्क्त सम्यक् पप्रच्छ । अघं शङ्कते अनिष्टशङ्कां जनयतीत्यर्थः । स्नेहः पापमाशङ्कते इतिवत् अन्तर्भूतण्यर्थः ।

१९ । कुटुम्बगन्धं कुटुम्बसम्बन्धलेशम् । वन्द्यो इतीत्यत्र सर्वमनुकरणे वा इत्यनेन सूत्रेण सन्धिनिषेधः ।

२० । ऋता सत्या अनृता मिथ्या । तत्त्वं यथार्थं न वेद्मि तत् तस्मात् त्वमेव मे मम समीपे वद । यथातथं यत् यथा यादृशप्रकारं तत् तथा तादृशप्रकारमेव जानाति ।

२१ । पवित्रमपापं गोत्रं कुलं प्रभवत्यस्मादिति प्रभवः कारणं यस्य स पवित्रगोत्रप्रभवः पुण्यवंशोत्पन्नस्त्वमसि, कल्पवृक्षोऽपि पवित्रगोत्रः पावनो हेमाद्रिः प्रभवः कारणं यस्य तादृशो भवति । यशांसि प्रसृ-

यशःप्रसूनः फलितश्च सद्गुणै-
रधस्तु गन्तुं जडवन्न युज्यसे ॥ २१ ॥
इतीरितोऽसौ जनकेन सत्यवाङ्-
महागुरुं प्रत्यवदत् तमार्तवत् ।
गतागतं तस्य गृहे क्वचित्क्वचित्
करोमि सत्यं न तु पानभोजनम् ॥ २२ ॥
न कृष्णबन्धोऽनुरुणद्धि मामसौ
गृहेऽशितुं पातुमथापि कर्हिचित्
स्वदोषशङ्की नियतं शुचीन् परा-
ननिच्छतो दूषयितुं स शङ्कते ॥ २३ ॥
कदापि शङ्केऽनुरुणद्धि यद्यसौ
तथापि तद् भक्षयितुं न शक्ष्यति ।
यदन्नमस्तु भवतः पुरो गतो
न पारयेऽहं न तु भोक्ष्य एव तत् ॥ २४ ॥
इतीदमाकर्ण्य सुतस्य भाषितं
जहौ चरित्रं प्रति तस्य संशयम् ।
उवाच च स्नेहरसार्द्रया गिरा
पिता तदार्तिं शमयन्निवात्मवान् ॥ २५ ॥
वचः समीचीनमवैमि तात ते
जनास्तु मिथ्या ब्रुवते धृतच्छलाः ।

नानि इव पुष्पाणीव शुभ्राणि यस्य, कल्पवृक्षपक्षे तु यशांसीव शुभ्राणि प्रसूनानि यस्य तादृशः । सद्गुणैः फलितः फलवान् सद्गुणैर्दयादाक्षिण्यादिभिः फलैरिव इत्यर्थः । ईदृशस्त्वं कल्पवृक्षवदेव उन्नतिं गन्तुमर्हसि । जडवत् जलसदृशः सन् अधो गन्तुं न युज्यसे नार्हसि जलमपि पवित्रगोत्रप्रभवं पवित्रपर्वतजातं भवति अथच जडवत् मूर्खवत् अधो गन्तुं न युज्यसे ।

२४। न तु नैव तु तत् भोक्ष्ये भक्षयिष्यामि इत्यर्थः । अन्यत् सुगमम् ।

२५। आत्मवान् बुद्धिमान् आरोपितेन अपवादेन तस्य आर्तिः पीड़ा जाता इति बुद्ध्वा इत्यर्थः ।

अतः प्रवर्तस्व तथैव ते पुन-
र्न शक्नुयुर्द्रष्टुमपिच्छलं यथा ॥ २६ ॥
इतः परं विस्मर कृष्णमोहनम्
भवान्तरं प्राप्तमिवात्मकर्मभिः ।
स आर्य आसीद् द्विजवंशभूषणः
परन्त्वनार्य्योऽजनि वंशदूषणः ॥ २७ ॥
स शौचमाचारपथञ्च वर्जयन्
पिवत्यपेयं प्रतिषिद्धमत्ति च ।
विसृष्टमूत्रोऽपि न हि स्पृशत्यपो
ध्रुवं न चाचामति भुक्तवानपि ॥ २८ ॥
बिना विधीनाचमनादिकान् बहि-
र्मलीमसोऽन्तर्मलिनश्च पातकैः ।
स नार्हति स्पर्शमपि द्विजन्मनां
कुतः पुनः संगतसत्कथादरान् ॥ २६ ॥
सुरां निपीयोभयथा पतत्यधो
मदेन पापेन च चालितः पदात् ।
तथापि नाधः पतनं स बुध्यते
दिवापि सूते बलवत्तमो मदः ॥ ३० ॥

२६ । समीचीनं सत्यम् ।

२७ । भवान्तरं जन्मान्तरम् ।

२८ । अपेयं सुरादिकं पिवति । प्रतिषिद्धं निषिद्धं जवनान्नादिकमत्ति भुङ्क्ते । विसृष्टमूत्रोऽपि मूत्रं त्यक्तवानपि ।

२९ । आचमनादिकान् विधीन् अनुष्ठानानि विना बहिर्मलीमसो बाह्ये मलिनः । पातकैः सुरापानादिभिश्च अन्तः अन्तःकरणे मलिनः । संगतं मैत्री, सत्कथा मिथो भाषणम्, आदरः सम्भावना ।

३० । उभयथा उभाभ्यां प्रकाराभ्यां पदात् चालितः । मदेन मदिरापानजनितेन ग्लेपनेन पदाचरणाच्चालितः । पापेन च पदात् ब्राह्मण्यरूपादधिकारा-च्चालितः इति उभयथा चालितः । अधः पतति क्षितितले नीचभावेन च पततीत्यर्थः । मदो हि दिवापि दिवसेऽपि बलवत्तमो दुर्वारमज्ञानरूपं ध्वान्तं सूते जनयति अतो न बुध्यते ।

गतागतं तस्य विवर्जयालये
तदीयसंसर्गमपि त्यजाशुचिम् ।
स्वयं सुरापा न पतन्ति केवलं
निपातयन्ति स्पृशतोऽपि तेऽपरान् ॥ ३१ ॥

तृणाय मत्वा महतीमुपक्रियां
त्यजन्ति मातापितरौ य उद्धताः ।
अकार्यमेषां निजधर्ममुज्झतां
कृतं घ्नतां हन्त किमस्ति संसृतौ ॥ ३२ ॥

मलं विसृज्यापि जलं स्व न स्पृश-
त्यपेतशौचः स वृटिश्पथानुगः ।
परन्तु पत्रैः खलु कागजाभिधैः ।
पटैश्च जीर्णैः कुरुतेऽङ्गमार्जनम् ॥ ३३ ॥

इजारनाम्नोऽधरवाससश्छिदा
भयेन चोर्द्धस्थित एव दुर्मतिः ।
स मूत्रमुज्झन्नपि मूत्रशीकरैः
परागतैर्वाससि गृह्यते पुनः ॥ ३४ ॥

शिशोः पशोर्वाचरणं यथाविधं
तथाविधं तस्य च तर्कयाम्यहम् ।
शिशोर्मलं जीर्णपटैः प्रमृज्यते
पशोश्च शौचाचमनं न विद्यते ॥ ३५ ॥

पशुर्यथोच्छिष्टमुखोऽवतिष्ठते
तथा स तिष्ठत्यहहाशुचिः सदा ।
इहैव जातोऽपि शुचौ द्विजान्वये
भवान्तरं किं नु पशुत्वमागतः ॥ ३६ ॥

---

३१ । सुरां पिबन्तीति सुरापाः ।

३२ । उद्धता गर्वादिभिरुच्छृङ्खलाः ये, संसृतौ संसारे अकार्यं किमस्तीत्यर्थः ।

३४ । इजारनाम्नः पेण्टलन्-नामकस्य, ऊर्द्धस्थितो दण्डायमानः ।

३६ । इहैव इह जन्मन्येव पवित्रे द्विजवंशे ब्राह्मणकुले जातोऽपि पशुत्वं पशुजातिरूपं भवान्तरं जन्मान्तरं किं नु आगतः प्राप्तः । किं न्विति उत्प्रेक्षायाम् ।

सदा कदाचारपथेष्वपि स्थिता
बहिः प्रमृष्टा धृतधौत कञ्चुकाः ।
कपित्थवत् खृष्टमतावलम्बिनो
बहिर्द्दशामेव भवन्ति वल्लभाः ॥ ३७ ॥
विसृज्य विण्मूत्रमनम्बुशौचभाक्
कदाचिदुच्छिष्टमुखोऽथवा यदि ।
त्वमेव भूदेव विमृश्य मे वद
प्रसन्नमात्मानमवैषि वा न वा ॥ ३८ ॥
इति श्रुतिस्मृत्युपदर्शितं हितं
सशौचमाचारपथं विधानवित ।
पितोपदिश्य प्रियमात्मजं तदा
स्वयं हृदालोचयितुं व्यसर्जयत् ॥ ३९ ॥
यथा यथा युक्तिपथान् समुन्नता-
नयं स्वधर्मस्य खलूपदिश्यते ।
पवित्रतामेव तथा तथा पटः
पुनः पुनर्धौत इवाभिपद्यते ॥ ४० ॥
गुरूपदेशव्यतिरेक एव मे
सुतस्य नूनं कुमतेः प्रयोजकः ।

---

३७ । कञ्चुकं कोट् आंयेष्टकोट् प्रभृतिवस्त्रं । कपित्थं महाकालनामकं रक्तवर्णं बहिः सुदृश्यम् अन्तर्मलिनं फलं । मृच्छकटिकप्रकरणे किं कपित्थेन भग्नेन इत्यत्र तादृशार्थस्य दृष्टत्वात् ।

३८ । हे भूदेव त्वमेव विष्ठामूत्रं त्यक्त्वा अम्बुशौचरहितः सन् अथवा भुक्त्वा उच्छिष्टमुखः सन् यदि आत्मानं प्रसन्नं पवित्रं मन्यसे तर्हि विमृश्य विचार्य्य वद, कदापि नैव मंस्यसे इतिभावः, अतः स आत्मप्रसादरहित एव सदा तिष्ठतीतिभावः ।

३९ । सशौचं शौचेन सह वर्तमानम् ।

४१ । व्यतिरेकः अभावः । अन्यथा अस्य भूदेवस्य सा मतिः सुखेन अकष्टेन कथं परिवर्तते प्रत्यागच्छति । अकष्टार्थे प्रियसुखेन वा इत्यनेन सूत्रेण विकल्पस्य विधानात् द्विरुक्त्यभावः ।

ममोपदेशैः कथमन्यथास्य सा
सुखेन सद्यः परिवर्तते मतिः ॥ ४१ ॥
दिने दिने धर्मरहस्यमस्य त-
न्मयोपदेष्टव्यमवश्यमुन्नतम् ।
इति स्वयं निश्चितवानुपादिशत्
तदादि सूनुं प्रति तर्कभूषणः ॥ ४२ ॥
निषण्णमन्येद्युरुपेत्य सन्निधौ
तनूजमाभाषत तर्कभूषणः ।
बुभुत्ससे त्वं यदि तत्त्वमैश्वरं
तदात्मतत्त्वं प्रथमं निबोध मे ॥ ४३ ॥
अहं सुखीत्यादिषु धीषु धीमता-
महम्पदं वाचकमात्मनः खलु ।
स एव चात्मा परमात्मनोऽपृथङ्-
महेश्वरश्चोपनिषत्सु स स्मृतः ॥ ४४ ॥
स विश्वरूपं विदधाति सृष्टये
लये तदेव प्रतिसंहरत्यपि ।
गुणस्य सृष्टिप्रतिसंहृती उभे
यथोर्णनाभः कुरुते तथा स च ॥ ४५ ॥
न कोऽपि धर्मोऽस्ति विरुद्ध ईशितुः
स सर्वधर्मा स च सर्वशक्तिभाक् ।

---

४२ । धर्मरहस्यं धर्मतत्त्वं । तदादि तत्प्रभृति तत आरभ्येत्यर्थः ।

४३ । अन्येद्युरन्यस्मिन्नहनि निषण्णमुपविष्टं । तनूजं पुत्रं । सन्निधौ समीपे उपेत्य उपगम्य । बुभुत्ससे बोद्धुमिच्छसि । निबोध बुध्यस्व । ऐश्वरं तत्त्वं ईश्वरस्य याथार्थ्यम् ।

४५ । ऊर्णनाभो लूता मर्कटकविशेषः (माकड़शा इति ख्यातः कीटः) गुणस्य सूत्रस्य सृष्टिप्रतिसंहारौ यथा कुरुते आत्मशरीरात् सूत्रं निर्गमयति पुनरात्मन्येव प्रतिसंहरति तथा स परमात्मा गुणस्य सत्त्व-रजस्तमोरूपस्य सृष्टिप्रतिसंहारौ आत्मनैव करोतीति भावः ।

४६ । कोऽपि धर्मो गुणः ईश्वरस्य विरुद्धो नास्ति स्थूलत्वसूक्ष्मत्वादिक-

सतीषु सर्वास्वपि शक्तिषु प्रभुः
न शक्नुयाद्धारयितुं कथं तनुम् ॥ ४६ ॥
स रूपहीनोऽपि बिभर्त्ति लीलया
बहूनि रूपाणि विभुर्नटो यथा ।
करोत्यपादोऽपि स सर्वतो गतिम्
विनापि दृष्टिं निखिलं च पश्यति ॥ ४७ ॥
अनन्तमेकं निरुपाधि वस्तु य-
ज्जनैर्न तद्धारयितुं च शक्यते ।
तथा ह्यनन्तस्य तलं च मण्डलम्
प्रजाभिराभिर्गगनस्य कल्प्यते ॥ ४८ ॥
तदैश्वरं वस्तु न शक्नुवन्ति चेज्-
जना अपि ध्यातुमुपासतां कथम् ।
उपासकानां फलसिद्धये ततो
विभोररूपस्य च रूपकल्पना ॥ ४९ ॥
समाधिमन्तो निरुपाध्युपासते
सुषुप्तवत् किञ्चन वस्तु तन्महत् ।

इत्यर्थः । अतः स सर्वधर्मा सर्वप्रकारगुणविशिष्टः सर्वशक्तिविशिष्ट श्च, यद्येवं तर्हि कथं तस्य शरीरधारणशक्तिर्न सम्भवेत् इति भावः।

४७ । बहूनि रूपाणि बिभर्त्ति इत्यत्र प्रमाणम् "नमस्ते बहुरूपाय विष्णवे परमात्मने" इति श्रुतिः ।

४८ । तथाहि पूर्वोक्तस्य प्रमाणं अनन्तस्य गगनस्य आकाशस्य प्रजाभिः तलं कल्प्यते गगनतलं हि उच्यते एवं मण्डलं च गोलञ्च कल्प्यते गगनमण्डलमुच्यते ।

४९ । तत् ऐश्वरं वस्तु परमात्मतत्त्वं निरुपाधि निर्विकारं ब्रह्मेत्यर्थः चेद् यदि जना ध्यातुमपि न शक्नुवन्ति तदा कथं उपासतां तत्त्वं भज-न्तां, ततो हेतोः उपासकानां प्रयोजनस्य स्वर्गादेः सिद्धये अरूपस्य विभोः परमात्मनो रूपकल्पना इत्यर्थः ।

५० । समाधिमन्तो योगवन्तः "योगश्चित्तवृत्तिनिरोधः" विषयेभ्यश्चित्तवृत्ति-निवर्त्तनं तद्विशिष्टा जना एव सुषुप्तवत् सुषुप्तमिव निरुपाधि किञ्चन

परे तु कृष्णारुणपाण्डरादिभि-
र्भजन्ति रूपैः पुरुषं समक्षवत् ॥ ५० ॥
महेशितुः सत्त्वरजस्तमोमया-
न्युपासते तानि वपूंषि हिन्दवः ।
विलोक्य तेषां प्रतिमाः पुरो गताः
न हिन्दवः पुत्तलिकामुपासते ॥ ५१ ॥
इति ब्रुवन्नेव सुतेन धृष्टवत्
स तेन शास्ता गुरुरप्यपृच्छ्यत ।
अतिप्ररूढे प्रणये हि नोभयं
न चाथ लज्जा लभते पदं हृदि ॥ ५२ ॥
विभोरमूर्तस्य यदि प्रकल्पिता-
यदृच्छया विष्णुशिवादिमूर्त्तयः ।
वृथैव मन्ये तदुपासनां तदा
खपुष्पमाराधयतोऽस्ति किं फलम् ॥ ५३ ॥
वयं च तस्यान्यविधां यथारुचि
प्रकल्प्य मूर्त्तिं न कथं भजाम ताम् ।
फलं कथं तद्भजनस्य तादृशं

अनिर्वचनीयं वस्तु उपासते अनुभवन्ति निर्विकल्पकज्ञानेन प्राप्नुवन्तीत्यर्थः । परे तु विषयासक्ताः पुनः कृष्णेन रूपेण पुरुषं विष्णुं अरुणेन रक्तेन रूपेण ब्रह्माणं पाण्डरेण शुक्लेन रूपेण शिवं समक्षवत् प्रत्यक्षज्ञानगोचरमिव भजन्ति ध्यायन्ति इत्यर्थः ।

५१ । पञ्चाशत्तमश्लोकस्य उत्तरार्द्धे यदुक्तं तदेव विवृणोति महेशितुरित्यनेन । सत्त्वरजस्तमोमयानि वपूंषि विष्णुब्रह्मशम्भुस्वरूपाणि उपासते ध्यायन्ति पूजयन्ति च । किं कृत्वा इत्याह—तेषां पुरोगता अग्रे स्थिताः प्रतिमाः प्रतिकृतीर्विलोक्य, अतस्ते पुत्तलिकां न ध्यायन्ति पुत्तलिकात्वेन रूपेण न ध्यायन्तीति भावः ।

५३ । विभोरिति । यदि ता मूर्तयः प्रकल्पितास्तर्हि वस्तुतो न सन्ति न च आसन् अत आकाशपुष्पवत् अलीका एव ता मूर्तयः तासां उपासनां वृथैव मन्ये आकाशपुष्पमाराधयतो जनस्य यथा फलं नास्ति तथेत्यर्थः ।

न वापि सिध्येदिति संशयो मम ॥ ५४ ॥
निशम्य तं प्रश्नमगाधधीः पिता
सुतस्य तस्योत्तरपत्तमाददे ।
विभोर्महेशस्य जनैर्यदृच्छया
न कल्पितास्तास्तनवो गुणाश्च ते ॥ ५५ ॥
प्रकल्पयामास महेश एव ता-
स्तनूः स्वयं कारुणिको युगे युगे ।
अनुग्रहीतुं बहुधा सतोऽसतो
विनिग्रहीतुं च वृषञ्च रक्षितुम् ॥ ५६ ॥
यदा यदा ग्लायति पुण्यपादपो
यदा यदोदेति च पापकण्टकः ।
तदा तदात्मानमतर्क्यवैभवः
सृजन्निवाविर्भवतीह स प्रभुः ॥ ५७ ॥
इति स्वगीतोपनिषत्सु जिष्णवे
जगौ जगद्वीजमधोक्षजः स्वयम् ।
वयन्तु सिद्धान्तमिमं न नूतनम्
प्रकल्पयामो निजबुद्धिवैभवैः ॥ ५८ ॥
विशुद्धसिद्धान्तमिमं सनातनं
न केवलं हिन्दव एव मन्वते ।
इदन्तु सर्वेऽप्यनुगृह्णते मतं
गुणो हि सर्वत्र विचीय गृह्यते ॥ ५९ ॥

५६। सतः सज्जनान् अनुग्रहीतुम्। असतो जनान् कंसादिरावणादिवद् दुर्जनान् विनिग्रहीतुं दण्डयितुं तथा वृषं धर्मं रक्षितुं दुर्जनेभ्यस्त्रातुमित्यर्थः।

५७। पुण्यं धर्मः स एव पादपो वृक्षः, पापं कण्टकः। तथा च भगवद्गीतायां "यदा यदा हि धर्मस्य ग्लानिर्भवति भारत। अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहं॥ परित्राणाय साधूनां विनाशाय च दुष्कृतां। धर्मसंस्थापनार्थाय सम्भवामि युगे युगे" इति।

५८। जिष्णवे अर्जुनाय। जगौ कथयामास। जगद्वीजं जगतः कारणरूपोऽधोक्षजो विष्णुः।

५९। गुणो हि सर्वत्र विचीय अन्विष्य गृह्यते इत्यर्थः। अतः खृष्टभक्ता अपि

योऽन्धेभ्यः पथि दर्शनं नयनवद् धर्मं वृटिश्भ्यो ददौ
भक्ताः ख्रीष्टमनाकृतेरपि सुतं प्राहुर्महेशस्य तम् ।
तादात्म्यं च विरुद्धयोरपि तयोर्निर्मूर्तिमर्त्यात्मनोः
स्वीकुर्वन्ति विगर्हयन्ति च परान् हा धिक् पुरोभागिनः॥६०॥
शरीरस्वीकारे जगदधिपतेर्नास्ति विमति-
र्न तस्य ध्याने न प्रतिकृतिविधाने च निकृतिः ।
तथाहि ख्रीष्टार्चां प्रणतशिरसोऽर्चन्ति लिखितां
तदीया भक्ता ये परमतपरीवादपिशुनाः ॥ ६१ ॥
ख्रीष्टस्य प्रतिमां विकल्प्य लिखितामप्याद्रियन्ते न किं
ख्रीष्टाभिन्नतया जगत्प्रभुतया ख्रीष्टं च तत्सेवकाः ।
मूर्तिं तेऽपि निराकृतेरपि विभोर्मन्यन्त एव ध्रुवं
स्वान् दोषान् परनिन्दका न गणयन्तोऽन्यांस्तु निन्दन्ति तैः॥६२॥
फलार्थिनः कर्मयुजो भजन्ते

गुणभिन्नं गृह्णन्त्येव इति अग्रे दर्शयिष्यते ।

६० । यः ख्रीष्टः अन्धेभ्यो हिताहितपर्यालोचनारहितेभ्यो वृटिश्भ्यः वृटन्-देशजेभ्यो लोकेभ्यः पथः स्वर्गपथस्य दर्शनं—दर्श्यतेऽनेन इति दर्शनं दृष्टिसाधनं धर्मं नयनवत् नयनमिव ददौ, तं ख्रीष्टं तद्भक्ताः अनाकृते-रपि आकाररहितस्यापि महेशस्य परमेश्वरस्य सुतं प्राहुर्वदन्ति । तयोः परमेश्वरख्रीष्टयोर्निर्मूर्त्तिमर्त्यात्मनोः परमेश्वरो निर्मूर्तिः ख्रीष्टश्च मर्त्य-मूर्तिरिति विरुद्धयोरपि तादात्म्यमभेदं स्वीकुर्वन्ति, अथ च परान् हिन्दून् विगर्हयन्ति निन्दन्ति । पुरोभागिनः दोषमात्रद्रष्टॄन् तान् धिक् हा खेदे ।

६१ । जगदधिपतेः परमेश्वरस्य शरीरस्वीकारे कस्यापि विमतिर्मतिविरोधो नास्ति, तस्य शरीरस्य ध्याने चिन्तायाम् प्रतिकृतेः प्रतिमाया विधाने निर्माणे च निकृतिर्निकारः पराभवः शाठ्यं वा न—नास्तीत्यर्थः । अन्यत् सुगमम् ।

६२ । विकल्प्य कल्पयित्वापि लिखितां न तु दृष्ट्वा लिखितां ख्रीष्टस्य तदानीं प्रतिमाया अभावादिति भावः । ख्रीष्टाभिन्नतया ख्रीष्टस्वरूपेणाद्रियन्ते ख्रीष्टं च जगत्प्रभुस्वरूपेण आद्रियन्ते । अतस्तेऽपि निराकारस्य परमेश्वरस्य आकारं मन्यन्ते एव स्वीकुर्वन्ति एव तैर्दोषैरन्यान् पुनर्निन्दन्ति इत्यर्थः ।

गुणाम्बुधिं साकृतिमीश्वरं यम् ।
तमेव नैष्कर्म्ययुजो निरीहा
उपासतेऽनाकृतिमद्वितीयम् ॥
उपासनायाः परमस्य पुंसो
द्वावेव मार्गौ कथितौ मुनीन्द्रैः ।
प्रवृत्तिभेदादधिकारिभेदात्
समाश्रयत्यन्यतरन्तु लोकः ॥ ६४ ॥
भूदेव त्वमपि स्वयं मम वचो भूयः समालोचयेः
सन्देहस्तदपीह ते यदि भवेत् पृच्छेः पुनर्मां तदा ।
इत्युक्त्वा विरतो व्यसर्जयदमुं दीर्घावधानासहं
श्रीमन्तं तनयं नयाम्बुजरविः श्रीविश्वनाथः कविः॥ ६५ ॥

इति श्रीमहेशचन्द्र-कृतौ भूदेव-चरिते काव्ये गुरूपदेशो नाम द्वादशः सर्गः ॥

त्रयोदशः सर्गः ।

विद्याध्ययनम् ।

उपदेशैः पितुस्तैस्तैर्भूदेवः स्निग्धपावनैः ।
गाङ्गैः स्नात इवाम्भोभिः प्रत्यपद्यत निर्वृतिम् ॥ १ ॥

---

६३ । कर्माणि युञ्जन्ति इति कर्मयुजो गृहस्थाः । गुणाम्बुधिं दयादाक्षिण्यादीनां सत्वादीनां च गुणानां समुद्रं अतएव आकारयुक्तं यं भजन्ते नैष्कर्म्ययुजः कर्माभाववन्तो निरीहा निःस्पृहा योगिनः अनाकृतित्वेन अद्वितीयत्वेन च तमेव उपासते जानन्ति ।

६४ । परमस्य पुंसः परमात्मनः। प्रवृत्तिभेदाद् रुचिभेदात् । अन्यतरं तयोर्मध्ये एकतरं मार्गं । समाश्रयाति सेवते ।

६५ । दीर्घं दीर्घकालस्थायि अवधानं एकचित्तता तस्य असहं सहनासमर्थं चञ्चलत्वादिति भावः । नया नीतय एव अम्बुजानि पद्मानि तेषां रविः, अम्बुजानां रविर्यथा प्रकाशकः तथा नीतीनां प्रकाशक इत्यर्थः । कविः काव्यकर्ता पण्डितः । अन्यत् सुगमम् ।

शरदीव जलं पङ्कादथवा खतलं घनात् ।
संशयांन्मुमुचे तस्य स्वभावशुचि मानसम् ॥ २ ॥
धर्मोपदेशलुब्धः स स्वयं पितरमासदत् ।
चातकोऽब्दं यथेन्दुं वा चकोरोऽमृतलोलुपः ॥ ३ ॥
अथैकदा स्वयं प्राप्तं भूदेवं तर्कभूषणः ।
उपादिशद्वेदमातुः सावित्र्या अर्थमर्थवित् ॥ ४ ॥
जनकः सविता देवस्तस्य भर्ग इति स्मृतम् ।
तेजो ध्यायेम हि वयं यः प्रेरयति नो धियः ॥ ५ ॥
उभौ द्विजानां जनकौ पिता ह्याचार्य्य एव च ।
गार्भं जन्म ददात्येको ब्राह्ममन्यो ददाति च ॥ ६ ॥
सवितृत्वं जनन्याश्च विद्यते जननी च तत् ।
सवितेति स्मृता लिङ्गं त्वृषिभिर्न विवक्षितम् ॥ ७ ॥
आदित्यश्चैष सविता जगत्प्रसवकारणम् ।
आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ॥ ८ ॥
परमात्मापि सविता जगतामविता पिता ।
निरिन्द्रियोऽपि सर्वज्ञो निर्मूर्तिरपि मूर्त्तिकृत् ॥ ९ ॥
भजन्ति मातापितरावाचार्य्यं च द्विजातयः ।
साक्षाद्धि सवितारस्ते तेषां जन्मप्रदास्त्रयः ॥ १० ॥
पिता हि गर्भमाधत्ते माता सूते च रक्षति ।
ददाति तत आचार्य्यो ब्रह्मजन्म च पावनम् ॥ ११ ॥
पितरावेकजातीनां सवितारावुभौ मतौ ।

---

३ । अमृतलोलुपो जललुब्धश्चातको यथा मेघमासीदति यथा वा सुधालुब्धश्चकोरश्चन्द्रमासीदति तद्वदित्यर्थः ।

६ । एकः पिता गार्भं जन्म ददाति अन्य आचार्य्यः ब्राह्मं जन्म वेदेऽधिकाररूपं जन्म ददातीत्यर्थः ।

७ । जनन्या यदि सवितृत्वं तर्हि सवित्रीति कथं नोक्तमित्यत आह लिङ्गं न विवक्षितमिति ।

९ । अविता रक्षाकर्ता, अवरक्षणप्रीणनयोरित्यस्य रूपम् ।

१० । अत्र प्रमाणं मनुसंहितायां द्वितीयाध्याये १४५ । २२५ । २२७ । २२९ । २३० । २३१ । २३२ । २३३ । २३४ ।

न ते द्वितीयमर्हन्ति पावनं ब्रह्मजन्म यत् ॥ १२ ॥
ऊर्द्ध्वादूर्द्ध्वतरं ये तु सन्तः पश्यन्ति कारणम् ।
आदित्यमपि तेषां ते सवितारं प्रचक्षते ॥ १३ ॥
आदित्यमण्डले ब्रह्मा विष्णुश्चादित्यमण्डले ।
सन्निधत्ते महादेवः कालोऽप्यादित्यमण्डले ॥ १४ ॥
आदित्यस्यापरिच्छेद्या यावद्व्याश्नुवतेऽशवः ।
तावद् भगवतस्तस्य मण्डलं परमम् महत् ॥ १५ ॥
आदित्यमण्डले देवाः सर्वे सन्निहिताः किल ।
क्षणादयश्च कल्पान्ताः कालास्तत्र प्रतिष्ठिताः ॥ १६ ॥
जन्यानां जनकः कालो जगतामाश्रयो मतः ।
कालस्याप्याश्रयः श्रीमानादित्यो द्योतते दिवि ॥ १७ ॥
ततोऽप्यूर्द्ध्वतमं हेतुं योऽन्विष्यति सुदूरदृक् ।
परमात्ममयं ज्योतिर्निदानमनुमाति सः ॥ १८ ॥
नोपसीदति चक्षुस्तत् न घ्राणं न त्वगिन्द्रियम् ।
न रसज्ञा न च श्रोत्रं दूरगं नापि वा मनः ॥ १९ ॥
वाचोऽपि विनिवर्तन्ते यदप्राप्य परात्परम् ।
अन्येभ्यस्तत्र तन्नेति व्यावर्तयति च श्रुतिः ॥ २० ॥
को वा तं परमात्मानमुपासीत सुदुर्ग्रहम् ।
उपासनाया न वयं मूढास्तस्याधिकारिणः ॥ २१ ॥
प्रत्यासन्नोऽपि दूरः स आत्मीयोऽपि परात्परः ।
अधिष्ठातापि सर्वेषामिन्द्रियाणामनीन्द्रियः ॥ २२ ॥

१२। एकजातीनां शूद्राणां, तेषां हि द्वितीया जातिर्जन्म नास्तीति भावः।

१३। तेषां मातापित्रोराचार्य्यस्य च कारणं वदन्तीत्यर्थः।

१५। अपरिच्छेद्या इयत्तया कियद्दूरं गता इति निर्धारयितुमशक्याः।

१९। अत्र "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह" इत्यादय उपनिषदः प्रमाणम्।

२०। तन्न तन्न इति कृत्वा इन्द्रियशरीरादिभ्यो व्यवच्छिनत्ति न तु स्वरूपत कथयति।

२१। सुदुर्ग्रहं सुदुर्ज्ञेयम्।

२२। प्रत्यासन्नोऽपि शरीरावच्छेदेन स्थितोऽपि दूरोऽज्ञातः। आत्मीयोऽपि जी-

तद्वत्स तस्माद्विरम दुर्ग्रहात्परमात्मनः ।
किमार्द्रकवणिक् कुर्य्यान्महापोतप्रवृत्तिभिः ॥ २३ ॥
उपतिष्ठस्व सावित्र्या सवितारं निरञ्जनम् ।
प्रीतो देवः स ते देयाद्दिव्यां ज्योतिष्मतीं दृशम् ॥ २४ ॥
सन्ध्यापि तात सावित्र्या जपस्येवाङ्गमुन्नतम् ।
सन्ध्योपासनया शुद्धः सावित्रीं जपति द्विजः ॥ २५ ॥
प्राणायामैराचमनैरघमर्षणऋग्जपैः ।
सूर्योपस्थानमन्त्रैश्च शुध्यत्यन्तर्बहिर्द्विजः ॥ २६ ॥
सूर्यो ह्यनीकं देवानां विश्वेषां नयनञ्च सः ।
जगतां स्थावराणां च सूर्य्य आत्मा तमोपहः ॥ २७ ॥
व्रतो ध्यात्वैव गायत्रीं जपति प्रयतो द्विजः ।
गायत्रीच्छन्दसां माता ब्रह्मयोनिर्वरप्रदा ॥ २८ ॥
सन्ध्यात्रयमुपासीत श्रद्धयाहरहर्द्विजः ।
अन्यथा निष्फलं तस्य कर्म काशप्रसूनवत् ॥ २९ ॥
वर्थं किं वा फलं ब्रूमः सावित्रीजपकर्मणः ।
यदुवाच मनुर्वत्स तदेवावहितः शृणु ॥ ३० ॥
योऽधीतेऽहन्यहन्येतां त्रीणि वर्षाण्यतन्द्रितः ।
स ब्रह्म परमाप्नोति वायुभूतः खमूर्तिमान् ॥ ३१ ॥
एकाक्षरं परं ब्रह्म प्राणायामः परन्तपः ।

वात्मसम्बद्धोऽपि परात्परः उत्कृष्टादुत्कृष्टः । अतीन्द्रियः इन्द्रियागोचरः ।

२३ । महापोतप्रवृत्तिभिः बृहत्समुद्रयानवार्ताभिः ।

२४ । उपतिष्ठस्व आराधय । निरञ्जनं निर्मलम् । दिव्यां दृशं ज्ञानात्मकं चक्षुः ज्योतिष्मतीं अग्नितुल्यत्वादर्चिर्विशिष्टां तथाच "ज्ञानाग्निः सर्वकर्माणि" इति गीतायां ।

२५ । अङ्गं निर्वाहकम् ।

२७ । सूर्यस्य देवानामनीकत्वे सूर्योपस्थापनमन्त्राः प्रमाणम् । अनीकं समूहः ।

२८ । प्रयतः शुचिः । ब्रह्मयोनिर्वेदानां उत्पत्तिकारणम् । वरप्रदा प्रार्थनीय-प्रदा, चतुर्वर्गप्रदेतियावत् ।

३० । अवहितः सावधानः ।

सावित्र्यास्तु परं नास्ति मौनात् सत्यं विशिष्यते ॥३२॥
इतीदमुक्तं मनुना वत्स श्रद्धत्स्व भाषितम् ।
भूयात् प्रसन्नो भगवान् सविता ज्ञानदस्तव ॥ ३३ ॥
इत्युक्त्वा श्रीविश्वनाथो व्यरमत्तर्कभूषणः ।
भूदेवोऽपि पितुर्वाक्यमाप्तवाक्यममन्यत ॥ ३४ ॥
ततःप्रभृति भूदेवः पितरौ परमादरात् ।
असेवत यथाशक्ति जगत्सवितृवत् सदा ॥ ३५ ॥
किं प्राक्तनेन पुण्येन किं पित्रोरथवाशिषा ।
न वेद्मि हेतुना केन मतिस्तस्य परावृतत् ॥ ३६ ॥
अजिघृक्षदितः पूर्वं भूदेवः श्रद्धयैव यत् ।
तन्मिस्नरीणामधुना मतं मिथ्येत्यमन्यत ॥ ३७ ॥
न केवलं स्वयमसौ मिथ्यामन्यत तन्मतम् ।
अन्यानपि सखीन् युक्तितर्कैर्मिथ्येत्यमानयत् ॥ ३८ ॥
वदतां मिस्नरीणां च तर्केणाखण्डयन्मतम् ।
अस्थापयच्च वेदोक्तं धर्मं मर्माविधं द्विषाम् ॥ ३९ ॥
तर्काशनिभृतस्तस्माद् देवेन्द्रादिव दानवाः ।
सशङ्कमन्तर्दधिरे खृष्टधर्मप्रचारकाः ॥ ४० ॥
कतकेनेव पानीयं भूदेवस्याचिरान्मनः ।

---

३२ । एकाक्षरम् ओङ्कारः ।

३३ । श्रद्धत्स्व दृढविश्वासं कुरु ।

३४ । आप्तवाक्यं भ्रमप्रमादविप्रलिप्साशून्यपुरुषोच्चरितं वाक्यम् वेदवाक्यमिति यावत् ।

३५ । जगत्सवितृवत् परमेश्वरतुल्य इति ज्ञात्वा ।

३६ । परावृतत् परिवर्तते स्म ।

३७ । अजिघृक्षत् ग्रहीतुमैच्छत् ।

३९ । वदतामिति अनादरे गम्ये सम्बन्धे वाच्ये षष्ठी । द्विषां मिस्नरीणां । मर्म विध्यतीति मर्मावित् तं धर्मं ।

४० । तर्कोऽशनिर्वज्रमिवेति तर्काशनिः तं बिभर्तीति तर्काशनिभृत् तस्मात् । अन्तर्दधिरे पलायिता बभूवुः ।

विश्वनाथप्रसादेन प्रसादाधिकाधिकम् ॥ ४१ ॥
नुन्नाः पित्रुपदेशेन तस्य चित्तादपासरन् ।
मेघा इव कुसंस्कारा दक्षिणेनानिलेन खात् ॥ ४२ ॥
कदाचिद् भगवद्गीतां वेदान्तानपि कर्हिचित् ।
विश्वनाथोऽपि भूदेवमुदारार्थानुपादिशत् ॥ ४३ ॥
कचिद्रामस्य चरिते पितृभक्तिमुदाहरत् ।
युधिष्ठिरस्य वा मातुर्भक्तिं कचिदवर्णयत् ॥ ४४ ॥
हरिश्चन्द्रस्य कर्णस्य दानकीर्तिं रघोरपि ।
श्रावयामास भूदेवं कदाचित् तर्कभूषणः ॥ ४५ ॥
इत्थं द्वित्रैरेव मासैर्भूदेवः प्रकृतिं ययौ ।
न तिष्ठति चिरं वारिण्युष्मा स्वाभाविकेतरः ॥ ४६ ॥
यो मिस्नरीगिराऽऽकारि नीचया नीचदर्शनः ।
पितुर्गिरा स भूदेवो भूयोऽभूदुच्चदर्शनः ॥ ४७ ॥
खीष्टभक्ता हि पश्यन्ति पाताले गतिमन्तिमाम् ।
हिन्दवस्तूद्र्ध्वलोकेषु पावकेनापि तां गतिम् ॥ ४८ ॥
भूदेवं स्वमतं नेतुं स यत्नो मिस्नरीनृणाम् ।
वैकल्यं केवलं नागात् प्रत्युताभूदनिष्टकृत् ॥ ४९ ॥
खीष्टीयधर्ममैच्छद् यो ग्रहीतुं तैः प्रतारितः ।
सखेव कापथात्तस्माद् भूदेवस्तं न्यवर्तयत् ॥ ५० ॥
रामनारायणः कश्चिद् वन्द्योपाध्यायवंशजः ।
अभवन्मीस्नरीपुंसां कुहके पतनोन्मुखः ॥ ५१ ॥

---

४१ । कतकेन जलनिर्मलीकरणफलविशेषेण निर्मलीति भाषा ।

४२ । नुन्नाः प्रेरिताः ।

४३ । वेदान्तान् उपनिषदोऽर्थान् उदारार्थान् उन्नतार्थान् ।

४६ । द्वित्रैः द्वाभ्यां मासाभ्यां त्रिभिर्वा मासैरित्यर्थः । यतः स्वाभाविकेतरः अस्वाभाविकः, अतश्चिरं न तिष्ठति ।

४८ । खीष्टीयानां हि शवान् मृत्तिकाया अधः स्थापयन्तीति तेषां पाताले गतिर्दृश्यते ।

५० । तैर्मिस्नरीनरैः ।

५१ । कुहकं माया छलमिति यावत् ।

भूदेवस्य स्वसारं य उपायंस्तानुजां पुरा ।
स प्रागुपयमाद्दैषीद् ग्रहीतुं मिस्नरीमतम् ॥ ५२ ॥
भूदेवो व्यवसायं तं तस्य ज्ञात्वा वयस्यवत् ।
सान्त्ववादेन तस्मात्तं निवर्तितुमुपादिशत् ॥ ५३ ॥
अथ भूदेवशर्माणं रामनारायणोऽब्रवीत् ।
वैवेलधर्मो नो भाति साधीयान् हिन्दुधर्मतः ॥ ५४ ॥
धर्मे नो वहवो दोषा दर्शिता मिस्नरीनरैः ।
ते हि धर्मविवादे मां युक्त्या तर्केण चाजयन् ॥ ५५ ॥
हिन्दुधर्मः कुसंस्कारभित्तिको मे न रोचते ।
खीष्टीयधर्ममादातुमहमिच्छाम्यतः सखे ॥ ५६ ॥
रामनारायणस्येत्थमाकर्ण्य दृढनिश्चयम् ।
भूदेवो नाब्रवीत् किञ्चिदकाले वर्षणं वृथा ॥ ५७ ॥
रामनारायणेनाथ सख्या तेन सहालयात् ।
दिनावसाने भूदेवो विहारार्थं बहिर्ययौ ॥ ५८ ॥
सखायौ मन्दमन्दं तौ विहरन्ताविवतस्ततः ।
पुरो ददृशतुः काञ्चिज् जनतां पथिरोधिनीं ॥ ५९ ॥
यावत्प्राविशतां तस्यां जनतायां सकौतुकौ ।
तावद् ददृशतुस्तौ च वक्तारं मिस्नरीनरम् ॥ ६० ॥
पादरीति श्रुतं लोके वृटिश् पुरुषमुद्धतम् ।
खिष्टधर्म ग्राहयितुं हिन्दुधर्मापवादिनम् ॥ ६१ ॥
जगदीशमिहायातं हिन्दवो विश्वसन्ति यम् ।

---

५२ । पुरा भविष्यति काले भूदेवस्य अनुजां कनीयसीं भागिनीं यो व्यवहत् । उपयमाद् विवाहात् प्राक् स खीष्टीयमतं ग्रहीतुमैच्छत् ।

५३ । व्यवसायं निश्चयम् । सान्त्ववादेन अतिमधुरेण वचनेन ।

५४ । साधीयान् बाढ़तरः साधुतरो वा ।

५७ । यथा अकाले वृष्टिर्वृथा भवति तथा दृढ़निश्चये सति तस्य प्रतिकारो वाचा न भवति तथाच " क ईप्सितार्थस्थिरनिश्चयं मनः पयश्च निम्नाभिमुखं प्रतीपयेत् " इति ।

५९ । जनतां जनसमूहम् ।

६१ । हिन्दुधर्मापवादिनं हिन्दुधर्मनिन्दकम् ।

श्रीरामं दोषमारोप्य तं दूषयितुमुद्यतम् ॥ ६२ ॥
चरित्रे सुपवित्रेऽपिच्छिद्रं विचिनुते खलः ।
व्रणमन्विष्यति तनौ श्रीमत्यामपि मक्षिका ॥ ६३ ॥
अधार्मिकैः परामृष्टं वृत्तं शुच्यपि दूष्यते ।
छुच्छुन्दरीभिराघ्रातं दुग्धमप्यपकृष्यते ॥ ६४ ॥
मिस्नरीपुरुषो धृष्टमवोचच् शृण्वतां नृणाम् ।
भो भ्रातरः शृणुत मे वाचमाचरतापि ताम् ॥ ६५ ॥
असत्यो हिन्दुधर्मोऽसौ तत्र श्रद्धा न युज्यते ।
मनुष्यमात्रो रामोऽपि यत्रोक्तः परमेश्वरः ॥ ६६ ॥
रामो यदीश्वरः साक्षात् कथमज्ञो मनुष्यवत् ।
परमेशो हि सर्वज्ञः सर्वशास्त्रैर्निरूपितः ॥ ६७ ॥
रामस्य पश्यताज्ञत्वमुक्तं रामायणेऽपि यत् ।
उपकारिणमप्युच्चैर्यो विवेदापकारिणम् ॥ ६८ ॥
रामस्य पितुरासीद्यो जटायुः परमः सखा ।
तेन सख्येन रामस्याप्युपकुर्वन् ममार सः ॥ ६९ ॥
ह्रीयमाणां दशास्येन रामभार्यां स्नुषेति सः ।
उद्धर्तुं युयुधे तेन पणीकृत्यापि जीवितम् ॥ ७० ॥
नखचञ्च्वायुधः पक्षी राक्षसेनोद्यतासिना ।
लूनपक्षः पपातोर्व्यां निःश्वसन्नल्पजीवितः ॥ ७१ ॥
रामः कण्ठगतप्राणं जटायुमुपकारिणम् ।
सीताभक्षितिनं मत्वाऽभ्यधावद्धन्तुमुद्यतः ॥ ७२ ॥
निजं मित्रममित्रं वाप्यभिज्ञातुं न यः क्षमः ।

---

६३ । श्रीमत्यामपि तनौ सुशोभनेऽपि शरीरे ।

६४ । शुच्यपि पवित्रमपि वृत्तं चरितं पापिभिः पर्यालोचितं दूष्यते, ते पर्यालोच्य दोषमेव निर्गमयन्ति इति भावः । छुच्छुन्दरी गन्धमूषकः (छुच्छु)

६९ । तेन सख्येन पित्रा सह कृतेन सखित्वेन ।

७० । स्नुषा पुत्रवधूः, सीतां पुत्रवधूं मत्वेति भावः ।

७२ । सीताभक्षितिनं सीताया अतीतं भक्षणं सीताभक्षितं तद्विद्यते यस्य स सीताभक्षिती तं, सीतां भुक्तवन्तमित्यर्थः ।

कथं प्रत्यभिजानीयाद्धार्मिकाधार्मिकावसौ ॥ ७३ ॥
यो न प्रत्यभिजानाति धार्मिकं वाप्यधार्मिकं ।
पुरस्कारतिरस्कारौ स कथं कुरुतां नृणाम् ॥ ७४ ॥
इत्युक्त्वा विरते तस्मिन् भूदेवो मिसनरीनरे ।
किमवोचः पुनर्ब्रूहि साहेबेत्यन्वयुङ्क्त तम् ॥ ७५ ॥
मिसनरीपुरुषः सोऽपि भूदेवं प्रत्यनीचकैः ।
उक्तपूर्वं पुनः सर्वमुवाच वचनं निजम् ॥ ७६ ॥
प्रत्यवादीत्तदाकर्ण्य भूदेवो मिसनरीनरम् ।
प्रायः पञ्चाशतो मध्ये शृण्वतां मौनिनां नृणाम् ॥ ७७ ॥
साहेब भवतो वाण्या उत्तरत्रोत्तरं भवेत् ।
मम त्वेकस्य वचसो देहि प्रथममुत्तरम् ॥ ७८ ॥
भवतां परमेशो यो यीषुखीष्ट इति स्मृतः ।
उल्लम्ब्यमानः स कथमाक्रन्दत् पितरं त्रसन् ॥ ७९ ॥
पर्य्यत्याक्षीः पितः कस्मान्मामित्याक्रन्ददुच्चकैः ।
इति वैवेललिखितं न मया स्वयमुच्यते ॥ ८० ॥
परमेशं य आक्रन्दत् स्वस्योद्धारेऽपि शङ्कितः ।
पापिनोऽन्यान् समुद्धर्तुं स कथं शक्नुयाद्वद ॥ ८१ ॥
इति भूदेव-वचसा धर्षितो मिसनरीनरः ।
इंरेजीभाषयावोचद् भूदेवं प्रति किञ्चन ॥ ८२ ॥
किमात्थ भूयः साहेब ब्रूहि तद्वङ्गभाषया ।

---

७४ । पुरस्कारं अभीष्ट फलं, तिरस्कारं अनिष्ट फलं ।

७५ । अन्वयुङ्क्त पप्रच्छ ।

७६ । अनीचकैः उच्चैःस्वरेण ।

७७ । पञ्चाशत्संख्यकानां मनुष्याणां भूदेव एव प्रत्यवादीत् उत्तरमुवाच अन्ये सर्वे पुनः मौनमवलम्ब्य तस्थुरित्यर्थः ।

७८ । उत्तरत्र पश्चात् ।

७९ । उल्लम्ब्यमानः ऊर्द्ध्वं बध्वा लम्बितः । आक्रन्दत् चित्कृत्य आह्वयत् त्रसन् बिभ्यत् ।

८० । पर्य्यत्याक्षीः इदानीमेव परित्यक्तवानासि ।

८१ । धर्षितः पराभूय अप्रतिभः कृतः ।

इत्यन्वयुङ्क्त भूदेवः पुनस्तं मिस्नरीनरं ॥ ८३ ॥
इंरेजीमपि जानाति भवान्ननु तथापि किम्।
वङ्गवाचा कथयितुं पुनर्मामनुरुध्यते ॥ ८४ ॥
इति प्रत्युक्तिमाकर्ण्य भूदेवः पुनरब्रवीत्।
इंरेजीं वेद्मि वा नाहं वेद्मीत्यस्तु यथा तथा ॥ ८५ ॥
शुश्रूषन्ते त्विमे लोकाः श्रोतारो भवतो वचः।
विचारयन्तु सर्वे च तर्कें किं वृत्तमावयोः ॥ ८६ ॥
अतो वङ्गगिरा ब्रूहि बुध्यन्तां निखिला जनाः।
उत्तरं भवदीयं तद् युक्तं भवति वा न वा ॥ ८७ ॥
इत्युक्तस्तेन साहेबः सोऽब्रवीद् वङ्गभाषया।
तस्मिन् भविष्यद्वागासीत् कारणं क्रन्दने विभोः ॥ ८८ ॥
तच्छ्रुत्वोवाच भूदेवः सर्वानामन्त्र्य तान् स्थितान्।
शृणुत भ्रातरः सर्वे साहेबस्योत्तरं बुधाः ॥ ८९ ॥
मृत्युग्रस्तः पितस्त्राहीत्याक्रन्दति जनो यदि।
भविष्यद्वचनं तर्हि तस्य किं हेतुरुच्यते ॥ ९० ॥
हा मातर्हा पितस्त्रातस्त्रायस्वेत्यादयो नृणाम्।
पश्यतां मृत्युमासन्नमाक्रन्दास्त्रासजा न किम् ॥ ९१ ॥
भविष्यद्वचनं तत्र कारणं कोऽनुमन्यते।
न वा भविष्यद्वचनमुक्तिर्लौकिकवस्तुनः ॥ ९२ ॥

८४। अनुरुध्यत इति दैवादिकस्य आत्मनेपदिनो रुध्-धातोः कर्तरि प्रयोगः भवच्छब्दयोगात् न मध्यमपुरुषः। तथाच "युष्मदर्थे भवद्योगे मध्यमो नेष्यते बुधैः" इत्यनुशासनम्।

८५। अहं इंरेजीं वेद्मि वा न वेद्मि इति यथास्ति तथास्तु इत्यन्वयः।

८६। शुश्रूषन्ते श्रोतुमिच्छन्ति। किं वृत्तं किं जातम्।

८७। वङ्गगिरा वङ्गभाषया।

८८। भविष्यद्विषया वाक् भविष्यद्वाक्। विभोः ख्रीष्टस्य।

८९। आमन्त्र्य विनयेन सम्बोध्य।

९२। लौकिकवस्तुनः लोके भवस्य शयनभोजनादिकस्य सुखस्य अथवा शोकजन्यस्य दुःखस्य उक्तिर्भविष्यद्वचनं न भवतीत्यर्थः।

अदृष्टकारणोत्थं यद् भावि वस्तु न बुध्यते ।
तस्यैवानागतस्योक्तिर्भविष्यद्वचनं मतम् ॥ ९३ ॥
अस्माकमपि शास्त्रेऽस्ति भविष्यद्वचनं यथा ।
म्लेच्छा भारतमेष्यन्ति श्वेतद्वीपात्कलाविति ॥ ९४ ॥
तद् भविष्यद् वच इदं फलितं पश्यताधुना ।
इंलण्डीया इमे म्लेच्छा यद्भारतमुपस्थिताः ॥ ९५ ॥
खीष्टो वान्योऽथवा भीतो घोरं व्यसनमागतम् ।
क्रन्दत्येवेति तस्योक्तिर्न भविष्यद्वचो भवेत् ॥ ९६ ॥
अन्यच्च यीषुखीष्टस्य कष्टभाजापि मृत्युना ।
पापिनां कथमुद्धारः स्वकर्मफलभोजिनाम् ॥ ९७ ॥
य एव कुरुते कर्म स एव फलमश्नुते ।
कर्तान्यः कर्मणोऽन्यश्च भोक्तेति न हि सम्भवेत् ॥ ९८ ॥
इत्थमाकर्ण्य साहेबो भूदेवस्य वचोऽर्थवत् ।
शृण्वतामब्रवीन्नॄणां मुहूर्तं चिन्तयन्निव ॥ ९९ ॥
ऋणदायेन कश्चिच्चेद् बद्धो भवति भूभृता ।
न किं तं मोचयत्यन्यः शोधयित्वा धनैर्ऋणम् ॥ १०० ॥
तच्छ्रुत्वोवाच भूदेवः साहेबं तं हसन्निव ।
ऋणदायो न दण्डार्हो न दोषो नापि पातकं ॥ १०१ ॥
नरहत्यादिकं यद् यत् पापमित्येव कथ्यते ।
एकेन विहिते तस्मिन्नन्यो न खलु दण्ड्यते ॥ १०२ ॥
इत्युक्तवति भूदेवे साहेबोऽभून्निरुत्तरः ।
श्रोतारो जहसुस्ते तु ददतः करतालिकाः ॥ १०३ ॥
इत्थं वादे विशदमतिना खीष्टधर्मप्रवक्ता
भूदेवेन श्रुतिपथजुषा निर्जितो लज्जितास्यः ।

---

९३ । यद्वस्तु अदृष्टात् कारणादुत्पद्यते अनागतस्य अभूतस्य तस्यैव वस्तुनः उक्तिर्भविष्यद्वचनं ।

९६ । व्यसनं विपदम् ।

९८ । कर्मणः कर्ता एकः तस्य फलभोक्ता अन्यो न भवतीत्यर्थः

९९ । अर्थवत् सार्थकं, न्याययुक्तिशालित्वादिति भावः ।

१०० । ऋणदायेन शोधयितव्येन ऋणेन इत्यर्थः ।

सिंहेनेव द्विपकुलपतिर्द्राव्यमाणो विमानो
लोकैरन्यैरपि विहसितः पृष्ठलग्नैर्व्यपागात् ॥ १०४ ॥

इति श्रीमहेशचन्द्र-कृतौ भूदेवचरिते काव्ये
तत्त्वदृष्टिर्नाम त्रयोदशः सर्गः ।

चतुर्द्दशः सर्गः ।

विद्याध्ययनम् ।

अपथात् परिवृत्य सुप्रतिष्ठम्
पथि भूदेवमवेक्ष्य विश्वनाथः ।
समकल्पयदागमोक्तविद्यां
तनयं ग्राहयितुं तदीयमात्रा ॥ १ ॥
प्रशशाम कुलक्रमाभिपन्नं
गुरुगोत्रं हि तदा पवित्रमस्य ।
न च तत्सदृशं कुलं स लेभे
गुणवान् यत्र पुमान् गुरुः क्रियेत ॥ २ ॥
निज एव कुले तदाद्यकार्षीत्
स कृती तेन गुरूकृतेर्व्यवस्थाम् ।

---

१०४ । वादे तर्के । विशदा निर्मला मतिर्यस्य तेन विशदमतिना । श्रुतिपथो वेद-शास्त्रोक्तधर्मपथः, तं जुषते सेवते तेन श्रुतिपथजुषा, द्राव्यमाणोऽप-गम्यमानः, विमानः विगतो मानो गर्वो यस्य सः । व्यपागात् पलायाञ्चक्रे ।

१ । अपथात् खीष्टधर्मपथात् परिवृत्य प्रतिनिवृत्य पथि वेदोक्तधर्मपथे सुप्रतिष्ठं स्थिरावस्थानं दृष्ट्वा विश्वनाथो भूदेवस्य पिता आगमोक्त-विद्यां तान्त्रिकमन्त्रं ग्राहयितुं स्वीकारयितुं समकल्पयत् संकल्पं चकार । अथवा कारयामास मात्रा द्वारा ।

२ । कुलक्रमाभिपन्नं कुलक्रमेणागतं गुरुगोत्रं गुरुवंशः प्रशशाम लुप्तं बभूव, तत्तुल्यं अन्यवंशं च न प्राप, यत्र गोत्रे गुरुर्भवितुं योग्यः पुमान् आसीदिति भावः । अतएव स्ववंशे गुरुं कर्तुं व्यवस्थामकरोत् ।

तनयाय तदीयया च मात्रा
चतुरोऽदापयदागमोक्तमन्त्रम् ॥ ३ ॥
जनकादपि वत्सलां प्रकृत्या
जननीं श्रद्दधतेतरां तनूजाः ।
जननी भरधारणेन तेषां
धरणेरप्यधिका स्मृता हि गुर्वी ॥ ४ ॥
अथ मूर्तिमती परेव विद्या
जननी ब्रह्ममयी सुताय तस्मै ।
विततार शुभेऽह्नि तन्त्रविद्यां
महतीं शब्दवपुर्धरां नु विद्याम् ॥ ५ ॥
अवतार्य्य मुखाद् यथाप्रसादं
जनयित्र्या प्रतिपादितं मनुं तम् ।
अधिगत्य मुहूरसेन चर्वं
अपि भूदेव उपाययौ न तृप्तिम् ॥ ६ ॥
जननीं मनुमिष्टदेवतां च
त्रितयं भेदविनाकृतं स मेने ।
अधिकाधिकमेव पूर्वतस्तां
सततोऽसेवत भक्तिगौरवेण ॥ ७ ॥

---

३ । तदादि तत्प्रभृति गुरूकृतेः गुरूकरणस्य । तेन हेतुना । कृती कुशलः विवेचक इत्यर्थः ।

४ । अत्र प्रमाणम् " माता गुरुतरा भूमेः खात् पितोच्चतरस्तथा। " इति महाभारते ।

५ । परा उत्कृष्टा विद्या ब्रह्मविद्या मूर्तिमतीव सा ब्रह्ममयी नाम्नी भूदेवजननी शब्दवपुर्धरां शब्दमूर्ति-धारिणीं महतीं विद्यां महाविद्यामिव तन्त्रविद्यां तन्त्रोक्तमन्त्रं विततार ददौ । महाविद्या च कालीतारेत्यादयो दश ।

६ । प्रसादं यथा प्रसादमिव मुखादवतार्य्य निर्गमय्य प्रतिपादितं दत्तं तं मनुं मन्त्रं रसेन अनुरागेण चर्वन् अभ्यसन् तृप्तिं न ययौ, अथच मात्रा दत्तम् प्रसादमन्नादिकं चर्वन्निति उपमा ।

७ । भेदविनाकृतं भेदरहितं अभेदमित्यर्थः । तां मातरम् ।

अजपद् यदिवा दिवापि शक्त्या
शतधा वाथ सहस्रधानुसन्ध्यम् ।
स तथापि चतुःसहस्रकृत्वो
नियमेनानुनिशं जजाप मन्त्रम् ॥ ८ ॥
उपयुज्य स दुग्धसागुमात्रं
निशि सुप्तेष्वपरेषु जाग्रदेकः ।
अतनोज्जपयज्ञमिष्टदेव-
स्मृतिलीनेन्द्रियवृत्तिरासनस्थः ॥ ९ ॥
स पुरश्चरणानि देवताया-
श्चरणाराधनसाधनानि धन्यः ।
विधिवद्विदधे महान्ति खण्डा-
न्यपि विश्वास-भरेण वैश्वनाथिः ॥ १० ॥
उपदेशमवाप्य तात-पादाद्-
रविपादादिव चन्द्रमाः प्रकाशम् ।
तपसा समदीपि वंशदीपः
पथि दिव्ये विचरन् स वैश्वनाथिः ॥ ११ ॥

८। यदिवा सम्भावनायां, दिवापि दिवसेऽपि शतधा अथवा सहस्रधा अनुसन्ध्यं सन्ध्यायां सन्ध्यायां मन्त्रमजपत् तथापि स भूदेवः अनुनिशं निशायां निशायां चतुःसहस्रवारान् नियमेन व्याप्त्या जजापेत्यर्थः ।

९। उपयुज्य भुक्त्वा, दुग्धमिश्रितं सागुम् (अन्यदेशीयशस्यविशेषम्) केवलं तदेव । जपयज्ञं जप एव जज्ञः पूजा तम् । इष्टदेवस्य स्मृतये स्मरणाय लीना एकाग्रा चित्तवृत्तिर्यस्य तादृशः सन् ।

१०। धन्यः पुण्यवान् सः । महान्ति पुरश्चरणानि महापुरश्चरणानि खण्डानि पुरश्चरणानि खण्डपुरश्चरणानि ग्रहणादौ विहितानि विदधे ।

११। वंशस्य कुलस्य दीपः दीपवत् प्रकाशकः । तातपादात् जनकात् उपदेशं प्राप्य तपसा तपस्यया समदीपि दीप्यते स्म, यथा रवेः सूर्य्यस्य पादात् किरणात् चन्द्रमाः प्रकाशमवाप्य दीप्यते तथेति भावः । दिव्ये सुन्दरे पथि धर्म्मे पथि अथच स्वर्गीये पथि विचरन् यथा दीपो दीप्यते तथेत्यर्थः ।

अचिराद्विधिवद् धृताभिषेकः
पितृवत् सोऽपि सुसाधको बभूव ।
पितुरप्यतिगूढमागमानां
स हि तत्त्वं बुबुधे बुधो विधिज्ञात् ॥ १२ ॥

सुतमेव न केवलं स तन्त्रे-
ष्वखिलं तत्त्वमुपादिशन्निगूढम् ।
इतरानपि तद्विबोधयिष्यन्
लिखितुं पुस्तकमेकमुद्यतोऽभूत् ॥ १३ ॥

व्यवरिष्यदसौ प्रणीय पुस्तीं
कृतधीर्गूढरहस्यमागमानाम् ।
प्रतिषेधममुष्य नाकरिष्यद्-
यदि दीक्षागुरुरागतस्तदानीम् ॥ १४ ॥

दिवमाप गुरुः स वैश्वनाथे-
र्वत दीक्षासमये विधेर्नियोगात् ।
न च तत्र कुलेऽपरस्तदासीत्
प्रभवेद्दीक्षयितुं य एव शिष्यान् ॥ १५ ॥

इति भूरि विचिन्त्य विश्वनाथ-
स्तनयं दीक्षयते स्म तस्य माता ।
स पुरश्चरणादिभिश्च पुण्यै-
रचिरेणाजनि साधको गरीयान् ॥१६ ॥

तपसः किमु तस्य दुश्चरस्य
स्फुटमासीत्कुसुमं फलाय सद्यः ।

---

१२ । धृतो गृहीतोऽभिषेकस्तन्त्रोक्ताभिषेको येन स धृताभिषेकः । विधिज्ञात् पितुः सकाशात् स आगमानां तन्त्राणां तत्त्वम् बुबुधे ज्ञातवान्, अत एव सुसाधकोऽभवत् ।

१३ । स विश्वनाथः सर्वानेव जनान् तन्त्रस्य निगूढं तत्त्वं बोधयिष्यन् ज्ञापयितुं एकं पुस्तकं लिखितुमुद्यतोऽभूदित्यर्थः ।

१४ । व्यवरिष्यत् विवृतं विशदमकरिष्यदित्यर्थः । यदि तद्गुरुर्निषेधं नाकरिष्यत्, गुरोर्निषेधादेव स तन्त्ररहस्यविवृतिं न चकारेत्यर्थः ।

१६ । दीक्षयते स्म दीक्षां ग्राहयामास ।

उपकार इव स्वयं यदागात्
डफिति प्रीतमना वृटिस् महात्मा ॥ १७ ॥
चतुरोऽपि स कैतवानभिज्ञो
बहु विद्वानपि नाभवच्च दृप्तः।
समदर्श्यपि नीतिपक्षपाती
गुणवानप्यपरस्य तद्‌ग्रहीता ॥ १८ ॥
स तथा गुणसंग्रहे परेषां
यतमानः प्रणयी नयज्ञ आसीत्।
स्वयमेव यथा गृहानुपेत्य
प्रणयं वङ्गनिवासिभिर्बबन्ध ॥ १९ ॥
निजदेशिषु वाथ वङ्गदेशि-
ष्वविशेषेण बभूव तस्य हार्दम।
गुणमेव स सर्वतो व्यचैषी-
न्न तु जातिं न वयो न वापि धर्मम् ॥ २० ॥
विहरन् स यदृच्छयैव पल्ली-
ष्वथ भूदेव-गृहं कदाचिदागात्।
अवलोकयति स्म चण्डिकाया-
भवनालिन्दगतं च वैश्वनाथिम् ॥ २१ ॥

१७। डफ् इति ख्यातः (Dr. Aun Duff) वृटिश् यत् आगात् आगमत् तत् खलु तपसो वृक्षस्यैव कुसुमं यत्फलाय फलजनकं भवेदित्यर्थः।

१८। चतुरोऽपि चातुर्य्यशाल्यपि छलानभिज्ञ इति विरोधाभासः। प्रायेण हि चतुरः कैतवाभिज्ञो भवति। एवं बहु विद्वान् दर्पशाली भवति, समदर्शी अपक्षपाती भवति, गुणवान् परगुणान् न गृह्णाति इति दृश्यते डफ् साहेबस्तु न तथेति भावः।

१९। नयज्ञो नीतिज्ञः स डफ् साहेबः परेषां गुणसंग्रहे तथा प्रणयी प्रीतिमान् प्रार्थी वा आसीत् यथा गृहान् आत्मना उपेत्य वङ्गवासिभिः सह प्रणयं प्रीतिं बबन्ध।

२०। हार्दं प्रेम। व्यचैषीत् अन्विष्टवान्। जात्यादिकं नापैक्षत।

२१। चण्डीमण्डपस्य द्वाराद्बहिःप्रकोष्ठस्थितं ददर्शेत्यर्थः।

प्रियदर्शनमेकनिष्ठदृष्टिं
कमपि ग्रन्थमुपांशु वाचयन्तम् ।
स वृटिश् पुरुषो ङफित्युदार-
स्तमुपेयाय यथा सखा सखायम् ॥ २२ ॥
पदशब्दमथोपलभ्य सभ्यः
सहसोत्तोल्य मुखं पुरो ददर्श ।
वृटिशं पुरुषं तमुन्नताशं
द्रुतमभ्युत्थितवांश्च वैश्वनाथिः ॥ २३ ॥
नयविद् विनयेन सुप्रभातं
कथयित्वा करमग्रहीत् करेण ।
वृटिशः पुरुषस्य तिर्य्यगीष-
न्नमयामास शिरश्च गौरवात् सः ॥ २४ ॥
वृटिशामुचितं समादरेण
द्रुतमानाय्य समीपमासनं च ।
उपवेशयति स्म तत्र तं स
स्वत एव प्रियता सतां हि सत्सु ॥ २५ ॥
स वृटिश् पुरुषः प्रसिद्धनामा
विदितोऽभूत् पुर एव वैश्वनाथेः ।
वृटिशस्तु स विश्वनाथ-सूनु-
र्न कदाचिद् विदितो नवा श्रुतोऽभूत् ॥ २६ ॥
तदपि प्रियवाक् तमाललाप
क्षितिदेवं चिरसंस्तुतं यथासौ ।
स परो निज एष वेति भेदो
महतां नास्ति हि विश्ववत्सलानाम् ॥ २७ ॥

---

२२ । उपांशु निःशब्दं वाचयन्तमधीयानम् ।

२३ । सभ्यः सभायां साधुः । वैश्वनाथिर्भूदेवः ।

२४ । सुप्रभातं " गुड्मर्णि " इति करमग्रहीत् करं मर्दयामास । ईषत् तिर्य्यक् किञ्चित् वक्रं शिरो नमयामास च इत्यर्थः ।

२५ । वृटिशामुचितं आसनं (चौकि चेयार) इत्यादि नाम्ना ख्यातम् आसनम् ।

२७ । चिरसंस्तुतं यथा चिरपरिचितमिव । स परो भिन्नः एष निजः आत्मीय

स विशेषमसौ हि खृष्टभक्तः
प्रियवादी समदर्शनो मृदुश्च ।
कथमप्रियमालपेत् स सभ्यं
निजधर्मप्रतिपादने च यत्तः ॥ २८ ॥

स हि खृष्टमतं प्रचारयिष्यन्
परिबभ्राम समन्ततोऽप्रमत्तः ।
उपपत्तिशतैस्तुवन् स्वधर्मं
परधर्मं परिखण्डयंश्च तर्कैः ॥ २९ ॥

इह किन्तु वितर्क्य विश्वनाथे-
र्धियमुच्चैर्बहुशास्त्रदर्शनं च ।
निजधर्ममतप्रचारणार्थे
न स विद्वानपि साहसी बभूव ॥ ३० ॥

स महह्लदनामपुस्तकस्य
स्फुटमिंलिश्-वचसानुवादपुस्तम् ।
अवलोक्य करेऽस्य वैश्वनाथेः
पठतो विस्मयमाप डफ् महात्मा ॥ ३१ ॥

तमजय्यमतोऽनुमाय वादे
न हि किञ्चिद् वदति स्म खृष्टधर्मम् ।
स तदीयमनो विनोदयिष्यन्
वरमुच्चैः प्रशशंस हिन्दुधर्मम् ॥ ३२ ॥

इति भेदज्ञानं महतां नास्ति तथाहि "अयं निजः परो वेति गणना लघु-चेतसां " इति । विश्ववत्सलानां सर्वत्र स्नेहवतां ।

८। यत्तो यत्नवान् ।

९। समन्ततः सर्वतः । अप्रमत्तोऽनवधानरहितः । उपपत्तिशतैर्बहुभिर्युक्तिभिः ।

०। उच्चैर्धियं उन्नतां बुद्धिम् वितर्क्य सम्भाव्य ।

१। वैश्वनाथेर्भूदेवस्य तादृशपुस्तकार्थबोधयोग्यां व्युत्पत्तिं निश्चित्य विस्मयं प्रापेत्यर्थः ।

२। अजय्यं जेतुमशक्यं। वरं पक्षान्तरे। हिन्दुधर्मं प्रशशंस तुष्टाव न तु खण्ड-यितुमियेष इति भावः ।

डफुवाच स विश्वनाथसूनुं
ननु शास्त्रे भवतां विभोर्यथास्ति ।
सदुदाहरणं महामहिम्नो
न तथा क्वापि विलोक्यतेऽन्यशास्त्रे ॥ ३३ ॥
तदलं भवतामिमं विदित्वा
चिरमायस्य महद्यदप्रबन्धम् ।
अमृते सरितः सति प्रसन्ने
वद कूपं खनति प्रयत्नतः कः ॥ ३४ ॥
इतिवादिनि तत्र वैश्वनाथिः
परिपप्रच्छ किमस्ति हिन्दुशास्त्रे ।
सदुदाहरणं तदुच्यतां मे
न हि यत्क्वापि विलोक्यतेऽन्यशास्त्रे ॥ ३५ ॥
अथ डफ् पुनरब्रवीत्तमार्य्यं
न महाभारतमीक्षितं त्वया किम् ।
भुवनावनकर्मणो विधातुः
कथितं तत्र निदर्शनं ह्यपूर्वम् ॥ ३६ ॥
निजगाद कदापि भीमसेनो
वसुदेवात्मजमर्जुनस्य मित्रम् ।
ननु कृष्ण जगन्ति पासि यत्त्वं
जनता स्तौति ततो भवन्तमुच्चैः ॥ ३७ ॥

---

३३ । विभोः परमेश्वरस्य महामहिम्नो महतः ऐश्वर्य्यस्य सदुत्कृष्टं उदाहरणं दृष्टान्तो भवतां हिन्दूनां शास्त्रे यथा अस्ति तथा कुत्रापि अन्यशास्त्रे नास्ति।

३४ । विदित्वा अलं ज्ञातुं प्रयोजनं नास्तीत्यर्थः । आयस्य प्रयत्नं कृत्वा । सरितो नद्याः प्रसन्ने स्वच्छे अमृते जले सति कूपजलस्य प्रयोजनं नास्तीत्यर्थः ।

३५ । तत्र तस्मिन् डफ्साहेबे इति वादिनि इत्थं वदति सति भूदेवः परिपप्रच्छ जिज्ञासितवानित्यर्थः ।

३६ । भुवनावनकर्मणो जगतां रक्षणकर्मणः । अवरक्षणे इत्यस्माद्धावे ल्युट् वा, अवनं तदेव कर्म तस्य ।

३७ । पासि रक्षसि । जनता जनानां वृन्दम् । स्तौति प्रशंसति ।

अवतां परिरक्षणं तदेत-
न्न हि जानाम्यतिदुष्करन्तु कर्म ।
अहमप्यभिरक्षितुं जगन्ति
प्रभवानीत्यवकल्पये निकामम् ॥ ३८ ॥
इति तस्य गिरं निशम्य कृष्णः
स्मितपूर्वं तमुवाच भीमसेनम् ।
भवतार्य्य यथोच्यते तथा त-
न्न हि दुःसाध्यमिदं भवादृशानाम् ॥ ३९ ॥
अनुजन्मसखोऽनुजोऽहम्
प्रणयेणार्य्य भवन्तमर्थये तत् ।
स्वयमेव भवान् ममानुकम्पी
जगती रक्षतु कानिचिद्दिनानि ॥ ४० ॥
जगती-परिरक्षणस्य भारं
परिगृह्णातु भवान् निजे भुजे श्वः ।
इति कृष्णवचो निशम्य भीमः
सहसैवोमिति भारमभ्युपागात् ॥ ४१ ॥
अथ तत्परवासरं कथञ्चिद्-
व्यपनीयाह्नि समागते तृतीये ।

३८। प्रभवानि समर्थो भवानि इति अवकल्पये सम्भावये । प्रभवानीत्यत्र सम्भावनायां लोट् ।

३९। हे आर्य्य ! भवता यथा उच्यते तत्तथा तादृशमेव भवादृशानामिदं जगत्पालनकर्म दुःसाध्यं दुष्करं नहि नैवेत्यर्थः ।

४०। अनुजन्मनोऽनुजस्य भवतोऽनुजस्य अर्जुनस्य सखा अहं अनुजोपमः अनुजतुल्यः । प्रणयेण प्रीत्या अनुकम्पी दयाशीलः सन् जगतीः भुवनानि रक्षतु इत्यर्थः ।

४१। श्वः-शब्दो भविष्यत्कल्यवचनोऽव्ययः । श्वो भविष्यति कल्ये निजे आत्मीये भुजे परिगृह्णातु । ओमिति स्वीकारव्यञ्जकोऽव्ययशब्दः, ओमित्युक्त्वा अभ्युपागात् स्वीचकार । "ओमादौ" इत्यनेन एव शब्दस्य अकारलुक् ।

उपगत्य स वासुदेवमूचे
जितकाशीव विकासि वक्त्रपद्मः ॥ ४२ ॥
जगतः परिरक्षणं मया ह्यो-
विहितं कृष्ण यथायथं यथोक्तं ।
तव धूरियमित्यतस्त्वमद्य-
प्रभृति प्रागिव रक्ष भूय एव ॥ ४३ ॥
इति भाषितवन्तमच्युतस्तं
दृढमालिङ्ग्य जगाद साधु साधु ।
ननु वेद्मि यथा भवानरक्षी-
दपरः कोऽपि न रक्षितुं तथेशः ॥ ४४ ॥
यदि रक्षणकर्मणि श्रमस्ते
तदितो भीम निवृत्तिरस्तु तावत् ।
प्रणयेण तु वच्मि किञ्चिदन्यन्-
मम कार्य्यं कुरु यत् परैर्न शक्यम् ॥ ४५ ॥
सरसीमवलोकसे पुरो यां-
मवगाहस्व वृकोदर त्वमेतां ।
अथ किञ्चन यत् सजेत् त्वदङ्गे
तरसोद्धृत्य तदाहरान्तिकं मे ॥ ४६ ॥
इति शार्ङ्गभृता मुदा नियुक्तः
सरसीं तां द्विपवद् वगाह्य भीमः ।

---

४२ । व्यपनीय अतिवाह्य । जितकाशीव—जितामिति भावेक्तः, जितेन जयेन काशते दीप्यते इति जितकाशी स इव ।

४३ । ह्यःशब्दो भूतकल्यवचनोऽव्ययः । अतीते कल्य इत्यर्थः । यथायथं ये ये यथा तांस्तां स्तथा इत्यर्थः । यथोक्तं उक्तमुक्तिमनतिक्रम्ये-त्यर्थः । धूर्भारः ।

४४ । रक्षितुमीशः पालयितुं समर्थः ।

४६ । पुरोऽग्रतः सम्मुखे इत्यर्थः । त्वदङ्गे तव अवयवे हस्तपदादौ यद्वस्तु सजेत् सङ्गं प्राप्नुयात् लग्नं भवेदित्यर्थः । तरसा बलेन तत् उद्धृत्य मम समीपमानयेत्यर्थः ।

उपलं गुरुमेकमङ्घ्रिलग्नं
सहसोत्थाप्य तदन्तिकं निनाय ॥ ४७ ॥

उपलं तमधोक्षजेन भङ्क्तुम्
विनियुक्तश्च यदा बभञ्ज भीमः ।
स तदोपलगर्भगं गभीरं
बिलमैक्षिष्ट पिपीलिकानिवासम् ॥ ४८ ॥

अथ तत्र बिले पिपीलिकास्ता
हरिरालोक्य मृता उवाच भीमम् ।
किमिदं बत भो अहो प्रमादो
ननु नैता भवता वधाय दृष्टाः ॥ ४९ ॥

अशनं यदि किञ्चिदप्यदास्यः
कृपयाभ्यस्तदिमा न ह्यमरिष्यन् ।
ह्य इमा अभवन् खलु प्रमीता
अवहेलादथवा प्रमादतस्ते ॥ ५० ॥

सरसीह पुरोगतेऽपि तावद्
यदि नष्टास्तदनादरादिमास्ताः ।
गहने जलधौ गिरौ च दूरे
कति जीवा विलयं गता न वेद्मि ॥ ५१ ॥

४७। शार्ङ्गभृता कृष्णेन। द्विपवत् हस्तीव। वगाह्य अवगाह्य। उपलं पाषाणम्।

४८। अधोक्षजेन कृष्णेन। भङ्क्तुं भेत्तुं। उपलगर्भगं पाषाणमध्ये स्थितं। बिलं छिद्रं ऐक्षिष्ट ददर्श। पिपीलिकानां निवासं निवसन्त्यस्मिन् इति निवासो वसत्यधिकरणम्।

४९। वत खेदे। भो इति सम्बोधने। अहो इति विस्मये। प्रमादोऽनवधानता। एताः पिपीलिकाः मनोयोगं कृत्वा न दृष्टाः।

५०। आभ्यः पिपीलिकाभ्यः यदि किञ्चिदपि अशनं भोज्यं अदास्यः दानमकरिष्यस्त्वम्, तत् तदा, हा खेदे, इमा न अमरिष्यन्, मृता अभविष्यन्नित्यर्थः। क्रियातिपत्तिः ह्यो भूते कल्ये, प्रमीता मृताः। अवहेलं अवज्ञा तस्मात् अथवा प्रमादतोऽनवधानात्।

५१। गहने दुर्गमे। विलयं प्रणाशं।

इति तस्य हरेर्निशम्य वाचम्
पुर आलोक्य मृताः पिपीलिकाश्च ।
बुबुधे स निजाज्ञतां विलक्षो
महिमानं च महेश्वरस्य भीमः ॥ ५२ ॥
इति यादृगहो महेशितुर्वो
महिमोदाहृतिरस्ति हिन्दुशास्त्रे ।
न हि तादृगुदारभावपूर्णा
क्वचिदश्रूयत सा परत्र शास्त्रे ॥ ५३ ॥
न हि शास्त्रमिदं महम्मदाख्यं
न च वैवेलमदस्तथानुकूलम् ।
भवतां भवने यथास्ति शास्त्रम्
परमार्थप्रतिपादनोपयोगि ॥ ५४ ॥
इतिवद् बहु संकथासुधाभिः
स मुहूर्त्तं परितोष्य वैश्वनाथिम्
न्यवृतड् डफपि प्रमोदपूर्णोऽ-
नुगतस्तन्मनसेव वेश्मनि स्वे ॥ ५५ ॥
स परेद्यवि डफ् महाशयस्य
प्रतिसाक्षात्करणाय वैश्वनाथिः ।
स्वयमावसथं ययौ तदीयम्

---

५२ । विलक्षो विस्मयान्वितः अप्रतिभइत्यर्थः । महेश्वरस्य परमेश्वरस्य महिमानमैश्वर्य्यं च बुबुधे ज्ञातवानित्यर्थः ।

५३ । महेशितुः परमेश्वरस्य महिम्न उदाहृतिर्दृष्टान्तः । सा महिमोदाहृतिः ।

५४ । इदं तव हस्ते विद्यमानं महम्मदनामकं शास्त्रं अदस्तच्च वैवेल वाइवेल् नामकं खृष्टीयशास्त्रं तथा तादृशमनुकूलमुपयोगि न भवति यथा भवतां शास्त्रं परमार्थस्य यथार्थस्य परमेश्वरमहिम्नः प्रतिपादने ज्ञापने उपयोगि अनुकूलमित्यर्थः ।

५५ । इतिवत् इत्थंरूपाभिः सङ्कथाः परस्परालापः ता एव सुधासदृश्यः ताभिः । स्वे वेश्मनि आत्मीये गृहे न्यवृतत् निववृते परागतोऽभूत् । अनुरागात् अनुगम्यमान इव ।

वृटिशां रीतिरियं हि माननस्य ॥ ५६ ॥

स वृटिश् पुरुषस्तमभ्युपेतम्
प्रतिजग्राह समादरेण नम्रः ।
नतिरुन्नतये हि सज्जनाना-
मपि शिष्टेषु गृहानुपागतेषु ॥ ५७ ॥

इत्थं तस्य महाशयस्य वृटिशः प्राज्ञस्य सङ्गान्मुहु-
र्भूदेवोऽलभताधिकाधिकमसौ ज्ञानं क्रमेणोज्ज्वलम् ।
डफ् साहेब इवापरो न हि मनोविज्ञानशास्त्रं तदा
नाध्यासीदितिहासशास्त्रमनघं विद्वान् परस्तादृशः ॥ ५८ ॥

इति श्रीमहेशचन्द्रकृतौ भूदेवचरिते काव्ये विद्याध्ययनं
नाम चतुर्दशः सर्गः ॥

---

५६ । वृटिशां वृटन्देशीयानां माननस्य सम्माननस्य इयं हि रीतिः प्रतिसाक्षात्-करणं विना सम्माननं न भवति प्रत्युत अवमानना स्यात् ।

५७ । नतिर्नम्रता । सज्जनानामपि उन्नतजनकर्तृकापि, तेषां उन्नतये उन्नति-ज्ञापिका भवतीत्यर्थः । डफ् साहेबस्य नम्रतायाः समर्थकोऽयमर्थान्त-रन्यासः ।

५८ । महान् आशयोऽभिप्रायो यस्य स महाशयः—आशयः स्यादभिप्राये पनसाधारयोरपि इति मेदिनी । तस्य डफ्साहेबस्य सङ्गात् सं-सर्गात् उज्ज्वलमुद्दीप्तं अधिकाधिकं पूर्वापेक्षया अधिकप्रकारं ज्ञानं असौ भूदेवोऽलभत लेभे । हि यतस्तदा तस्मिन् काले डफ्साहेब इवापरो वृटिश् मनोविज्ञानशास्त्रं विद्वान् जानन् न आसीत् अनघं इतिहासशास्त्रं विद्वानपि परोऽन्यः तादृशः डफ्साहेबसदृशः नासी-दित्यर्थः । अतः स तत्सङ्गात् क्रमेण अधिकाधिकज्ञानवान् बभूवेत्यर्थः ।

पञ्चदशः सर्गः ।

विद्याध्ययनसमाधानम् ।

इफ्साहेबस्य सम्पर्काद् भूदेवोऽगाद् गुणान् बहून् ।
सूर्य्यांशोर्विविधान् वर्णान् गृह्णाति सुमना यथा ॥ १ ॥
सुयोगस्तादृशस्तस्य यदासीद् गुणसंग्रहे ।
आराधितायास्तन्मन्ये देवतायाः प्रसादतः ॥ २ ॥
अन्यथा निर्धनोऽप्येष भूदेवः कथमाप्नुयात् ।
इफ्साहेबस्य वात्सल्यं यदाढ्यैरपि दुर्लभम् ॥ ३ ॥
लाभः पण्डितमित्रस्य विना भाग्यं सुदुर्लभः ।
रत्नं कस्य दरिद्रस्य स्वयं करतले पतेत् ॥ ४ ॥
सङ्गात् कृतधियस्तस्य साहेबस्यानुगृह्णतः ।
भूदेवस्य श्रुतं भूरि श्रुताच्च विनयोऽजनि ॥ ५ ॥
इत्थं बहु श्रुतं लब्ध्वा विनीतो विश्वनाथजः ।
प्रायेण कथयन्नासीन्न्याय्यां वाचमिमां सुधीः ॥ ६ ॥
वृटिश्भिः सह सङ्गः स्यादुन्नत्यै वङ्गवासिनाम् ।
वृटिशो वामतां त्यक्त्वा भवेयुर्यदि दक्षिणाः ॥ ७ ॥
न वङ्गवासिनोऽपि स्युर्यदि पण्डितमानिनः ।
इंरेजीगन्धमाघ्राय वृटिशामनुकारिणः ॥ ८ ॥

---

१ । अगात् प्राप इत्यर्थः । सुमनाः पुष्पं सूर्य्यस्य किरणस्पर्शात् वर्णवैचित्र्यं रक्तपीतादीन् वर्णान् प्राप्नोति इति दार्शनिकाः । सुमना इत्येकवचनन्तु "सुमनोऽप्सरोवल्वजादेर्वा" इति संक्षिप्तसारसूत्रेण, यथा "वेश्याः श्मशानसुमना इव वर्जनीयाः" इत्यत्र ।

५ । श्रुतं श्रवणजं ज्ञानं । तथाहि "श्रुतं कृतधियां सङ्गाज्जायते विनयः श्रुतात् । लोकानुरागो विनयान् न किं लोकानुरागतः" इति ।

६ । न्यायादनपेता न्याय्या युक्तिसङ्गता तां न्याय्याम् ।

७ । भूदेवः किं कथयन्नासीदित्याह सप्तमाष्टमश्लोकाभ्यां । वामतां प्रतिकूलतां त्यक्त्वा यदि दक्षिणाः सरलाः स्युः तदेत्यर्थः । वृटिशो हि स्वदेशाचारं कुत्सितमपि प्रशंसन्ति भारतवासिनामाचारं प्रशस्तमपि निन्दन्ति ।

८ । गन्धं लेशं कञ्चिदंशमित्यर्थः ।

इत्थं वदंश्च विद्वांश्च कर्मणा च समाचरन् ।
उच्चावचान् बहूनेव सञ्जग्राह गुणानसौ ॥ ६ ॥
गुणानर्जयितुं तस्य सुयोगो यादृशोऽजनि ।
तादृङ् नाभवदन्यस्य कस्यचिद् बङ्गवासिनः ॥ १० ॥
तथाहि बाल्यात् प्रभृति वृटिशोऽध्यापका इमे ।
इंरेजीं शिक्षमाणस्य तस्यायुज्यन्त भाग्यतः ॥ ११ ॥
उलाष्टन्नित्युपाध्यायो भूदेवं प्रागशिक्षयत् ।
वुयिल् सन्निति च प्राज्ञी द्वितीया तस्य शिक्षिका ॥ १२ ॥
कलेजे जोन्स इत्येकस्ततो ह्यालफोर्ड इत्यपि ।
रिचार्डसन् इति ततो विद्यामध्यापयंस्त्रयः ॥ १३ ॥
इंरेजाद् यादृगिंरेजी भाषा शुद्धमधीयते ।
तादृशं शुद्धमन्यस्मादुपाध्यायान्न लभ्यते ॥ १४ ॥
रत्नाकराद् यथा मुक्तारत्नं शुद्धमुपार्ज्यते ।
सरितो न तथा मुक्ता कदाचिदपि लभ्यते ॥ १५ ॥
तादृशाध्ययनेनासौ विद्यां लब्धवान्यदुर्लभाम् ।
बहून्युपार्जयामास डफ्साहेबात् श्रुतान्यपि ॥ १६ ॥
मनोविज्ञानशास्त्रं च शास्त्रमप्यैतिहासिकम् ।
तत्त्वेनाबोधि भूदेवो डफ्साहेबाद् यशस्विनः ॥ १७ ॥
अधीत्य लेभे यज्ज्ञानं चिरेण तदजायत ।
तस्माच्छ्रुत्वा तु यत् प्राप तदभूदविलम्बितम् ॥ १८ ॥

---

९ । इत्थं वदन् कथयन् विद्वान् विश्वसंश्च तथा कर्मणा आचरंश्च, उच्चावचान् उच्चैश्च नीचैश्च तान् उच्चान् गुणान् नीचान् गुणांश्च सञ्चितवान् इत्यर्थः ।

१० । तस्य भूदेवस्य ।

११ । भाग्यतः सौभाग्यात् अयुज्यन्त सम्बन्धा बभूवुरित्यर्थः ।

१४ । शुद्धमिति क्रिया-विशेषणं यादृक् शुद्धं यथा स्यात् तथा अधीयते ।

१६ । तादृशा तादृशेन, श्रुतानि श्रवणजन्यज्ञानानि ।

१७ । ऐतिहासिकमितिहासः प्रयोजनमस्येति इतिवृत्तज्ञानप्रयोजनकं शास्त्रमित्यर्थः । तत्त्वेन याथार्थ्येन अबोधि ज्ञातवान्, कर्तरि लुङ् ।

१८ । तस्मात् डफ् साहेबात् । तु पक्षान्तरे किन्तु इत्यर्थः ।

श्रेयोऽमन्यत भूदेवः श्रुतमध्ययनादतः ।
श्रुतलाभाय स मुहुर्डफ्साहेबमुपागमत् ॥ १९ ॥
इत्थं सोऽधीत्य शास्त्राणि श्रुतानि समवाप्य च ।
परीक्षाफलमुत्कृष्टं प्राप तत्रैव वत्सरे ॥ २० ॥
केवलं नाधीतिकाले तेषां वात्सल्यमन्वभूत् ।
आयतावपि लेभे स साहेबानामनुग्रहम् ॥ २१ ॥
भूदेवस्योपकुर्वन्तस्ते तृप्तिं यन्न लेभिरे ।
भूदेवस्यैव सुकृतं मन्ये तन्मूलमुत्तमम् ॥ २२ ॥
आत्मनः सुकृतेनापि पूर्वेषां सुकृतेन च ।
तेषामनुग्रहेणापि परीक्षां साधु सोऽतरत् ॥ २३ ॥
पक्षवेदवसुक्षौणिपूरणे खृष्टहायने ।
सिनियर्छात्रवृत्त्याख्यां परीक्षामतरत् सुधीः ॥ २४ ॥
फेब्रुयारीति कथिते मासि हिन्दुकलेजतः ।
दुस्तरां द्यामिव रविः परीक्षामतरत् कविः ॥ २५ ॥
चत्वारिंशच्च रजतान्यवापन्मासि मासि सः ।
वृत्तिं कीर्त्या शरच्चन्द्र-प्रतिच्छन्दिरुचा सह ॥ २६ ॥
साधुवादा उदपतन्नाननेभ्यो महात्मनां ।
उद्गाराः प्रीतिपूराणां हृद्यसम्भवतामिव ॥ २७ ॥
परीक्षोत्तारवृत्तान्तं तं निपीय सुतं प्रति ।
विश्वनाथस्य हर्षस्तु सत्यलोकमिवोदगात् ॥ २८ ॥
इन्दोरिव तनूजस्य भूदेवस्योदये सति ।

---

१९ । अध्ययनात् अध्ययनमपेक्ष्य श्रुतं श्रेयः प्रशस्यतरममन्यत ।

२१ । आयतौ उत्तरकाले, उत्तरः काल आयतिरित्यमरः ।

२२ । भूदेवस्योपकुर्वन्त इत्यत्र कर्माविवक्षायां सम्बन्धविवक्षया षष्ठी माषाणामश्नीयादितिवत् ।

२३ । पूर्वेषां पूर्वपुरुषाणां पितृपितामहादीनां, तेषां बृटिश्पुरुषाणाम् ।

२४ । १८४२ एतत्संख्यापूरणे खृष्टाब्दे ।

२७ । हृदि अन्तःकरणे असम्भवतां अपरिमितानामिवेत्यर्थः ।

२८ । निपीय श्रुत्वा । सत्यलोको हि सर्वेषां लोकानामुपरि तं लोकं प्राप अत्युच्चैरेव उत्थितः तस्य हर्षः ।

अवर्द्धत पितुः काम उद्वेल इव सागरः ॥ २९ ॥
लहर्य्यः सागरस्येव तस्याशाः शतमुद्ययुः ।
गम्भीर्य्यास्तु मनस्येव तास्तु सद्यो निलिल्यिरे ॥ ३० ॥
भूदेवो मम दारिद्र्यमाचामेत् सागरोपमम् ।
अपि विन्ध्यगिरेः शृङ्गमगस्त्य इव नामयेत् ॥ ३१ ॥
द्वितलैस्त्रितलैः सौधैः कुटीं मे परिवर्त्तयेत् ।
अलङ्कारैर्महार्घैश्च वधूं वत्सां विभूषयेत् ॥ ३२ ॥
उत्तरोत्तरमुत्कृष्टैराच्छादनमण्डनैः ।
जनन्याश्च परिक्लेशं मत्क्लेशमिव खण्डयेत् ॥ ३३ ॥
इत्थं परःशता आशा याश्चक्रे तर्कभूषणः ।
विश्वनाथो गुरुस्तस्य मन्ये॰ता अफलन् पुरा ॥ ३४ ॥
भूदेवस्य सुहृद्बन्धुबान्धवास्तत्पितुश्च ये ।
सर्वे ते तं शुभोदन्तं श्रुत्वासन् प्रीतिनिर्भराः ॥ ३५ ॥
सोऽपि पुस्तकविक्रेता मधुसूदन दे इति ।
तुतोष परमं ग्रन्थैर्यो भूदेवमुपाचरत् ॥ ३६ ॥
तेन पुस्तकदानेन विश्वनाथस्य धीमतः ।
परीवार इवासीत् स सन्तो हि कृतवेदिनः ॥ ३७ ॥
माता ब्रह्ममयी देवी सूनोरुदयमङ्गलम् ।
तन्तु श्रुत्वा परां कोटिमानन्दस्य समासदत् ॥ ३८ ॥

२९। उद्वेलः वेलां तीरभूमिं उत्तीर्ण इवेत्यर्थः ।

३०। निलिल्यिरे निलीना बभूवुः । अन्ये तस्याशा न ज्ञातवन्तः ।

३१। अगस्त्यो मुनिः सागरं आचचाम इति पौराणिकी वार्त्ता तद्वद् भूदेवो मम दारिद्र्यं पिवेत् लुम्पेत् । एवं विन्ध्यगिरिसदृशस्य उन्नतस्यापि लोकस्य शृङ्गं प्राधान्यं नामयेत् न्यक्कुर्यात् इत्यर्थः ।

३४। पुरा अफलन् फलिष्यन्तीत्यर्थः । स्मायुक्तपुरायोगे भूतानद्यतने वा लुङ् च इत्यनेन भविष्यदर्थे लङ् ।

३५। शुभोदन्तं शुभवार्त्ता । प्रीतिनिर्भराः प्रीत्या निःशेषेण पूर्णाः ।

३६। उपाचरत् सेवितवान् ।

३७। कृतवेदिनः कृतज्ञाः ।

३८। परां कोटिं सर्वोपरिसीमाम् । समासदत् प्राप इत्यर्थः ।

भूदेवः पुनरुत्साहं तमवाप्याधिकाधिकम् ।
पद एव सरस्वत्या दृढ़ां भक्तिमुपाददे ॥ ३६ ॥
सा पुनः सिनियर्वृत्तिर्देयासीद्वर्षमेककम् ।
ततोऽपि भूयो दीयेत परीक्षोत्तरणं यदि ॥ ४० ॥
भूदेवः सर्वदाधीत्य वर्षे वर्षे तथाकरोत् ।
यथा परीक्षामुत्तीर्य्य वृत्तिं तां पुनराप्नुयात् ॥ ४१ ॥
अधीत्य प्रथमश्रेण्यामित्थं त्रीन् वत्सरानसौ ।
प्रशस्तिपत्रं विद्याया लेभे सुचरितस्य च ॥ ४२ ॥
प्रतिवर्षं समं कीर्त्त्या परीक्षापारमागतः ।
चत्वारिंशद्रूप्यमितामरत्नद् वृत्तिमुत्तमाम् ॥ ४३ ॥
वाणवेदवसुक्षौणीपूरणे खृष्टहायने ।
कलेजान्निर्ययौ श्रीमान् भूदेवो विद्यया ज्वलन् ॥ ४४ ॥
हृदि विद्यागुणैर्हारैर्यशोरत्नैश्च मूर्द्धनि ।
दिव्यैः स मण्डनै रेजे मण्डितः पण्डितो महान् ॥ ४५ ॥
रसवेदवसुक्षौणिगणिते खृष्टवत्सरे ।
फेब्रुयार्य्यभिधे मासि प्रशंसापत्रमाप सः ॥ ४६ ॥
त्रयोदशाहलिखितं तस्य मासस्य तद्दृढम्
प्रशंसापत्रमासाद्य कृतकृत्य इवाभवत् ॥ ४७ ॥
षडब्दान् पञ्चमासांश्च कलेजेऽधीत्य नित्यदा ।
व्युत्पत्तिं स यथा लेभे न तथा कश्चनापरः ॥ ४८ ॥
विद्याकल्पलतां दिव्यामित्थं सम्वर्ध्य सेवया ।
कृतार्थोऽपि फलार्थी सन् कञ्चित्कालं निनाय सः ॥ ४६ ॥
मनोरथतरङ्गानां तस्य चित्ते परम्पराः ।
लीलाखेलामथप्रापुर्न तु वेलां ललङ्घिरे ॥ ५० ॥
कृतं विद्यार्जनं यादृक् तादृग् वसु लभेय किम् ।
अपि नाम धनैः पित्रोर्दारिद्र्यं खण्डयानि किम् ॥ ५१ ॥

---

४४ । वाणवेदवसुक्षौणिपूरणे १८४५ इयत्संख्यके खृष्टाब्दे ।

४६ । फलार्थी धनार्जनार्थी ।

५० । मनोरथाः कामाः तरङ्गा इवेति तेषाम् परम्पराः श्रेण्यः लीलाखेला लीलैव खेला क्रीड़ा तां । वेलां सीमानं न तु लङ्घितवती ।

अपि किं शक्नुयां कर्तुं स्वजातिहितमुन्नतम् ।
हितं वा पितृतुल्यानां ब्राह्मणानां विपश्चिताम् ॥ ५२ ॥
शुभबीजं गृहस्थानां धनं त्रिगणसाधनम् ।
तद्द्वयस्य नास्ति जानामि जीवितं तस्य निष्फलम् ॥ ५३ ॥
पण्डितानान्तु दारिद्र्यं न सहेय तथाहि मे ।
पितुर्दारिद्र्यमालोक्य मन्ये ग्रावापि विद्रवेत् ॥ ५४ ॥
खण्डयित्वा पितुः कष्टमन्येषां विदुषामपि ।
दारिद्र्यं खण्डयिष्यामि त्वमेवार्जयितुं यदि ॥ ५५ ॥
पण्डितांश्च बहून् कर्तुं यतेय यदि शक्नुयाम् ।
गृहीतसांख्यवेदान्तन्यायादिबहुदर्शनान् ॥ ५६ ॥
यथा गृह्णन्ति लोका मे पितुर्नाम पदे पदे ।
तथा चेच्छक्नुयां कर्तुं कृतार्थं तर्हि मेऽर्जनं ॥ ५७ ॥
यान् यान् मनोरथानित्थं विदधे विबुधोपमः ।
असाधयत् पुरा प्रायस्तांस्तान् सुखसुखेन सः ॥ ५८ ॥
कलेजान्निर्गतः शिक्षासभासम्पादकं बुधं ।
आलोक्य मौयेट्साहेबं भूदेवोऽवोचदीप्सितम् ॥ ५९ ॥
प्रीतस्तु मौयेट्साहेबो भूदेवाय कृतात्मने ।
शिक्षाविभागसंक्रान्तं किञ्चित्पदमदित्सत ॥ ६० ॥
अधीयानः कलेजेऽसौ भूदेवस्तेन धीमता ।
विशेषेण परिज्ञातः प्रागेवासीत् प्रसेदुषा ॥ ६१ ॥
अतः शिक्षाविभागेऽसौ भूदेवायोचितं पदम् ।
अदित्सत्प्रणयान्मौयेट् भूदेवः किन्तु नाग्रहीत् ॥ ६२ ॥
भूदेवो विनयेनैव साहेबं प्रत्यभाषत ।

---

५३ । त्रिगणसाधनं त्रिवर्गस्य धर्मार्थकामानां साधनं द्वारम् ।

५४ । ग्रावापि पाषाणोऽपि विद्रवेत् द्रवीभवेत् ।

५८ । पुरा असाधयत् उत्तरकाले सिद्धांश्चकार । सुखसुखेन अकष्टेन अकष्टार्थे प्रियसुखो वा इत्यनेन द्विरुक्तिः ।

६० । अदित्सत दातुमैच्छत् ।

६१ । प्रसेदुषा प्रसन्नतां प्राप्तवता ।

मां प्रति स्निह्यति भवानिति जानामि तत्त्वतः ॥ ६३ ॥
तथापि शिक्षाभागेऽत्र कर्म मह्यं न रोचते ।
नियमा हि विभागेऽस्मिन्नशुद्धा इति मे मतिः ॥ ६४ ॥
न ते सुष्ठूपयुज्यन्त एतद्देशनिवासिनाम् ।
समुन्नतायै शिक्षायै तस्मान्मे तत्र न स्पृहा ॥ ६५ ॥
इत्यवज्ञाय तत्कर्म कर्मान्तरमभीप्सता ।
लिखित्वावेदनं चक्रे भूचक्रेश्वरसन्निधौ ॥ ६६ ॥
कर्मणस्तस्य लाभार्थमनुकूलयितुं पुनः ।
साक्षाच्चक्रे स साहेबं क्यामारस्मिति विश्रुतम् ॥ ६७ ॥
निम्न आदालते कर्म रेजिष्टारपदस्य यत् ।
रिक्तं तत्कर्म भूदेवः षट्शतीवृत्त्ययाचत ॥ ६८ ॥
क्यामारंस्तर्हि साहेब आसीच्छिक्षासभापतिः ।
विधिव्यवस्थासभ्यश्च लमेम्बरिति विश्रुतः ॥ ६९ ॥
भूदेवस्य स साहेबः कलेजे पठतो यदा ।
परीक्षामग्रहीद्धीमांस्तदैवासीत् प्रसेदिवान् ॥ ७० ॥
अतस्तस्य स साहेब इच्छन्नपि समुन्नतिम् ।
नापारयत तस्मै तद् यूने दापयितुं पदम् ॥ ७१ ॥
प्रत्युवाच स साहेबो भूदेवं प्रियमर्थिनम् ।
वाचा सूनृतया किञ्चित् स्मितपूर्वमपूर्वया ॥ ७२ ॥
जानामि तात योग्योऽसि विद्यावान् गुणवानपि ।
तथापि वारयामि त्वामिदं प्रार्थयितुं पदम् ॥ ७३ ॥
मन्येऽधुनापि बालोऽसि मतिः परिणता न ते ।
लौकिकव्यवहारेषु दर्शनं च न ते बहु ॥ ७४ ॥

---

६३ । स्निह्यति स्नेहं करोति । तत्त्वतो याथार्थ्यतः ।

६६ । भूचक्रेश्वरसन्निधौ लेफ्टिनेण्टगवर्णरसन्निधाने ।

६७ । अनुकूलयितुं अनुकूलं कर्तुं । साक्षाच्चक्रे ददर्श ।

६८ । रिक्तं शून्यं षट्शतीवृत्तिर्वेतनं यत्र यस्य वा कर्मणः ।

७० । प्रसेदिवान् प्रसन्नः ।

७१ । यूने अल्पवयस्काय ।

७२ । अपूर्वया नूतनया । सूनृतया प्रियसत्यया ।

एतत्पदाभिलाषात्त्वं निवर्तस्व ततोऽधुना ।
दापयामि पदं किञ्चिन्महाद्वारमिवोन्नतेः ॥ ७५ ॥
कालं कञ्चित्प्रतीक्षस्व यावदन्विष्यते मया ।
यद् यदस्त्यधुना रिक्तं पदमुन्नतमुन्नतम् ॥ ७६ ॥
सहस्व समयं कञ्चित् सहिष्णोः फलति ध्रुवम् ।
मन्ये सहिष्णुना शक्यो ग्रहीतुं भगवानपि ॥ ७७ ॥
तद्वत्स मोत्तमस्तावद् यावदन्विष्य कल्पते ।
समुन्नतिप्रदं किञ्चित् त्वदर्थं सुकरं पदम् ॥ ७८ ॥
भूदेवस्तत्समालोच्य साहेबस्य हितं वचः ।
चतुरः कर्मणस्तस्मादभिलाषं न्यवर्तयत् ॥ ७९ ॥
प्रतीक्ष्य कालं तस्थौ च कालो बीजं हि कर्मणः ।
न फलन्ति विना कालं सिक्ता अपि मुहुर्द्रुमाः ॥ ८० ॥
क्यामारन्नपि साहेबो भूदेवस्य कृते कृती ।
अन्विष्याकल्पयत् किञ्चित् कर्म प्रचुरवेतनम् ॥ ८१ ॥
कस्यचिद् वृटिशः पुंसो वाणिज्याधिकृतौ सुधीः ।
प्रभुरासीत् स साहेबोऽमात्ययोगवियोगयोः ॥ ८२ ॥
भूदेवाय स तत्रैकं कर्म यावददित्सत ।
रुजा कयापि भूदेवस्तावदभ्यमितोऽजनि ॥ ८३ ॥
अन्विष्यापि तमप्राप्य भूदेवं देशमात्मनः ।
साहेबोऽगाद् यदा तर्हि भूदेवोऽनामयं ययौ ॥ ८४ ॥
इत्थं व्याहननेन कर्म तदसौ यत्तोऽपि न प्राप यद्
भूदेवस्तदवैमि तस्य हि शुभादृष्टस्य विस्फूर्जितम् ।

---

७७ । भगवानपि परमेश्वरोऽपि ।

७८ । तत्तस्मात् हे वत्स ! मा उत्तम: उत्तान्तो माभू: । उत्पूर्वात्तमु इच्छा-यामित्यस्य धातोः लुङ्मध्यमपुरुषैकवचनं मा-योगादडागमाभावः । सुकरमकष्टेन साध्यं ।

८१ । भूदेवस्य कृते भूदेवाय दातुम् ।

८२ । प्रभुरासीत् समर्थ आसीत् । अमात्यानां सचिवानां योगे वियोगे च ।

८३ । अभ्यमित: आतुर: ।

८४ । अनामयम् आरोग्यम् ।

उच्चैर्वृत्ति तदेव कर्म सुकरं यद्यग्रहीष्यत्तदा
मन्ये वाञ्छितमुत्तरत्र स पदं न प्राप्स्यदभ्युन्नतम् ॥ ८५ ।

इति श्रीमहेशचन्द्रकृतौ भूदेव-चरिते काव्ये अध्ययन-
समाधानं नाम पञ्चदशः सर्गः ।

षोडशः सर्गः ।

धनार्जनम् ।

उच्चैः परीक्षामुत्तीर्य्य निवृत्तोऽपि कलेजतः ।
न न्यवर्तत भूदेवो विद्याचर्चामहाव्रतात् ॥ १ ॥
अधीताननधीतांश्च ग्रन्थान् सोऽवसरेऽपठत् ।
शास्त्रं हि चिन्तितमपि भ्रश्यत्यप्रतिचिन्तितम् ॥ २ ॥
अर्जयिष्यन्नथ धनं वृटिश्भूपति-शासने ।
आवेदनैः स बहुभिः पदान्युच्चैरयाचत ॥ ३ ॥
चतुःपञ्चशतान्यूना वृत्तिर्येषु व्यवस्थिता ।
महात्मा प्रार्थयामास तान्येवादौ पदानि सः ॥ ४ ॥

---

८५ । इत्थं व्याहननेन एवंप्रकारेण व्याघातेन रोगव्याघातेनेति यावत् । यत्तोऽपि प्रयत्नवानपि, यती प्रयत्ने इत्यस्मात् कर्तरि क्तः, असौ भूदेवस्तत् कर्म यत् न प्राप न लेभे, तत् तस्य भूदेवस्य शुभादृष्टस्य हि शुभादृष्टस्यैव विस्फुर्जितं विलसितम् फलमितियावत् अवैमि उत्प्रेक्षे । स भूदेव उच्चैर्वृत्ति उच्चैरुन्नता वृत्तिर्वेतनं यस्य तादृशं तदेव कर्म यदि अग्रहीष्यत् तदा उत्तरत्र परत्र काले वाञ्छितं अभ्युन्नतं पदं यथा गवर्णमेण्टकर्माणि अभूत् तथा पदं न प्राप्स्यत् प्राप्तो नाभविष्यदित्यर्थः।

१ । चर्चा विचारणा ।

२ । चिन्तितमपि शास्त्रं प्रतिचिन्त्यं पुनः पुनश्चिन्तनीयम् अन्यथा भ्रश्यति नष्टं भवति विस्मर्यते इत्यर्थः ।

४ । चत्वारि वा पञ्च वा शतानि ततोऽन्यूना अनल्पा वृत्तिर्वेतनं येषु पदेषु । महात्मा उन्नताशयः ।

वृटिशां साम्यवादेन विश्वासोऽजनि तस्य हि।
वृटिशः स्वान् परान् वाथ प्रपश्यन्ति समानिति ॥ ५ ॥
न त्वजानात् स सभ्यानां सभ्यतालक्षणं मुखे।
सभ्यतालक्षणानां च साम्यवादः सुलक्षणम् ॥ ६ ॥
साम्यवादो मुखे येषां ते सभ्याः प्रथमे मताः।
अन्तःकरणवृत्तिस्तु कस्य न स्वार्थदर्शिनी ॥ ७ ॥
यथा तथास्तु हृदयं तद् द्रष्टुं को नु शक्नुयात्।
मुखमेव तु पश्यन्ति सर्वे वाचा विभूषितम् ॥ ८ ॥
समाने तमसो मानेऽप्युभयोरपि पक्षयोः।
यस्य रात्रिमुखं शुक्लं स पक्षः शुक्ल उच्यते ॥ ९ ॥
वृटिशानमपि सभ्यानां मुखं तद्वत् सितस्मितम्।
पुष्पितेनेव युक्तेन साम्यवादेन भूषितम् ॥ १० ॥
विश्वकस्य साम्यवादेऽसौ पदेषून्नतवृत्तिषु।
अधिकारं समं मेने वृटिशां वान्यभूभुवाम् ॥ ११ ॥
यदा तेषु पदेषूच्चैर्नियुक्ता वृटिशोऽभवन्।
तदा बुध्यत भूदेवः साम्यवादं विभूषणम् ॥ १२ ॥
अत्रान्तरे स्वदेशस्थैरेकमस्थाप्यत स्कुलम्।
नाम्ना हिन्दुच्यारिटेवल् इन्ष्टियूसन्निति श्रुतम् ॥ १३ ॥
तस्य स्कुलस्य कर्तॄणां सम्मतो मुख्यशिक्षकः।
आसीद् विमृश्य निर्दिष्टो भूदेवो देवसन्निभः ॥ १४ ॥

८। मुखं वदनं आद्यभागः सम्मुखमित्यपि।

९। उभयोरपि पक्षयोः शुक्लपक्षे कृष्णपक्षे च तमसोऽन्धकारस्य माने परिमाणे समानेऽपि तुल्येऽपि यस्य पक्षस्य रात्रिमुखं रात्रेराद्यभागः। स एव मुखं उत्तमाङ्गं शुक्लं भवति स एव पक्षः शुक्लः।

१०। तद्वद् वृटिशामपि शुक्लहसितं मुखं पुष्पितेनेव जातपुष्पेनेव युक्तेन युक्तिसङ्गतेन साम्यवादेन भूषितं भवति अतस्त एव सभ्या उच्यन्ते।

११। वृटिशां वृटन्देशभवानाम् अन्यभूभुवां वृटन्देशभिन्नस्थानभवानां वा अधिकारं समं मेने तुल्यममन्यत। विश्वस्य विश्वासं कृत्वा।

१२। उच्चैः उन्नतेषु पदेषु। विभूषणं विभूषणमेव।

१४। विमृश्य विचार्य्य निर्दिष्टः सम्मतः प्रियः। मुख्यशिक्षकः प्रथमशिक्षक आसीत्

अल्पवृत्त्यपि तत्सोऽपि पदं मेने मनोरमम्।
नियमैरात्मना बद्धैश्चालयामीति चिन्तयन्॥ १५ ॥
रूप्याणां षष्टिरेवाभून्मासिकं वेतनं यदि।
स्वाधीनमिति मत्वा तत् स तथाप्यभ्युपागमत्॥ १६ ॥
कञ्चित्कालं स्कुले तत्र विधायाध्यापनाविधिम्।
मत्वा कलहमासन्नं तत्पदं स जहौ स्वयं॥ १७ ॥
राममोहनरायेण न चिराद् यः प्रवर्तितः।
स ब्राह्मोऽभिनवो धर्मः कलिकातां तदानशे॥ १८ ॥
परिणाममनालोच्य न च वीक्ष्य गुणागुणौ।
धर्मं तं बहवो भेजुर्नागरा हि नवप्रियाः॥ १९ ॥
तस्य स्कुलस्य कोऽप्यासीन्नूतनः परिदर्शकः।
ब्राह्मधर्मे नवे तत्र दीक्षितः कर्तृसम्मतः॥ २० ॥
तेन सार्द्धं समुत्प्रेक्ष्य कलिं हिन्दुविधर्मणा।
भूदेवः कर्म तत् त्यक्त्वा मन्येऽभूद्विगतज्वरः॥ २१ ॥
सुहृद्भिरथ सम्मन्त्र्य कांश्चिद्विद्यालयानसौ।
अस्थापयज् जनपदे स्वयमध्यापयन् शिशून्॥ २२ ॥
सुहृदश्च न्ययुङ्क्तासावाहृत्यानीय शिक्षकान्।
तत्र तत्र स्कुले वृत्तिं विनैवोत्साहशालिनः॥ २३ ॥
चन्दने नगरे पूर्वमेकमस्थापयत् स्कुलम्।
अपरं श्रीपुरे श्रीमानितरञ्च करिमपुरे॥ २४ ॥
सेहाखालभिधे ग्रामे स्कुलञ्चान्यदकारयत्।
स्वयं नियमयंस्तानि स्कुलानि स ददर्श च॥ २५ ॥

१५। अल्पवृत्तिः अल्पा वृत्तिर्वेतनं यत्र तत्पदमित्यर्थः।

१७। जहौ तत्याज

१८। आनशे व्याप्तवान्।

२०। कर्तृसम्मतः कर्तृपक्षस्य प्रियः।

२१। कलहशङ्काराहितत्वाद्विगतज्वरः विगतसन्तापोऽभूत्।

२३। वृत्तिं विनैव वेतनव्यतिरेकेणापि उत्साहशालिनः अध्यापनोद्यतान्।

२४। चन्दने नगरे चन्दननगरे।

२५। नियमयन् नियमान् बद्ध्वा चालयन्।

यदि वोद्दिश्य धर्मार्थौ तानि चक्रे स्कुलानि सः ।
तथापि धर्म एवैको न त्वर्थस्तेभ्य आगमत् ॥ २६ ॥
यद्युद्वृत्तं धनं किञ्चित् कचिदासीत्स्कुले तदा ।
तस्मादन्यत्र तदभूद् व्ययाय विनियोजितम् ॥ २७ ॥
नासीन्मितव्ययस्यापि तस्य किञ्चिद्धनार्जनम् ।
तथापि स्कुलरक्षायै यत्नस्तस्य व्यवर्द्धत ॥ २८ ॥
चन्दनी नगरे स्थित्वा भूदेवोऽध्यापयत् स्वयम् ।
सपक्षान् शिक्षकानन्यान् स्वयं पक्त्वापि भोजयन् ॥ २६ ॥
शाकान्नमेव भुञ्जानो नित्यं वृत्तिमवर्तयत् ।
तथापि नान्वभूत् कष्टं स्वातन्त्र्यसुखनिर्वृतः ॥ ३० ॥
अहो महात्मनां क्षान्तिर्महत्येव, तथाहि सः ।
तादृशेनापि कष्टेन न न्यवर्तत निश्चयात् ॥ ३१ ॥
अथैकदा स्कुले रुद्धे पित्रोः पाददिदृक्षया ।
गृहं जगाम भूदेवः प्रीणयन् बन्धुबान्धवान् ॥ ३२ ॥
अन्येद्युः सोऽथ सायाह्ने चण्डीमण्डपगर्भगः ।
बहिः पितुरिवालापं शुश्राव प्रतिवेशिनः ॥ ३३ ॥
चण्डीमण्डपिकालिन्दे निषण्ण स्तर्कभूषणः ।
शम्भुघोषेण संलापं चकार प्रतिवेशिना ॥ ३४ ॥
उवाच विश्वनाथस्तं शम्भुघोषमुपस्थितम् ।
ऋणं कन्याप्रदानाय देहि त्वं मम किञ्चन ॥ ३५ ॥
तथेति प्रतिवेशी स प्रतिश्रुत्य ऋणार्पणम् ।
कियतार्थेन भवतः कार्य्यमित्यन्वयुङ्क्त तम् ॥ ३६ ॥
रूप्याणां यदि मे दद्या ऋणं सार्द्धशतद्वयम् ।

---

२७ । उद्वृत्तं व्ययं कृत्वाप्यतिरिक्तम् ।

३० । वृत्तिं जीविकां स्वातन्त्र्यमपराधीनता तस्य सुखेन निर्वृतः सुस्थितः तथाच मनुः "सर्वं परवशं दुःखं सर्वमात्मवशं सुखं" इति ।

३१ । क्षान्तिः क्षमा सहिष्णुतेति यावत् ।

३२ । पाददिदृक्षया चरणदर्शनेच्छया । मातुः पितुश्च, प्रीणयन् सन्तोषयन् ।

३४ । चण्डीमण्डपिकालिन्दे चण्डीमण्डपस्य द्वाराद्बहिःप्रकोष्ठे । निषण्णः उपविष्टः, संलापं परस्परालापं "संलापो भाषणं मिथः" ।

तदा प्रयोजनं सिद्धयेदित्यूचे तर्कभूषणः ॥ ३७ ॥
तदेव दातुं स्वीकृत्य शम्भुस्तस्मै विपश्चिते ।
पुनरप्यब्रवीत्तस्य व्यथामनुभवन्निव ॥ ३८ ॥
इदमत्यद्भुतं मन्ये विद्यावत्यर्जनक्षमे ।
तादृशे सत्यपि सुते भवान् यदवसीदति ॥ ३९ ॥
अद्यापि भवतो दुःखमहो बत न खण्डितम् ।
सुतेन तेन यूनापि धिग् दैवस्य विडम्बनाम् ॥ ४० ॥
इति श्रुत्वा वचस्तस्य व्यलपत्तर्कभूषणः ।
खण्डयेत् कस्य को दुःखं स्वकर्मफलभुग् जनः ॥ ४१ ॥
अज्ञास्यद् यदि भूदेवमासन्नं रहसि स्थितम् ।
नावक्ष्यत्तादृशं तर्हि वचनं तर्कभूषणः ॥ ४२ ॥
आलापमावयोरन्यो न कोऽपि शृणुयादिति ।
विश्रम्भादेव दुःखं स्वं शम्भुघोषस्य सोऽब्रवीत् ॥ ४३ ॥
परन्तु तद्वचः सद्यो भूदेवस्य श्रुतौ लगत् ।
विद्वांसं प्रियपुत्रं तं मर्मणीव व्यदारयत् ॥ ४४ ॥
स पितुर्वचसा तेन भृशं व्यथितमानसः ।
पित्रा यद्यत्कृतं कष्टं सर्वं सस्मार तत्तदा ॥ ४५ ॥
स निगूह्येङ्गिताकारौ दह्यमान इवाधिना ।
उन्निद्रश्चिन्तयामास स्वगतं निखिलां निशाम् ॥ ४६ ॥

३७। सार्द्धशतद्वयं अर्द्धशतेन सह शतद्वयमित्यर्थः २५० शतसंख्या ।

३८। विपश्चिते पण्डिताय ।

४०। विडम्बनां कदर्थनां दुःखदानमित्यर्थः ।

४१। व्यलपद्विलापं चकार, कीदृशं विलापमित्याह—को जनः कस्य दुःखं खण्डयेद् विनाशयेत्; तत्र समर्थनं—जनः स्वकर्मफलभुक् आत्मनैव आत्मकर्मफलं भुङ्क्ते इत्यर्थः ।

४२। रहसि निर्जने अज्ञास्यत् ज्ञातवान् अभविष्यत् क्रियातिपत्तिः। नावक्ष्यत् न अकथयिष्यत् ।

४३। शम्भुघोषस्य शम्भुघोषसमीपे सामीप्यसम्बन्धे षष्ठी ।

४६। निगूह्य संवृत्य गोपयित्वा । आधिना मनःपीडया ।

हन्त यस्य प्रसादेन मनुष्यत्वं मयार्जितम्।
तं विस्मृत्य चराम्येष कृतघ्नः परपुष्टवत् ॥ ४७ ॥
वृथा मयार्जिता विद्या धिङ् मां पण्डितमानिनम्।
पितुः कष्टं विलोक्यापि पशुवन्निर्वृणोमि यः ॥ ४८ ॥
देवभाषां परित्यज्य म्लेच्छभाषामहं यदा।
अध्येतुमैच्छं स तदा तामेवाध्यापिपत् पिता ॥ ४९ ॥
अथ हिन्दुकलेजेऽपि प्रविश्याध्येतुमिच्छतः।
अभ्यनुज्ञां ममायच्छद् वेतनं च सुदुर्वहम् ॥ ५० ॥
मम स्नेहरसेनैव जाने यो दुर्गतेरपि।
ज्वालां कथञ्चिन्निर्वाप्य धुरं सर्वां ममावहत् ॥ ५१ ॥
क्वचिद् यदि विलम्बोऽभूत् स्कुलादागच्छतो मम।
तदा यो द्वारि निर्गत्य पन्थानं मे व्यलोकयत् ॥ ५२ ॥
पितृदेवस्य तस्याहं प्रियमाधाय शक्नुयाम्।
विस्मारयितुमाधिञ्चेत्तदा मम भवेद्धृतिः ॥ ५३ ॥
मूर्त्तिमानिव वात्सल्यरसो मे वत्सलः पिता।

४७। परेण काकेन पुष्टः पालितः कोकिलः, तस्य सदृशः।

४८। निर्वृणोमि सुस्थो भवामि, पण्डितमानिनं पण्डितम्मन्यं।

४९। देवभाषां संस्कृतम्। म्लेच्छभाषां इंरेजीम्। ऐच्छम् इच्छामकरवम्। अध्यापिपत् अपाठयत्।

५०। हिन्दुकलेजेऽपि अधिकवेतनेन प्रवेशनीयेऽपि। मम अभ्यनुज्ञां आभिमुख्येन अनुमतिम् अयच्छत् दत्तवान् मम वेतनं च सुदुर्वहं दरिद्रतया दातुमशक्यमपि अयच्छत् दत्तवान्।

५१। स्नेह एव प्रेमैव रसः आस्वादनीयम् वस्तु स एव स्नेहरसः स्निग्धतारूपं द्रवद्रव्यं जलमित्यर्थः तेन द्वारा दुर्गतेरपि दारिद्र्यस्यापि ज्वालां तापं निर्वाप्य प्रशमय्य रसो हि ज्वालाशान्तेर्द्वारम्। मम सर्वां धुरं भारं अवहत्।

५२। क्वचित् कुत्रचिद्दिने।

५३। प्रियमाधाय प्रियं कर्म कृत्वा, आधिं मनःपीड़ां। धृतिः सन्तोषो धैर्य्यं वा। पितृदेवस्य इत्यत्र कर्मणि षष्ठी स्मृत्यर्थस्य च इत्यनेन।

कथं तस्य प्रियं कुर्य्यां मनागपि महात्मनः ॥ ५४ ॥
इत्थं नातिचिरं ध्यात्वा पर्य्यवस्थापयन्मतिम् ।
उदपश्यत् पुरः कञ्चिदुपायं विश्वनाथजः ॥ ५५ ॥
मुहूर्त्तादथ भूदेव उत्थाय निभृतं ययौ ।
स्वरूपचन्द्रं सुहृदं बन्द्योपाध्यायमाख्यया ॥ ५६ ॥
द्वे शते च शतार्द्धं च रूप्याणामविलम्बितम् ।
सख्युस्तस्मादृणं कृत्वा पितुः पद्भ्य उपाहरत् ॥ ५७ ॥
उवाच चाञ्जलिं बद्ध्वा भूदेवो विनयानतः ।
प्रदीयते मया तात यत् किञ्चिद्वसु गृह्यताम् ॥ ५८ ॥
विश्वनाथोऽपि तत्प्राप्य द्रविणं प्रीतिनिर्भरः ।
उवाच साधु वत्स त्वं काले वृष्टोऽसि मेघवत् ॥ ५९ ॥
इत्याधाय पितुः प्रीतिं स मनागुच्छ्वसन्निव ।
उदतिष्ठत संहृत्य स्कुलान्यर्जयितुं धनम् ॥ ६० ॥
अथ शिक्षाविभागस्य सम्पादकमुपागमत् ।
मयाट् साहेबमचिराद् भूदेवः कर्ममार्गणः ॥ ६१ ॥
उपातिष्ठत भूदेवः साहेबं यत्र वासरे ।
रविवारः स आसीद्यत् तन्नाज्ञासीत् स सत्वरः ॥ ६२ ॥
उपासनां विनान्यानि प्रायेण खृष्टसेवकाः ।
न हि कुर्वन्ति कर्माणीत्येतत्तेषां व्रतं मतम् ॥ ६३ ॥
तत्र वारे तमायात दृष्ट्वा किञ्चिद्विरक्तवत् ।

५४। वत्सलः स्नेहवान् । मनागपि ईषदपि ।

५५। उदपश्यत् उत्प्रेक्षितवान् व्यतर्कयदित्यर्थः । पुरः अग्रतः सम्मुखे इत्यर्थः ।

५९। वृष्टोऽसि इत्यत्र कर्तरि क्तः रुहादित्वाद् वृषधातोः ।

६०। उदतिष्ठत उद्योगमकरोत् ।

६१। कर्ममार्गणः कर्मान्वेषी ।

६२। उपातिष्ठत उपस्थितोऽभवत्, संगत्यर्थे आत्मने पदम्, गङ्गा यमुनामुपतिष्ठते इत्यादिवत् ।

६३। व्रतं नियमः ।

मयाद् तमब्रवीत् कस्मादद्य प्राप्तस्त्वमज्ञवत् ॥ ६४ ॥
प्रत्युत्पन्नमतिः सद्यो भूदेवः प्रत्युवाच तम् ।
प्रकाशयन्निवाकूतमाकारेङ्गितकाकुभिः ॥ ६५ ॥
रव्यहे पुण्यकर्माणि न निषिद्धानि वः किल ।
याचितुं तेन दानञ्च दयाञ्च समुपागमम् ॥ ६६ ॥
तस्य तद्वचनं श्रुत्वा मयाद् प्रीततरोऽभवत् ।
माहात्म्यस्तुतिवादेन मन्येऽरिरपि तुष्यति ॥ ६७ ॥
विशेषतश्च भूदेवस्तस्यासीद्वस्तुतः प्रियः ।
प्रियस्य वहुमानेन सोऽन्तरार्द्र इवाभवत् ॥ ६८ ॥
अथोपवेश्य भूदेवमादरादवदन्मयाद् ।
द्वे एव कर्मणी रिक्ते हस्ते स्तो मम सम्प्रति ॥ ६९ ॥
माद्रासाख्यकलेजस्य पञ्चाशद्रूप्यवृत्तिकम् ।
शिक्षकस्य द्वितीयस्य कार्य्यमेकतरत्तयोः ॥ ७० ॥
ततोऽप्यधस्तनं कर्म पञ्चसप्ततिवृत्तिकम् ।
अन्यद् हिन्दुकलेजेऽस्ति कतरत्तेऽभिरोचते ॥ ७१ ॥
तदाकर्ण्य तु भूदेवो गुणदोषौ विचारयन् ।
स्वगतं मन्त्रयामास विनीतो नीतिमार्गवित् ॥ ७२ ॥
द्वितीयशिक्षकस्यैव वरं कर्माल्पवृत्त्यपि ।
बहुवृत्त्यापि न त्वन्यन्नीचान्नीचतरं हि तत् ॥ ७३ ॥
इति स्वयं समालोच्य साहेबं प्रत्यवोचत ।

---

६४ । अज्ञवत् तदज्ञातवानिव ।

६५ । प्रत्युत्पन्नमतिः प्रत्युत्पन्ना प्रतिपक्षे उत्पन्ना जाता मतिर्यस्य स तादृशः, यस्य बुद्धिस्तत्क्षणादेव प्रतिकारं पश्यति तादृशो जनः । आकूतम् आशयं भावमित्यर्थः । प्रकाशयन् सूचयन्निव ।

६६ । रव्यहे रविवारे ।

७१ । कतरत् ते तुभ्यं अभिरोचते सर्वतोभावेन रुचिविषयो भवति । द्वयोर्मध्ये किं इत्यर्थे कतरत् ।

७२ । गुणदोषौ गुणागुणौ । विचारयन् विचारयितुमित्यर्थः । लक्षणहेत्वोः क्रियाया इति अनेन हेत्वर्थे शतृः ।

७३ । वरं मनाक् प्रियं ।

रिक्तं यत्कर्म माद्रासाकलेजे तदहं वृणे ॥ ७४ ॥
साहेबोऽपि मयाद् तस्य मनसा भावमुन्नयन् ।
अन्वमन्यत तत्तस्मै ददौ कर्म च मा चिरम् ॥ ७५ ॥
द्वितीयस्यापि भूदेवः शिक्षकस्य पदे स्थितः ।
मुख्यशिक्षकवच्छात्रानुच्चैः शास्त्राण्युपादिशत् ॥ ७६ ।
स माद्रासाकलेजस्य सर्वेषां न चिरादिव ।
छात्राणां शिक्षकाणाञ्च जहार चरितैर्मनः ॥ ७७ ॥
विधर्माणोऽपि ते छात्राः कोरिणमतसंश्रिताः ।
नाद्विषुर्हिन्दवे तस्मै चक्रुः प्रत्युत सौहृदम् ॥ ७८ ॥
अयं हिन्दुरसौ खृष्टान् स मुसल्मानपीति च ।
भेदज्ञानं न तस्यासीत् तथा ह्यस्ति सुभाषितं ॥ ७९ ॥
" अयं निजः परो वेति गणना लघुचेतसां ।
उदारचरितानान्तु वसुधैव कुटुम्बकम् " ॥ ८० ॥
तथाहि प्रथमश्रेण्या अपिच्छात्राः सभक्तयः ।
स्वाच्छिक्षकादधीत्यापि तस्माद्भूयोऽध्यगीषत ॥ ८१ ॥
भूदेवस्य गृहं गत्वाऽप्यध्यगीषत तेऽन्वहम् ।
सोऽपि हिन्दुनिवाहत्य प्रासानुपदिदेश तान् ॥ ८२ ॥
तदा कलेजे तत्रैको मिष्टार् क्लिङ्गार इत्यभूत् ।
प्रथमश्रेणिशिष्याणां खृष्टीयानेव शिक्षकः ॥ ८३ ॥
पाणौ गृहीत्वा भूदेवमसौ प्रथमशिक्षकः ।
अब्रवीदेकदा स्मित्वा रहः प्रेमोद्गिरन्निव ॥ ८४ ॥
भो महात्मंश्चरित्रं ते दिव्यं मन्यामहे वयम् ।
छात्राणां शिक्षकाणाञ्च येनासि हृदयङ्गमः ॥ ८५ ॥
छात्रा इमे कलेजस्य तथा त्वय्यनुरागिणः ।

---

७४ । वृणे याचे ।

७६ । उच्चैः शास्त्राणि उन्नतानि शास्त्राणि ।

८१ । अध्यगीषत अधीतवन्तोऽभूवन् । अधिपूर्वात् इङ् अध्ययने इत्यस्मात् लुङ आत्मने पदस्य प्रथमपुरुषबहुवचनम् ।

८२ । अन्वहं अहन्यहनि वीप्सार्थेऽव्ययीभावः ।

८४ । स्मित्वा ईषद्धसित्वा ।

अधीत्यापि यथेच्छन्ति प्रतिबोद्धुं तवान्तिके ॥ ८६ ॥
तदहं तव साहाय्यं किञ्चिदिच्छामि भोः प्रिय ।
मुहूर्तं प्रथमश्रेणीमपि चाध्यापयेरिति ॥ ८७ ॥
सङ्गीतं शिक्षितुं कश्चिद् भृतिं दत्त्वा मदिच्छति ।
तं शिक्षयितुमीशः स्यां यदि त्वं मे धुरं वहेः ॥ ८८ ॥
इति शिक्षकमुख्येन तेनोक्तो विश्वनाथजः ।
अभ्युपेयाय तद्विद्वान् परस्योपचिकीर्षया ॥ ८९ ॥
तदादि प्रथमश्रेण्या भूदेवे भारमर्पयन् ।
द्वित्रा होराः कलेजं स त्यक्त्वान्यत्रान्वहं ययौ ॥ ९० ॥
केवले जीववारे तु कलेजं न मुमोच सः ।
शङ्के सशङ्कः साहेबात् कर्णेलूरेलीति विश्रुतात् ॥ ९१ ॥
जीववारे जीववारे साहेबो नियमेन सः ।
आगत्यागत्य माद्रासाकलेजं पर्य्यवैक्षत ॥ ९२ ॥
स भीमदर्शनो रोमहर्षणो दुष्प्रधर्षणः ।
आकृत्या यमदूताभः सर्वेषां चित्तकम्पनः ॥ ९३ ॥
जीववारे महातेजाः कलेजं परिलोकयन् ।
भूदेवस्य द्वितीयायां श्रेण्यां किञ्चिदुपाविशत् ॥ ९४ ॥
अथोत्थायेङ्गितेनासौ भूदेवमुपहूतवान् ।
प्रविश्य पुस्तकागारं न्यषीदत् प्रतिपालयन् ॥ ९५ ॥
भूदेवोऽपीङ्गितं ज्ञात्वा तत्क्षणात्तमनुव्रजन् ।
विविक्तं तद्गृहं गत्वा तस्थौ पश्यंस्तमग्रतः ॥ ९६ ॥
पप्रच्छ रेलिसाहेबो भो द्वैतीयिकशिक्षक ।
भवानध्यापयति किं प्रथमश्रेणिबालकान् ॥ ९७ ॥
तं प्रत्युवाच भूदेवः श्रेण्योराद्यतृतीययोः ।

---

८७ । मुहूर्तमल्पकालम् ।

८८ । मदिच्छति मत् मत्तः इच्छति ।

९० । होरा राश्यर्द्धभागः अत्र तु सूर्यस्य राश्यर्द्धभागगमनोपलक्षितः कालः, स च अहोरात्रस्य चतुर्विंशभागः घण्टा इत्यर्थः । द्वे वा तिस्रो वा इमा इति द्वित्राः । द्वे वा घण्टे तिस्रो वा घण्टा व्याप्येत्यर्थः । सार्द्धद्विदण्डात्मककालस्य द्विगुणं त्रिगुणं वा कालं व्याप्येत्यर्थः ।

छात्रा अपि लभन्ते मत्साहाय्यं स्वास्वधीतिषु ॥ ९८ ॥
इत्युक्तवति भूदेवे स तु गर्जन् कदुष्णवत् ।
भूदेवमब्रवीन्मादृशः प्रश्नस्योत्तरमन्यथा ॥ ९९ ॥
अयुक्तेनोत्तरेण त्वं प्रश्नं निरसितुं मम ।
कथमिच्छसि भूदेव यथावृत्तं स्फुटं वद ॥ १०० ॥
अन्यत्र याति निर्गत्य कलेजान्मुख्यशिक्षकः ।
तदा त्वं प्रथमश्रेणीमध्यापयसि वा न वा ॥ १०१ ॥
जातशङ्कोऽपि साहेबाद् भूदेवो गर्जितादपि ।
न तत्याज गिरो दार्ढ्यमभिजातो ह्यनन्यवाक् ॥ १०२ ॥
स उवाच किमेवं मामनुयुङ्क्ते मुहुर्भवान् ।
मुख्यशिक्षक एवास्ति प्रश्नस्तं प्रति युज्यते ॥ १०३ ॥
वरं तमाह्वयाम्येष यद्यादिशति मां प्रभुः ।
स एव मन्ये दद्याद्वः प्रश्नस्योत्तरमुत्तमम् ॥ १०४ ॥
प्रसीदतु मम श्रीमान् मन्तुं मे क्षन्तुमर्हतु ।
अयथावत् प्रतिगिरा न तं दूषयितुं क्षमे ॥ १०५ ॥
इत्याकर्ण्य पुनर्गर्जन् कर्णेल् रेलिः समुत्थितः ।
उवाच किं न शक्नोमि प्रष्टुं त्वामहमीदृशम् ॥ १०६ ॥
इत्युक्त्वाऽग्रे सरत्येव साहेबे तत्र भीषणे ।
शशङ्के हृदि भूदेवस्तस्मात्कश्चित् पराभवम् ॥ १०७ ॥
किन्तु भूदेवमासाद्य कर्णेल् रेलिः प्रहृष्टवत् ।
तस्य मूर्ध्नि करं दत्त्वा समादृत्याब्रवीदिदम् ॥ १०८ ॥
युवन् भूदेव त्वं व्यवहरसि चेदित्थमनिशं

---

९८ । स्वासु अधीतिषु आत्मीयेषु पाठेषु । मत् मत्तः साहाय्यं लभन्ते ।

१०० । निरसितुं खण्डयितुं निःक्षेप्तुमित्यर्थः ।

१०२ । अभिजातो महाकुलजातो जनः अनन्यवाक् अनन्या एका वाक् यस्य तादृशो भवति ।

१०३ । अनुयुङ्क्ते पृच्छति ।

१०५ । मन्तुं अपराधं क्षन्तुं सोढुमर्हतु । अयथावत् यथावृत्तं तस्य अन्यथा । प्रतिगिरा प्रति वचनेन उत्तरेणेत्यर्थः ।

१०७ । अग्रे सरति अभिमुखमागच्छति सति ।

दृढ़त्वं संरक्षन्नविसदृशयोर्वाङ्मनसयोः ।
भवेदौश्चत्यं ते जगति न चिरात्तर्हि नियतं
न चालक्ष्मीर्मन्ये क्वचिदपि भवन्तं परिभवेत् ॥ १०६ ॥

इति श्रीमहेशचन्द्रकृतौ भूदेव-चरिते काव्ये धनार्जनं
नाम षोड़शः सर्गः ।

सप्तदशः सर्गः ।

धनार्ज्जनम् ।

तस्मिन् कलेजादथ रेलि नाम्नि
साहिवसिंहे निरिते भयार्त्तः ।
भूदेवमाह स्म स शिक्षकोऽग्र्यः
कः स्वेन दोषेण न शङ्कितः स्यात् ॥ १ ॥
भूदेव मन्निष्क्रमणं कलेजात्
किं रेलिसाहेवमजिज्ञपस्त्वम् ।
साहेवसिंहोऽपि मतन्निशम्य
सत्यं मम ब्रूहि किमुक्तवान् वा ॥ २ ॥
शङ्कां स आत्मन्यवगम्य तस्य
कोष्णोऽब्रवीत्तं प्रति वैश्वनाथिः ।
शङ्केदृशी किं मयि युज्यते ते

---

१ । अविसदृशयोः एकरूपयोः यादृशी वाक् तादृशं मनः ।
तुल्ययोर्वचनमानसयोरित्यर्थः । दृढ़त्वं दार्ढ्यं । अलक्ष्मीर्दौर्गत्य-
मित्यर्थः । न परिभवेत् न अभिभवेदित्यर्थः ।

१ । रेलिनामके, साहेबः सिंह इवेति साहेवसिंहस्तस्मिन् , कलेजात् निरिते
निर्गते सति भयेन ऋतो भयार्त्तः स उक्तपूर्व्वः अग्रे भवोऽग्र्यः
प्रधानं प्रथमशिक्षक इति यावत् । स्वेन आत्मीयेन दोषेण कः शङ्कितो
न स्यात् अपि तु सर्व्व एव ।

२ । अजिज्ञपः ज्ञापितवानसि ।

पुत्रोऽस्म्यहं ब्राह्मण-पण्डितस्य ॥ ३ ॥
इत्युक्तवांस्तस्य निरस्य किञ्चिच्-
शङ्कां ययौ वेश्म स शुद्धचेताः ।
तथाप्यसौ नातिविशुद्धचित्तः
क्लिंगारपि स्वं भवनं जगाम ॥ ४ ॥
अह्न्यथैकत्र शुभे मयाट-
साहेवमालोकयितुं प्रतस्थे ।
भूदेव उत्कण्ठितचेतसोऽस्य
जानन्निवेच्छामविलम्बमानः ॥ ५ ॥
मयाट् स्मृतोपस्थितमीक्षमाणो
भूदेवमानन्दितवानुवाच ।
धन्योऽसि भूदेव गुणेन यस्त्वं
विधेयतां द्वीपिनमप्यनैषीः ॥ ६ ॥
तद् ब्रूहि भो विस्मयनीयकीर्त्ते
व्याघ्रं कथंकारमतूतुषस्त्वं ।
इतीरयित्वा विरते मयाटि
तं विस्मितोऽवैक्षत वैश्वनाथिः ॥ ७ ॥
निरुत्तरं वीक्ष्य सविस्मयं तं

---

३ । कोष्णः ईषदुष्णः किञ्चित् कुपित इत्यर्थः । अहं ब्राह्मणपण्डितस्य पुत्रः इत्यनेन परेषामनपकारीति व्यज्यते अतो मयि शङ्कां मा कृथाः ।

४ । निरस्य निवार्य्य । क्लिंगार इति माद्रासाकलेजस्य प्रथमशिक्षकस्य नाम ।

५ । उत्कण्ठितमुत्तान्तं चेतो यस्य तस्य, अस्य मयाट्साहेवस्य इच्छां जानन्निव अविलम्बमानो द्रुतं प्रतस्थे इत्युत्प्रेक्षा ।

६ । स्मृतोपस्थितम् आदौ स्मृतः पश्चादुपस्थित इति तादृशस्तं । विधेयतां वश्यतां, द्वीपिनं व्याघ्रं ।

७ । विस्मयनीयकीर्त्ते विस्मयते यया सा विस्मयनीया क्वचित् करणसम्प्रदानयोश्च इत्यनेन स्नानीयं तैलं इत्यादिवत् करणे अनीयङ्, विस्मयनीया कीर्त्तिर्यस्य हे तादृश । विश्वनाथस्य अपत्यं पुमान् इति वैश्वनाथिः दाशरथिशब्दवत् ।

जगाद भूयोऽपि मयाट् सहासः ।
न बुध्यसे मद्वचनं यदीदं
स्पष्टं तदा वच्मि बुधावधेहि ॥ ८ ॥
व्याघ्रोपमं केन गुणेन कर्णेल-
रेलीति साहेबमतू तुषस्त्वम् ।
स तुभ्यमुच्चैः पदमाशु दातु-
मागत्य मामन्वरुणत् स्वयं हि ॥ ९ ॥
तथैव तोषस्त्वयि तस्य जातो
यथा स्वयं तुच्छतयाप्ययोग्यम् ।
निकेतमत्युच्चपदोऽपि कर्णेल्
तवोपकाराय ममाभ्यगच्छत् ॥ १० ॥
पदं यदस्त्यग्रिम-शिक्षकस्य
हावड़ास्कुले सार्द्धशतैकवृत्ति ।
नियुज्यसे तत्र गुणैरनूनैः
साहेबयोग्येऽपि पदे त्वमद्य ॥ ११ ॥
इति प्रवृत्तिं कुशलां सुवृत्तो
भूदेवमुक्त्वा व्यसृजत् प्रतोष्य ।
छित्रैरहोभिस्तमथ न्ययुङ्क्त
मयाट् पदे तत्र निदेशलिप्या ॥ १२ ॥
धीरोऽङ्कवेदाष्टशशाङ्कसङ्ख्ये
खृष्टीयवर्षे शरदः प्रवृत्तौ ।
आगष्टमासस्य पदे स तस्मि-

८। अवधेहि मनोयोगं देहि इत्यर्थः ।

९। अन्वरुणत् अनुरुद्धवान् ।

१०। तुच्छतया निकृष्टत्वेन । अयोग्यमपि तदागमनस्य अनुचितमपि मम निकेतनं गृहं यथा स्वयमात्मना अभ्यगच्छत् अभिगतोऽभवदित्यर्थः ।

११। अग्रिमशिक्षकस्य प्रथमशिक्षकस्य । अर्द्धेन सह वर्त्तमानं सार्द्धं शतैकं शतमात्रं वृत्तिर्वेतनं यस्य पदस्य तत्पदम् ।

१२। सुवृत्तः सच्चरित्रः मयाट् इति प्रवृत्तिं वार्त्तां निदेशलिप्या आज्ञालेखेन ।

अभूत्त्रयोविंशदिने नियुक्तः ॥ १३ ॥
एवम्प्रायं वत्सरं कर्म कृत्वा
माद्रासाख्ये वैश्वनाथिः कलेजे ।
मासे मासे वेतनस्यार्द्धमर्द्धं
दायं दायं सख्युरानृण्यमापत् ॥ १४ ॥
पित्रे चान्यन्मासि मास्यर्द्धमर्द्धं
दत्त्वा दत्त्वाप्रीणयद् भक्तिपूर्वम् ।
नापृच्छत्तं विश्वनाथोऽपि हृष्टो
वृत्तेरर्द्धैः किं करोषीति जातु ॥ १५ ॥
विधाय मासैर्दशभिर्मितव्ययी
स्वरूपचन्द्रस्य ऋणस्य निष्क्रयम् ।
समुन्नतं प्राप्य पदं च निर्वृतः
स सर्वयत्नेन शिशूनपाठयत् ॥ १६ ॥
माद्रासाख्ये कलेजे निजगुणविभवैः कीर्तिसोपानपङ्क्तिं
यद्यद्बद्ध्वाध्यरोहत्पदमुपरितनं वैश्वनाथिस्तया तत् ।
तद्वद् हावड़ास्कुलेऽपि द्रुतमधिकतरामुन्नतिं लब्धुकाम-
श्छात्रानध्यापिपत् स स्वविधिनियमितान् सूनुरध्यापकस्य ॥१७॥

---

१३ । अङ्का नव वेदाश्चत्वारः अष्टौ शशाङ्क एकः, अङ्कस्य वामागतिरिति शास्त्रेण १८४९ इयत्सङ्ख्यकखृष्टाब्दे शरद ऋतोः प्रवृत्तौ आरम्भे आगष्टमासस्य त्रयोविंशतिदिने स धीरः तस्मिन् पदे नियुक्तोऽभूदित्यर्थः ।

१४ । एवम्प्रायं इत्थम् प्रकारं कर्म वत्सरं एकवत्सरं व्याप्य कृत्वा मासेऽर्द्धं पञ्चविंशतिं रजतानि दायं दत्त्वा सख्युर्मित्रस्य आनृण्यमृणपरिशोधन-मापत् लेभे ।

१५ । वृत्तेर्वेतनस्य अर्द्धैरर्द्धैः ।

१६ । निष्क्रयं परिशोधं । निर्वृतः सुस्थः ऋणशुद्धेरित्यर्थः । सर्वयत्नेन कायिकेन वाचिकेन मानसिकेन यत्नेनेत्यर्थः ।

१७ । निजगुणविभवैः निजगुणानामात्मीयानां विद्याबुद्धिप्रभृतीनां विभवैः सामर्थ्यैः शक्तिभिरिति यावत् । तया कीर्त्तिसोपानपङ्क्त्या तदुपरितनं उपरिभवं पदं हावड़ास्कुलस्य प्रथमशिक्षकतापदम् अध्यरोहत् आरोह

हावड़ा-स्कुले प्रथमशिक्षकतापदस्थोऽ-
प्युच्चावचाः परपरा अपि शिष्यपङ्क्तीः ।
सोऽध्यापिपत्प्रतिदिनं स्वयमेव गत्वा
स्वाच्छिक्षकादपि कृताध्ययना मुहूर्तम् ॥१८॥
तत्र स्कुले प्रथमतः स ददर्श गत्वा
विद्यार्थिनः षड़धिकं शतमेव बालान् ।
द्वौ शिक्षकौ च मतिमान् स्वसहायभूतौ
एकं द्वितीयमपरञ्च तृतीयमेव ॥१९॥

मुख्यश्रेणिगतान् स्वयं स विशदं छात्रान् यथाध्यापिप-
न्नीचश्रेणिगतान् सतोरपि तयोर्बालांस्तथोपादिशत् ।
स प्रायेण जगाद भित्तिरचना मूलाभ चेत्स्याद् दृढ़ा
तर्ह्युच्चैरपरैर्दृढै रपि किमु स्थैर्य्यं भवेत् सद्मनः ॥२०॥

अभ्यस्यतां प्रथमपाठमपि स्कुलेऽस्मिन्,
विद्यार्थिनां तदुपदेशविशेषभाजाम् ।
उच्चारणं विशदमर्थगतिश्च तथ्या
पाठक्रमोऽजनि स दीप इवार्थदर्शी ॥२१॥

हज्सन् प्राटिति विश्रुतः श्रुतयशाः साहेब आसीत्तदा
दण्डे तत्पुरमण्डलस्य करसंग्राहे च युक्तः कृती ।
प्रायेणोपययौ कलेकूटरपि स द्रष्टुं तदेतत् स्कुलम्
भूदेवस्य गुणैररज्यत रुचा गौरोऽपि गौरप्रियः ॥२२॥

स्वविधिनियमितान् स्वैरात्मीयैः स्वकृतैरिति यावत् विधिभिर्नियमैर्नियमितान् नियन्त्रितान् बद्धानिति यावत् । अध्यापकस्य सूनुरित्यनेन विशेषणेन अध्यापनारीतिं विशेषरूपेण स विवेदेति व्यज्यते ।

१८ । उच्चावचा उच्चैश्च नीचैश्च इति उचावचा उच्चाः नीचाश्च पङ्क्तीरित्यर्थः ।

२० । विशदं स्पष्टं । तयोः द्वितीयतृतीयशिक्षकयोः सतोरपीत्यर्थः ।

२१ । अर्थदर्शी अर्थमभिधेयं दर्शयतीति तादृशः ।

२२ । तत्पुरमण्डलस्य नगरचक्रवालस्य चौरदस्युप्रभृतीनां दण्डे शास्तिदाने राजस्वसंग्रहे च युक्तः राज्ञा नियुक्त आसीत् कलेकूटर-माजिष्टर आसीत् इत्यर्थः रुचा कान्त्या गौरोऽपि गौरवर्णोऽपीत्यर्थः तथा गौर-

हावड़ास्कुलस्य समितेः कमिटीति नाम्न्याः
सेक्रेटरीपदमधिष्ठितवांश्च सोऽभूत् ।
तेनैव स व्यतिकरेण यथावकाशं
द्रष्टुं कलेक्टरपि तत् स्कुलमाजगाम ॥२३॥
भूदेवस्य गुणं चरित्रममलं चाध्यापनाकौशलं
सौजन्यञ्च विलोक्य तत्र सहृदा प्रीतिं ववन्ध स्थिराम् ।
भूदेवे परलोकमप्युपगतेऽतीतेऽपि काले वहौ
साहेबस्य हृदो न विप्रयुयुजे पाषाणरेखेव या ॥२४॥
भूदेवे परलोकमीयुषि पुरा पत्रेषु वार्ताहरे-
ष्वालोक्योल्लिखितं तदीयमशुभोदन्तं मुदन्तं सताम् ।
दीर्घायुः स महाशयो यदशुचत् पत्रे लिखित्वेण्डियान्
म्यागेजिन्निति नाम्नि तस्य तमनु प्रेम्नः प्रमाणन्तु तत् ॥ २५ ॥
भूदेवस्य दिवं गतस्य महिमस्तोत्रप्रसङ्गादसौ
सर्वेषामपि गौरवं कथितवान् वङ्गावनीवासिनाम् ।
विप्राणान्तु विशेषतः सरलतां तुष्टाव नैसर्गिकीं
सर्वे हन्त पतन्ति हि स्मृतिपथे बन्धौ मृते तद्गुणाः ॥ २६ ॥
हज्सन् प्राद् करुणं पुरा यदलिखत् तद्वदयतेऽग्रे मया
नेदानीं तदमङ्गलं कथयितुं कल्याणिनो युज्यते ।
भूदेवस्य महोपकारमकरोद् यं यं महाबन्धुवत्

प्रियोऽपि गौरवर्णा जनाः इंलण्डीयाः प्रिया यस्य तादृशोऽपि भूदेवस्य गुणैः अरज्यत रागवान् अभवत इंलण्डीयोन् हि कृष्णद्वेषी तथापि भूदेवं प्रति सोऽनुरक्तोऽभूत् ।

२३ । व्यतिकरेण सम्बन्धेन ।

२४ । या प्रीतिः साहेबस्य प्राटसाहेबस्य हृदयान्न विप्रयुयुजे वियुक्ता अभूत् पाषाणस्य रेखेव न विच्छिन्ना श्लिष्टा च अभवदित्यर्थः ।

२५ । ईयुषि गतवति सति अशुभोदन्तं अमङ्गलवृत्तान्तं मुदन्तं हर्षनाशकं, तमनु भूदेवं प्रति तस्य साहेबस्य प्रेम्नः प्रीतेः तत्प्रमाणम् ।

२६ । महिमस्तोत्रस्य महत्त्वस्य प्रशंसायाः प्रसङ्गसङ्गतेः । वङ्गावनीवासिनां वङ्गभूमिनिवासिनाम् । नैसर्गिकीं स्वाभाविकीं । तुष्टाव प्रशशंस ।

साहेबः स तु जीवतः स स मया वर्ण्योऽधुना श्रीमतः ॥ २७ ॥

पत्रं वृटिश् शासननीतिशंसि
साप्ताहिकं किञ्चन भूरिवार्तम् ।
प्रचारयिष्यन्नथ वैश्वनाथिः
पप्रच्छ साहेबममुं विनीतः ॥ २८ ॥

आसीद् वृटिश्पार्थिवनीतिपद्धतीः
सर्वाः प्रजा ज्ञापयितुं यथायथम् ।
पत्रस्य कस्यापि तदा प्रयोजनं
दातुं प्रवृत्तिं च पवित्रवर्त्मने ॥ २९ ॥

इत्यस्मादभिनन्द्य तद्बहुमतं हज्सन् कलेक्टर्प्रभु-
र्भूदेवस्य गैभर्णमेण्टमभितो व्यज्ञापयद्वाञ्छितम् ।
न्याय्यं प्रत्यभिनन्द्य तेन तदनुज्ञातश्च सद्योऽभवत्
साहेबे स्मिथिति श्रुते तु निखिलस्तत्पत्रभारोऽर्पितः ॥ ३० ॥

स्मिथ् साहेबमनुप्रपद्य सरकारोपाधिकः कीर्त्तिमान्
श्रीप्यारीचरणश्चकार मतिमांस्तत्पत्रसञ्चालनाम् ।
भूदेवे तदनन्तरं विनिदधे स्वत्वाधिकृत्या समं
तत्पत्रस्य समस्त एव विभुना वङ्गप्रशास्त्रा भरः ॥ ३१ ॥

तदेतदद्यापि वहत्यबाधं
साप्ताहिकं नीतिविनीतिशास्त्रम् ।

---

२७ । पुरा यदलिखदित्यत्र पुरा भविष्यदर्थः तथाच भविष्यति काले यल्लिखिष्यति इत्यर्थः । स्मायुक्तपुरायोगे भूतानद्यतने वा लुङ् च इत्यनेन सूत्रेण भविष्यति लङ् । अग्रे वक्ष्यते उत्तरत्र काले वक्ष्यते इत्यर्थः ।

२९ । यथायथं ज्ञापयितुं या नीतिपद्धतिर्यथा तां तथा ज्ञापयितुमित्यर्थः । प्रवृत्तिं वार्तां, पवित्रवर्त्मने निर्दोषचरणाय ।

३० । बहुमतं बहूनां प्रियं तद् वाञ्छितं गभर्णमेण्टमभितो गभर्णमेण्टस्य अभिमुखे अभिमुखार्थेभ्यश्च इत्यनेन तसिः ।

३१ । स्मिथ्साहेबमनु स्मिथ्साहेबस्य पश्चात् , वङ्गप्रशास्त्रा विभुना लेफ्टिनेण्टगभर्णरसाहेबेन बेङ्गल्गभर्णमेण्टेन इत्यर्थः ।

गङ्गाम्बुवत् पावनमेडुकेशन्-
गेजेटिति ख्यातमुदन्तपत्रम् ॥ ३२ ॥

आजीवनं सनियमं परिचाल्य धीमान्
पत्रं सलाभमुदसृज्यत वैश्वनाथिः ।
तद्विश्वनाथधनकोषविवृद्धिहेतोः
पादाम्बुजाय पितुरेव दिवं गतस्य ॥ ३३ ॥

ततःप्रभृत्येडुकेशन् गेजेट्पत्रात् समुत्थितम् ।
धनं संस्कृतशास्त्राणां चर्चार्थं विनियुज्यते ॥ ३४ ॥

सतां श्रद्धा दिव्या सुरसरिदिवातीतविषया
विशत्येवानन्तं जलनिधिमिव ब्रह्म परमम् ।
तथाहि ब्रह्मभ्यो व्यतरदनघेभ्यः परमसौ
महात्मा भूदेवो धनमवहु वाप्यस्तु बहु धा ॥ ३५ ॥

तस्यात्मेव प्रियतमम भूदात्मजत्वात्सदेतत्

---

३२ । वहति चलति नदी वहतीतिवत् । नीतिविनीतिशास्त्रं नीतेर्नयस्य विनीतेर्विनयस्य च शास्त्रमनुशासनमुपदेशकम् । उदन्तपत्रं वार्तापत्रम् ।

३३ । सनियमं नियमेन सह सप्ताहे सप्ताहे इत्यर्थः; सलाभं लाभेन सह स्वर्गगतस्य पितुरेव पादाम्बुजाय उदसृज्यत ददावित्यर्थः । कथमित्यत्राह विश्वनाथधनकोषविवृद्धिहेतोः विश्वनाथफण्डस्य विशेषेण वृद्धये इत्यर्थः ।

३४ । ततःप्रभृति तत आरभ्य । चर्चार्थं पर्य्यालोचनार्थं ।

३५ । सतां सज्जनानां श्रद्धा दिव्या उत्तमा सात्त्विकी इत्यर्थः । सुरसरित्तु दिवि स्वर्गे भवा दिव्या अतीतविषया अतीतोऽतिक्रान्तो विषयः उद्देश्यविषयः स्वर्गादिर्यया इति श्रद्धापक्षे फलाभिसन्धिरहिता इति यावत् सुरसरित् पक्षे तु अतीता उल्लङ्घिता विषया नानाजनपदा यया इति नीवृज्जनपदौ इत्यमरः । अभिसन्धिरहितायाः श्रद्धायाः फलं परमब्रह्म परमात्मा तदेव विशतीत्यर्थः । तथाहि भूदेवो ब्रह्मभ्यो ब्राह्मणेभ्यो यद्धनं व्यतरत् ददौ तत् ब्राह्मणानां शेयं ब्रह्म विवेश ब्राह्मणेन सह ब्रह्मणोऽभेदः तथाचोक्तं भागवते "अविद्यो वा सविद्यो वा ब्राह्मणो मामकी तनुः" इति ।

पत्रं तेन प्रणयपरया श्रद्धया युज्यमानः ।
भूदेवस्तत् सदुपकृतये विश्वनाथाय दत्त्वा
मन्ये मेने परमगुरवे दत्तमात्मानमेव ॥ ३६ ॥
हावूड़ास्कुलेऽपि न चिरादिव शिक्षकाणां
विद्यार्थिनां च परमः स मतो बभूव ।
रूपेण लोचनमुषा च गुणैश्च हृद्यै-
र्वाक्सम्पदा च मितयापि मनोहरन्त्या ॥ ३७ ॥
शिक्षाविभागाधिकृतैरमात्यै-
र्विद्यालयानां विवृतिर्लिखित्वा ।
प्रत्यब्दमाविष्क्रियते स्म या या
हावूड़ीस्कुलं मुख्यमवोचि तत्र ॥ ३८ ॥
अब्देऽब्दे गणना क्रमेण ववृधे ज्ञानञ्च विद्यार्थिना-
मन्येभ्यः सदृशेभ्य उन्नतिमतां विद्यालयेभ्यस्तदा ।
भूदेवेऽवति मुख्यशिक्षकपदं किं वा बहु ब्रूमहे
शिक्षर्द्ध्या तदशोभत स्कुलमपि प्रायः कलेजोपमम् ॥३९॥
अत्रान्तरे जनपदेषु च पाठशाला-

३६। तस्यात्मेवेति। तदेतत् पत्रं एडुकेसन् गेजेट् नामकं आत्मजत्वात् आत्मनो बुद्धेर्जातत्वात् तस्य भूदेवस्य आत्मा इव जीव इव प्रियतमं अभूत् आत्मजः पुत्रो यथा आत्मवत् प्रियतमो भवति तथा तत्पत्रमपि अति प्रियमभूत्, तथाहि "पुत्रः प्रियाणामधिकः" इति विराट्पर्वणि व्यासवचनम् । तेन हेतुना प्रणयपरया प्रेमतत्परया श्रद्धया युक्तो भूदेवः तत्पत्रं सतामुपकाराय विश्वनाथाय स्वपित्रे विश्वनाथात्मकाय जगदीशस्वरूपाय दत्त्वा आत्मानमेव परमगुरवे महागुरवे पित्रे अथ च परमगुरवे जगदीशाय दत्तं मेने ज्ञातवान् इत्यहं मन्ये उत्प्रेक्षे इत्यर्थः ।

३७। मतो बभूव प्रियो बभूवेत्यर्थः ।

३८। शिक्षाविभागे नियुक्तै राजपुरुषैर्वार्षिकीषु विज्ञापनासु हावूड़ास्कुलं मुख्यं प्रधानमुक्तमित्यर्थः ।

३९। अब्दे अब्दे छात्राणां गणना संख्या तथा ज्ञानं च क्रमेण वृद्धिं प्रपेदे शिक्षर्द्ध्या शिक्षासम्पदा शिक्षायाः सम्पन्नतयेत्यर्थः ।

स्वाशु प्रयोजनमभूद् बहुशिक्षकाणाम् ।
तान् शिक्षकान् रचयितुं हुगलीनगर्य्यां
नर्म्यालिति स्कुलमुदारमभूद्विधेयम् ॥ ४० ॥

प्राट् साहेबस्य वाचा हितनिरतधियस्तस्य भूदेवशर्मा
मुख्यस्याध्यापकस्य त्रिशतभृतिपदं भाविनर्म्यालस्कुलस्य ।
इच्छन् दुर्गां परीक्षासरितमुदतरद् गोष्पदं मन्यमानो
जित्वा प्रत्यर्थिनोऽन्यान् हरिरिव हरिणांस्तत्पदञ्चाध्यरोहत् ॥४१

सम्यग्विधाय शरदो नव तत्र कर्म
हाव्ड़ास्कुले निरगमद् यशसा ततोऽसौ ।
नर्म्यालभिख्यमविशन्महितः स्कुलञ्च
खीष्टाब्दके हयशराष्टशशाङ्कसंख्ये ॥ ४२ ॥

विद्यागारं तदधिवसतस्तस्य नर्म्यालभिख्यं
शिक्षादानं सदुपदिशतः शिक्षकेभ्यः स्कुलानाम् ।
भूदेवस्य व्यकसदखिलं दाक्ष्यमध्यापनायाः
सूर्य्यालोके प्रसरतितरां सौरभं ह्यम्बुजस्य ॥ ४३ ॥

---

४० । पाठशालासु वङ्गभाषाविद्यालयेषु वर्णाकुलारस्कुलेषु । उदारं महत्, विधेयं कर्तव्यम् ।

४१ । हिते भूदेवस्य मङ्गले निरता धीर्बुद्धिर्यस्य तादृशस्य प्राट्साहेबस्य वाचा अनुरोधवचसा त्रिशतभृति त्रिशतरजतवेतनकं पदमिच्छन् दुर्गां दुस्तरां परीक्षां सरितं नदीमिव उदतरत् उत्तीर्णोऽभूत् । हरिणान् मृगानिव अन्यान् प्रत्यर्थिनः प्रतियोगिनो हरिरिव सिंह इव जित्वा तत्पदमारुरोह मुख्यशिक्षकपदं लेभे ।

४२ । नव शरदो नव वत्सरान् , ततो हाव्ड़ास्कुलात् यशसा सह निरगमत् तस्य यशश्च निरगमत् सोऽपि निरगमत् इत्यर्थः, सहोक्तिरलङ्कारः । महितः पूजितः स्तुत इति यावत् नर्म्याल्नामकं स्कुलं अविशच्च प्रविवेश इत्यर्थः । १८५७ इयत्परिमितखृष्टाब्दे ।

४३ । दाक्ष्यं नैपुण्यं व्यकसत् विकसितं परिस्फुटं अभूत् । हि यतः अम्बुजस्य पद्मस्य सौरभं सुगन्धः सूर्य्यालोके स हि प्रसरतितरां अत्यन्तं सर्वतो गच्छति ।

विज्ञानं ये गणितमथवा क्षेत्रतत्त्वादिकं वा
शिष्योस्तस्याप्यपरगुरवः साध्वशिक्षन्त तस्मात् ।
तं तेऽजानन् सुरपुरगुरुं मर्त्यलोकेऽवतीर्णं
शिक्षादस्यै भवति हि महापूरुषस्यावतारः ॥ ४४ ॥
नर्म्यालाख्ये स्कुलेऽस्मिन्नजनि नियमतो वङ्गवागेव पाठ्या
नासीद्विज्ञानशास्त्रं किमपि तु रचितं वङ्गवाचा तदानीम् ।
इंलिश्‌विज्ञानशास्त्राण्यमलमतिरतोऽनूद्य वङ्गीयवाचा
ग्रन्थानध्यापिपत् स स्वकमुपरचितान् भान्ति येऽद्याप्यपूर्वाः ॥४५॥
श्रीसरोमेतिहासञ्च क्षेत्रतत्त्वञ्च तत्त्ववित् ।
शिक्षाविधायकं नाम प्रस्तावञ्च स्तुतं गुणैः ॥ ४६ ॥
स प्राकृतिकविज्ञानं नर्म्यालविद्यालये स्थितः ।
ग्रन्थानन्यान् पुरावृत्तसारादींश्च प्रणीतवान् ॥ ४७ ॥
स्वकल्पितमुपन्यासमैतिहासिकमेव च ।
आदर्शमिव सोऽकार्षीत् प्रथमं वङ्गभाषया ॥ ४८ ॥
न गीर्वाणवाण्या न वा वङ्गवाण्या
ततः पूर्वमासीदुपन्यासकाव्यम् ।
पुरा दृश्यतेंलिश्‌गिरैव प्रणीतं

---

४४ । ये शिष्यास्तस्य भूदेवस्य छात्रा अपि अपरेषां वङ्गविद्यालयच्छात्राणां गुरवः भाविनः शिक्षकाः गणितं विज्ञानं शास्त्रं क्षेत्रतत्त्वादिकं वा विज्ञानं शास्त्रं तस्मात् साधु उत्कृष्टं यथा स्यात् तथा तस्मात् अशिक्षन्त ते तं भूदेवं मर्त्यलोकेऽवतीर्णं बृहस्पतिमजानन् मेनिरे, हि यतः शिक्षादानाय महापुरुषस्य अवतारो भवति लोकशिक्षार्थं हि महापुरुषा अवतरन्ति ।

४५ । अस्मिन् नर्म्यालस्कुले नियमेन एकान्तेन वङ्गभाषैव पाठ्या अध्ययनीया आसीत्, परन्तु वङ्गभाषया रचितं किञ्चिदपि विज्ञानशास्त्रं तदा नाभवत्, अतो हेतोः विमलमतिः स भूदेवः इंलण्डीयविज्ञानशास्त्राणि वङ्गभाषया अनूद्य भाषान्तरे परिणमय्य स्वयं रचितान् ग्रन्थान् अनुवादग्रन्थान् अध्यापिपत् अध्यापयामास ये ग्रन्थाः अपूर्वाः पूर्वं अस्थिताः अद्यापि भान्ति दृश्यन्ते ।

मनोहारि तन्नामकं काव्यशास्त्रम् ॥ ४९ ॥
अपूर्वं समास्वादि भूदेवनाम्नः
कृतिः सत्कवेस्तद्धुपन्यासकाव्यम् ।
सुधेवोदूर्ध्वलोकात् समाहृत्य दत्ता
चमत्कारिणी केनचिद् दैवतेन ॥ ५० ॥
स्नेहोऽव्याजः प्रियसत्या च वाणी
सौम्या मूर्तिर्विशदश्चोपदेशः ।
ते ते भावा गुणिनो वैश्मनाथे-
श्छात्रांश्चक्रुर्वशगान् यावदायुः ॥ ५१ ॥
भक्तिश्रद्धापरिचर्याभिरुच्चै-
राचार्यं ते पितृवद्देववच्च ।
यावच्छक्यं तमुपासाम्बभूवुः
के वा दातुः प्रियतां नार्थयन्ते ॥ ५२ ॥
मैत्रीं सच्चरितेषु दुःखिषु दयार्द्रस्थ तथोपेक्षिताम्
पापात्मस्वनुमोदितां च सुखिषु प्रायुङ्क्त योगीव सः ।
भूदेवस्य ततो जगत् सुहृदभून्नाभूत्तु कश्चिद्रिपु-
र्भद्रे ह्यात्मनि भद्रमेव निखिलं दुष्टे तु दुष्टं भवेत् ॥ ५३ ॥
सद्वृत्ते सुकृते कुटुम्बभरणे सांसारिके वा नरे
शौचाचारविचारणव्यवहृतिष्वर्थागमादिष्वपि ।

---

४९ । पुरा ततः प्राक् इंलिश्भाषयैव प्रणीतं उपन्यासकाव्यमदृश्यत, न तु बङ्गभाषया देवभाषया वा ।

५० । तर्हि तदा भूदेवनाम्नः सत्कवेः कृतिः अपूर्वमुपन्यासकाव्यं ऊर्ध्व-लोकात् स्वर्गात् समाहृत्य समानीय केनचित् देवेन दत्ता सुधैव चम-त्कारिणी समास्वादि सहृदयैरास्वादि ।

५१ । अव्याजश्छलरहितः । सौम्या मनोज्ञा । विशदो निर्मलः ।

५२ । भक्तिः दृढानुरागः, श्रद्धा तद्वाक्ये दृढविश्वासः, परिचर्या सेवा, ताभि-रुच्चैरुन्नताभिः । दातुः प्रियतां स्नेहं के वा जना न प्रार्थयन्ते सर्वे एव प्रार्थयन्ते इत्यर्थः ।

५३ । उपेक्षितामुपेक्षाम् । आत्मनि भद्रे सति निखिलं जगत् भद्रं भवेत् आत्मनि दुष्टे पुनः निखिलं जगत् दुष्टं भवेदित्यर्थः ।

ज्ञानं तस्य तथाऽभवत् परिणतं संसारिणोऽन्येऽथवा
भूदेवं कथयाम्बभूवुरुभये ज्ञानावतारं यथा ॥ ५४ ॥
मनोभावा भान्ति प्रतिफलितवत्तस्य कृतिषु
प्रबन्धग्रन्थेषु प्रतिपदमुदारं मुकुरवत् ।
तथा ह्यालोक्यन्ते शुचिमतिभिरद्यापि ननु ते
पठद्भिस्तान् ग्रन्थांश्चिरमपि गतस्यामरपुरं ॥ ५५ ॥
इत्थं सुधांशुशुचिना यशसा सहैव
नर्म्यालयस्कुले रजतजातमुपार्जयन्, सः ।
अध्याप्य यन्निहितवान् बहुपाठशाला-
शिक्षागुरूनजनि तेन गुरुर्गुरूणाम् ॥ ५६ ॥
तमुड्डोसाहेबं निजजननभूमिं जिगमिषुं
दिदृक्षुर्भूदेवः सविनयमुपातिष्ठत विभुम् ।
प्रवृत्ते संलापे प्रणयपरमामन्त्र्य, बहुधा
प्रसङ्गात् सोत्कण्ठस्तमकथयदुड्डो प्रियगुणम् ॥ ५७ ॥
मम प्रतिनिधीभवन्निह पदे य आगच्छति
ध्रुवं स मतिमानपि प्रथमतोऽनभिज्ञो भवेत् ।
न वङ्गभुवमन्वभूत् क्वचिदसौ कुतस्तद्गिरं
कथं निजधुरां वहेदिति ममास्ति चिन्ताधुना ॥ ५८ ॥

---

५४ । सद्वृत्ते सच्चरित्रे सुकृते पुण्यकर्मणि, कुटुम्बभरणे पोष्यवर्गप्रतिपालने सांसारिके नये संसारसम्बन्धिन्यां नीतौ शौचे पवित्रतायां आचारे सदाचरणे विचारणे मीमांसायाम् व्यवहारे क्रयविक्रयादौ च अर्थोपार्जने च अन्यत्र च । यथा संसारिणो गृहस्था अन्ये उदासीनाः सन्यासिनश्च उभये तं ज्ञानावतारं कथयामासुरित्यर्थः ।

५५ । तस्य भूदेवस्य कृतिषु प्रबन्धग्रन्थेषु तस्य मनोभावा दर्पणेष्विव प्रतिबिम्बिता इव अद्यापि भान्ति ये मनोभावाः पवित्रबुद्धिभिर्जनैरालोक्यन्ते इत्यर्थः ।

५६ । सुधांशुशुचिना यशसा सहैव सुधांशुशुचिरजतजातमुपार्जयन्नित्यर्थः ।

५७ । उपातिष्ठत उपस्थितोऽभवत्, सङ्गतिकरणार्थे आत्मनेपदम् ।

५८ । वङ्गभुवं न अन्वभूत् न दृष्टवान् तद्गिरं वङ्गभाषां कुतः अन्वभूत्

इत्युक्तवन्तं निजनाथ सादरम्
भूदेव उड्रोऽभिधमुन्नताशयम् ।
प्राप्नोति कश्चित् सहकारिणं स चे-
न्मन्ये तदा कार्य्यधुरां वहेत्सुखम् ॥ ५९ ॥

भूदेवदत्तमिममभ्युपगम्य मन्त्र-
मुड्रो डिरेक्टरकरेण लिपिप्रयुक्त्या ।
आवेदयत् स सहकारिनियोजनाय
वङ्गप्रभुं प्रति भवत्परिदर्शकस्य ॥ ६० ॥

वङ्गेशः सहकारिणं स्कुलपरिद्रष्टुः पुरोभाविन-
स्तस्यैकं विनियोक्तुमन्वमनुत श्रीमांस्ततोऽस्थायिनम् ।
तामादेशलिपिं प्रपद्य न चिरादुड्रोऽपि योग्यं प्रियम्
भूदेवं सहकारिणः पदमधिष्ठाप्य स्वदेशं ययौ ॥ ६१ ॥

इति श्रीमहेशचन्द्रकृतौ भूदेव-चरिते काव्ये
धनार्जनं नाम सप्तदशः सर्गः ॥

ज्ञातवान् न ज्ञातवानित्यर्थः । निजधुरां निजा चासौ धूश्चेति निज-कार्य्यभारमित्यर्थः ।

५९ । कार्य्यधुरां कार्य्यस्य भारम् ।

६० । इमं मन्त्रमभ्युपगम्य इमं परामर्शं स्वीकृत्य डिरेक्टरकरेण डिरेक्टर-द्वारा लिपिप्रयुक्त्या आवेदनपत्रप्रेरणेन वङ्गप्रभुं लेफ्टिनेण्ट गभर्णर-सभां प्रति, भवतः (वर्तमानप्रायत्वविवक्षया) अचिराद् भविष्यतः परिदर्शकस्य ।

६१ । ततो वङ्गेशः श्रीमान् पुरोभाविनः अग्रतो भविष्यतः स्कुलपरिदर्शकस्य सहकारिणमस्थायिनमेकं विनियोक्तुमन्वमन्यत । उड्रो साहेबोऽपि भूदेवं सहकारिणः पदमधिष्ठाप्य सहकारिणः पदे नियोज्य स्वदेशं प्रतस्थे इत्यर्थः ।

अष्टादशः सर्गः ।

धनार्जनम् ।

उड्रोऽभिधेऽथ गतवत्यचिरात् स्वदेशं
तस्यास्पदं सपदि मेडलिकट् प्रपेदे ।
भूदेव आप सहकारिपदञ्च तस्य
दैवस्य पौरुषगुणः खलु तस्य यादृक् ॥ १ ॥

खीष्टस्य वह्निरसवस्ववनीमितेऽब्दे
मासस्य पञ्चदशकेऽह्नि जुलाइनाम्नः ।
मुख्यस्य मेडलिकटः परिदर्शकस्य
तस्यास्थिरं स सहकारिपदं विवेश ॥ २ ॥

वृत्त्या समं ववृधिरे बहु विस्तृतानि
कर्माणि मुख्यपरिदर्शकतोषणानि ।
वृत्तिश्च तस्य रजतानि चतुःशतानि
मासिक्यभूत् क्रमिकमभ्युदयं गतस्य ॥ ३ ॥

पूर्वोत्तरा उपदिशन् विदिशो दिशश्च
लेख्यादिनिर्मितिषु पार्श्वचरोऽचिरेण ।
मुख्यस्य मेडलिकटः परिदर्शकस्य
विश्रम्भभाक् कर इवाजनि दक्षिणोऽसौ ॥ ४ ॥

१। उड्रोऽभिधा नाम यस्य स उड्रोऽभिधः उड्रोनामकः तस्मिन् उड्रोऽभिधे । पौरुषं पुरुषकारः स एव गुणः तस्य भूदेवस्य भाग्यस्य शुभादृष्टस्य पुरुषकाररूपो गुणो यथा सहकारिकारणं भवति तद्वद् भूदेवः मेडलिकट्साहेबस्य सहकारि पदं प्रापेत्यर्थः । पौरुषं विना दैवं न फलतीति शास्त्रेषु उक्तं ।

२। अङ्कस्य वामा गतिरिति ततः १८६३ खीष्टाब्दे इत्यर्थः ।

४। असौ भूदेवः लेख्यादिनिर्मितिषु रिपोर्टपत्रादिप्रणयनेषु पूर्वा विदिशः उत्तराश्च विदिशः विरुद्धा रीतिः तथा पूर्वा दिशः उत्तराश्च दिशः सुरीतीरुपादिशन् दक्षिणोऽवामः कर इव दक्षिणोऽनुकूलोऽभूदित्यर्थः । करोऽपि पूर्वोत्तरादिदिगुपदेशको भवति ।

तस्यापि नूतनविभोः परिदर्शकस्य
जग्राह चित्तमचिरादिव वैश्वनाथिः ।
कर्माणि तस्य स च मेडलिकट् मनीषी
दृष्ट्वोत्तरोत्तरमभूदधिकं प्रतीतः ॥ ५ ॥
मासत्रये गतवतीत्थममुं कदाचित्
प्रीतिप्रसन्नमुपलभ्य कथाप्रसङ्गात् ।
भूदेव आह विनयी परिदर्शकं स्म
विज्ञापना ह्यवसरे महते फलाय ॥ ६ ॥
शीतां पदेऽत्र खलु दिव्यतरोरिवाहं
छायां निषेव्य भवतः करपल्लवस्य ।
एतानि भोः सुखसुखेन दिनान्यनैष-
मस्मात् परं किमपि भावि न तत्तु वेद्मि ॥ ७ ॥
उड्रो महामतिरभूत् सदयो यथा मे
मन्ये भवानपि तथा मयि सानुकम्पः ।
नो चेत् सदोषमपि कर्म मदीयमेतत्
तोषं कथं गुणवतो भवतोऽपि कुर्य्यात् ॥ ८ ॥
उड्रो दयार्द्रहृदयोऽनुगताय मह्य-
मभ्युन्नतं यमधिकारमदादिमं तम् ।
सानुग्रहो यदि भवान् दययाभिरक्षे-
न्मन्ये चिरस्य मम तर्हि कृतार्थता स्यात् ॥ ९ ॥
उड्रो न यावदुपसर्पति भारतेऽस्मि-
न्नस्थायि मे पदमिदं खलु तावदस्ति ।
अस्मान्मया तदनु नूनमधोगतापि
हावड़ास्कुले प्रथम-शिक्षकतैव कार्य्या ॥ १० ॥
युष्मत्प्रसादविभवात् पदमूर्द्ध्वमूर्द्ध्व-

---

५ । वैश्वनाथिः विश्वनाथस्य पुत्रो भूदेवः, प्रतीतः प्रीतः प्रसन्न इति यावत्

६ । आह स्म इत्यन्वयः उवाच इत्यर्थः ।

७ । दिव्यतरोः कल्पद्रुमस्येव भवतः करपल्लवस्य शीतां छायां आश्र अनातपमिव अत्र पदे सहकारिपरिदर्शकपदे निषेव्य अनुभूय सुख सुखेन अकष्टेन दिनानि अनैषमिति ।

मारोहतः क्रमश एव मम प्रयत्नैः ।
दोषं विनापि यदि तावदधोगतिः स्यात्
किं सेवया नरपतेः किमु वा श्रमेण ॥ ११ ॥
मन्ये नरेन्द्रपुरुषा बहवोऽपि मुख्याः
सन्त्याश्रवाः प्रभवतां भवतां सखायः ।
विज्ञापयन्ति यदि तान् कृपया भवन्तः
सिध्येत् प्रयोजनमिदं मम तावतैव ॥ १२ ॥
भूदेवमित्युदितवन्तमथ प्रसन्नः
प्रत्यब्रवीत् किमपि मेडलिकट् विभाव्य ।
शक्नोषि चेल्लिख तदा कमपि प्रबन्धं
योग्यं प्रकाशयितुमिलिशपत्रिकायाम् ॥ १३ ॥
श्रुत्वापि मेडलिकटो वचनं न तस्य
भावं शुलम्वृतमबुध्यत वैश्वनाथिः ।
प्रत्यब्रवीत्तु लिखितुं त्वमतानुरूपं
कञ्चित् प्रबन्धमचिरात् प्रयतेय नूनम् ॥ १४ ॥
इत्यभ्युपेत्य वसतिं समुपेत्य शिक्षा-
सम्बन्धमेकमभिलिख्य नवं प्रबन्धम् ।
त्रित्रैर्दिनैरुपनिनाय स वैश्वनाथि-
र्मुख्याय शुद्धमनसे परिदर्शकाय ॥ १५ ॥
धीमान् प्रबन्धमधिगम्य सकृत्पठित्वा
भूदेवसम्मतिमनु प्रतिशोध्य किञ्चित् ।
सद्योऽनुलेख्यलिखकेन च मुद्रणार्थं
सम्पादकाय वृटिशे विससर्ज पत्र्याः ॥ १६ ॥
पत्रेऽचिरादजनि मुद्रित इण्डियान् एम्-
पायारिति प्रथितनामनि स प्रबन्धः ।
प्रायो यदुन्नतपदे स्थितिमन्त इंडे-
नाद्या बुधा वृटिश एव पठन्त आसन् ॥ १७ ॥
ईडेनिरित स्म गुरुवङ्गगभर्णमेण्ट-
सेक्रेटरीपदमधिष्ठितवांस्तदासीत् ।

८। पुरा भवति भविष्यतीत्यर्थः । पुराशब्दयोगे भविष्यत्काले लट् ।

योऽसौ पुरा भवति चक्रविभागशास्ता
पात्रे स तत्र समवैक्षत तत्प्रबन्धम् ॥ १८ ॥
आसीत् स मेडलिकटः परिदर्शकस्य
प्रेयान् सखा बहुगुणो गुणपक्षपाती ।
प्रायेण तेन सह मेडलिकट् समेत्य
संलापमाचरदतो मनसो विनोदम् ॥ १९ ॥
ईडेनुपागतममुं सुहृदं कदाचित्
पप्रच्छ मेडलिकटं प्रकटं प्रसङ्गात् ।
भूदेवमेतमवगच्छसि किं प्रबन्धं
पत्रे वृतिभिरपि संकलितेऽलिखद् यः ॥ २० ॥
प्रत्यब्रवीत् तमथ मेडलिकट् प्रतीतो
भूदेवमुत्तमगुणं तमवैमि सम्यक् ।
सोऽसौ प्रबन्धलिखकः सहकारको मे
विद्यालयस्य परिदर्शनकृद् द्वितीयः ॥ २१ ॥
आलप्य तत्र दिवसे चतुरस्तदेतत्
प्रत्याजगाम किल मेडलिकट् स्ववासम् ।
अन्येद्युरागतमथोपदिदेश भूयो
द्वित्रप्रबन्धलिखनाय स वैश्वनाथिम् ॥ २२ ॥
भूदेव एष मतिमान् बहु चिन्तयित्वा
युक्तिप्रमाणसहितान् विशदान् प्रबन्धान् ।
यत्नाल्लिलेख न चिरादिव सुष्ठु तस्मै
प्राज्ञाय मेडलिकटे समुपाहरच्च ॥ २३ ॥
तस्य प्रबन्धरचना अपि वैश्वनाथे-

---

१९ । अत इति यतः प्रियसख आसीत् अतः कारणादित्यर्थः ।

२० । प्रकटं पप्रच्छ इत्यन्वयः स्पष्टमपृच्छादित्यर्थः ।

२१ । प्रतीतो हृष्टः । तथा च मेदिनी "प्रतीतः सादरे ज्ञाते हृष्टप्रख्यातयोरपि" इति । सम्यगवैमि दृढं जानामीत्यर्थः । तथाच मेदिनी "सम्यग् दृढप्रशंसयोः" इति ।

२२ । द्वित्रप्रबन्धलिखनाय द्वौ वा त्रयो वा इति द्वित्राः द्वयोर्वा त्रयाणां वा प्रबन्धानां लिखनायेत्यर्थः ।

दोषाणुनापि रहिताः सहिता गुणैश्च ।
ता उत्तरोत्तरमुदारतरा अभूवन्
सर्वः सुधीर्भवति विज्ञतमः क्रमेण ॥ २४ ॥
तं तं प्रबन्धमपि मुद्रितमिरिडयान् एम्-
पायारिति प्रथितनाम्नि विलोक्य पत्रे ।
भूदेवमागमयितुं स्वनिवासमीडेन्
काष्यहि मेडलिकटं प्रति सन्दिदेश ॥ २५ ॥
भूदेवमेतमथ 'मेडलिकट्' जगाद
प्रीतः प्रबन्धमवलोक्य तवाजनीडेन् ।
तं द्रष्टुमर्हति भवानचिराद् भवन्तं
नेष्याम्यहं परिचयो हि सतां गुणाय ॥ २६ ॥
आकर्णयं मेडलिकटस्तदिदं वचोऽसौ
सम्माद्य तं सपदि गन्तुमियेष धीमान् ।
तेनानुगेन सह मेडलिकट् तदीडेन्-
साहेबमभ्युपजगाम परोपकारी ॥ २७ ॥
द्वारेण तेन परमेण स वैश्वनाथि-
रीडेनभिख्यमवनीपतिपूरुषं तम् ।
सेक्रेटरीपदविभूषणमप्यपश्यद्-
ध्रस्वोऽपि दूरफलमेति महासहायः ॥ २८ ॥
दृष्ट्वैव तं प्रथमतः प्रियदर्शनं स
ईडेन् चमत्कृतिमिवान्वभवत्प्रसन्नम् ।
आचारनम्रमथ तं प्रतिनम्य धीमा-
नालप्य दिव्यमिव तु प्रमदं जगाम ॥ २९ ॥

---

४ । दोषाणुनापि दोषस्य लेशेनापीत्यर्थः । "लवलेशकणाणवः" इत्यमरः ।

* Indian Empire.

६ । तव प्रबन्धमवलोक्य ईडेन् साहेबः प्रीतः प्रसन्नोऽजनि अभूदित्यन्वयः ।
एतम् आगतम्, आङ्पूर्वात् इणधातोः क्तः ।

९ । ईडेन् साहेबः तं दृष्ट्वैव प्रथमतः आदौ चमत्कृतिं चमत्कारमिव
अन्वभवत् ज्ञातवान्, आलप्य तु दिव्यमिव प्रमदं आनन्दं जगाम
प्राप इत्यर्थः ।

अत्रान्तरे जनपदेष्वपि पाठशालाः
स्थाप्या बभूवुरवरांश्च शिशून् विनेतुम् ।
तासां च शिक्षकपदेषु नियोजनीयाः
शिक्षार्पणेन बहवो गुरवो विधेयाः ॥ ३० ॥

वर्षं प्रति प्रथमशिक्षणकर्मणोऽर्थात्
त्रिंशत्सहस्र-रजतानि गभर्णमेण्टः ।
तेषां व्ययाय न च काचिदभूद् व्यवस्था
दृश्या बभूवुरपि ता गुरुपाठशालाः ॥ ३१ ॥

भूदेवमुन्नतधियं गुरुपाठशाला
तत्त्वावधानविषये विनियोजयिष्यन् ।
आवेदयत् सपदि मेडलिकट् नयज्ञः
सेक्रेटरीपदजुषे नृपपूरुषाय ॥ ३२ ॥

सेक्रेटरीति पुरुषोऽपि गभर्णमेण्ट-
मावेद्य तं तदनुमत्यनुगोऽविलम्बम् ।
भूदेवमेव गुणिनं गुरुपाठशाला-
तत्त्वावधायकपदेऽभ्यधिके न्ययुङ्क्त ॥ ३३ ॥

खीष्टस्य वह्निरसवस्ववनीऽमितेऽब्दे
मासत्रयोदशदिने सति जानुयारेः ।
ट्रेणिं स्कुलेषु स तथा गुरुपाठशाला-
स्वाद्यं पदं ध्रुवमगात् परिदर्शकस्य ॥ ३४ ॥

वृत्तिर्न तस्य यदि वा ववृधे पदेऽस्मिन्

---

३० । अत्रान्तरे अस्मिन्नवकाशे अवरान् नीचान् अपि बालान् विनेतुं शिक्षयितुं गुरवो अध्यापका विधेया निर्मातव्या बभूवुरित्यर्थः ।

३२ । सेक्रेटरीपदं जुषते सेवते इति सेक्रेटरीपदजुट् तस्मै सेक्रेटरीपदे स्थितवते इत्यर्थः ।

३३ । तं भूदेवं गुरुपाठशालातत्त्वावधायकं विनियोक्तुमित्यर्थः । तदनुमत्यनुगः गभर्णमेण्टादेशानुगतः ।

३४ । वह्नयः ३, रसाः ६, वसवः ८, अवनी १, अङ्कस्य वामा गतिः अतः १८६३ खृष्टाब्दे मासः जानुयारीति नाम्नः, तथा इति समुच्च गुरुपाठशालासु चेत्यर्थः । ध्रुवं स्थिरं स्थायिपदमित्यर्थः ।

नीचैः पदे तु गमनं तदपि न्यगारि ।
त्यागः पदस्य च वरं न तु मानभाजा-
मुच्चैः पदात् प्रतिनिवृत्तिरधस्तु भूयः ॥ ३५ ॥
तस्त्वावधायकपदान्न पतेदधोऽयं
ट्रेणीं स्कुलस्य पुनरप्यनु शिक्षकत्वम् ।
इत्येव मेडलिकटोऽपि बभूव यत्नो
न त्वस्य वृत्तिमभिवर्द्धयितुं स ऐच्छत् ॥ ३६ ॥
तं वर्द्धमाननगरस्य यशोहरस्य
त्रिष्वेव कृष्णनगरस्य च वैश्वनाथिम् ।
ट्रेणींस्कुलेषु परिदर्शनकर्म कर्त्तुं
प्राज्ञं न्ययुङ्क्त किल वङ्गविभागशास्ता ॥ ३७ ॥
संस्थाप्य सोऽथ समितिं कमिटीतिनाम्नीं
तस्या मतेन विदुषः प्रथितान् वधार्य्य ।
आनीतवान् स्वयमुपेत्य निमन्त्र्य धीरः
ट्रेणीं स्कुलेषु कृतविद्य-परीक्षणार्थम् ॥ ३८ ॥
ते कृष्णमोहनप्रसन्नकुमारसंज्ञौ
राजेन्द्रलाल इति च प्रथितास्त्रयोऽपि ।
ट्रेणींस्कुलेषु कृतविद्यगुरून् परीक्ष्य
मध्यस्थिता अपि बभूवुरतीव हृष्टाः ॥ ३९ ॥
विज्ञापनां च लिलिखुर्विशदां स्कुलाना-
मेषां स्तुतिं बहु विधाय रिपोर्टनाम्नीं ।
यां सर्वराजपुरुषा अपि वाचयित्वा
कोषव्ययस्य सफलत्वममंसतोच्चैः ॥ ४० ॥

---

३५ । मानिनां उच्चैः पदात् भूयः पुनः अधःप्रतिनिवृत्तिः प्रत्यावर्तनं न वरं इति ।

३६ । अनु शिक्षकत्वं शिक्षकत्वं अनु लक्षीकृत्य अधो न पतेदित्यर्थः ।

३७ । वर्द्धमानस्य यशोहरस्य कृष्णनगरस्य च ट्रेणीं स्कुलेषु त्रिष्वेव तं प्राज्ञं प्रज्ञावन्तं भूदेवं न्ययुङ्क्त इत्यर्थः ।

३८ । तस्याः समितेर्मतेन, प्रथितान् ख्यातान्, वधार्य्य अवधार्य्य ।

३९ । मध्यस्थिता अपि उदासीना अपीत्यर्थः ।



यद् यत् स्कुलं परिददर्श स वैश्वनाथि-
श्छात्रैश्च शिक्षकगणैश्च चिरं तदीयैः ।
चित्तेषु मुद्रित इवामरवत् प्रजाग्र-
दस्मर्य्यतामरणमुज्ज्वलसौम्यमूर्त्तिः ॥ ४१ ॥
यां यां स्कुलानि परिदृश्य रिपोर्टनाम्नीं
धीमाल्लिलेख लिपिमर्चितपारिपाट्याम् ।
आदर्शभावमगमत् परिदर्शकानां
सा सा पुरेह भवतां च भविष्यतां च ॥ ४२ ॥
तिष्ठन् रिपोर्टलिपिमुत्तरपश्चिमे यां
देशे स्कुलानि परिदृश्य लिलेख धीरः ।
इंलण्डवास्तुरपि तां किल भारतश्री-
सेक्रेटरीति पुरुषो बहु मन्यते स्म ॥ ४३ ॥
दूरेऽन्यदेशवसतेर्विदुषः कथां ता-
मिंलण्डवास्तुरपि कश्चन यद्यशृण्यत् ।
विद्वांस्तथाविधरिपोर्टलिपिं निबन्धुं
सोऽपि स्तुतिं ध्रुवमलप्स्यत तह्यतीव ॥ ४४ ॥
इत्येव राजपुरुषा अपि मुक्तकण्ठं
स्वीचक्रुरुन्नतपदा वृटिशो गुणज्ञाः ।

---

४० । वाचयित्वा पठित्वा, कोषव्ययस्य राजकोषधनव्ययस्य, अमंसत अमन्यन्त इत्यर्थः ।

४१ । वैश्वनाथिर्विश्वनाथपुत्रो भूदेवः । तदीयैः तस्य तस्य स्कुलस्य छात्रैः शिक्षकगणैश्च स भूदेवः आमरणं मरणकालपर्यन्तं अस्मर्यत स्मृतोऽभवत् । तेषां चित्तेषु मुद्रितः मुद्रया अङ्कित इव प्रजाग्रत् जागरूकः ।

४२ । परिपाटी अनुक्रमः स एव पारिपाट्यं, अर्चितं प्रशस्तं पारिपाट्यं यस्यास्तां, पुरा उत्तरकाले भविष्यतां तथा तदानीं भवतां विद्यमानानां च आदर्शभावं प्राप । तां लिपिं दृष्ट्वा ते रिपोर्टं लिलिखुरित्यर्थः ।

४३ । उत्तरपश्चिमे देशे तिष्ठन्, भारतश्रीसेक्रेटरी इण्डियाष्टेट्सेक्रेटरी ।

४४ । निबन्धुं लिखितुम् , अतीव स्तुतिं अलप्स्यत ।

न ब्रूमहे वयमिदं स्वयमज्ञरूपाः
किं कुञ्जरस्य परिमाति बलं पिपीली ॥ ४५ ॥
दैनन्दिनं परिसमाप्य निजं स कार्य्य-
मार्य्यश्चकार परकीयमपि प्रभूतम् ।
कार्य्ये रिपोर्टलिखनप्रभृतिप्रसक्तो
धर्मः परोपकृतिरेव सतां महीयान् ॥ ४६ ॥
चिप्रक्रियोऽन्यपरिदर्शकमण्डलेभ्यः
स्वे मण्डले सुचतुरैः परिदर्शकैः सः ।
निघ्नैरपि प्रियसखैरिव पाठशाला-
संख्यामवर्द्धयदरं सहशिष्यसङ्ख्याम् ॥ ४७ ॥
तेऽप्यस्तना अपि सहासनभोजनाद्यै-
र्नीता सखित्वमिव कर्मभिरत्युदारैः ।
श्रीविश्वनाथतनयेन नयाध्वगेन
कार्य्याणि तस्य विदधुर्बहुभिः प्रयत्नैः ॥ ४८ ॥
इत्थं नियोगमुपपाद्य यदा यदासौ
गन्तुं गृहानलभतावसरं महात्मा ।
आगत्य तर्हि जननीमिव जन्मभूमिं
पादावसेवत पितुः परमार्थबुद्ध्या ॥ ४९ ॥

४५। स्वीकृत्य स्वीकारपूर्वं मुक्तकण्ठं ऊचुरित्यर्थः। अज्ञरूपा अतिशयेन अज्ञा इत्यर्थः।

४६। परोपकृतिरेव सतां महीयान् धर्मः। अतिशयेन महान् इति महीयान्।

४७। अन्येषां परिदर्शकानाम् मण्डलेभ्यश्चक्रवालेभ्यः स्वे मण्डले आत्मचक्रवाले निघ्नैरधीनैरपि, अरं शीघ्रं, शिष्यसङ्ख्यया सह वर्तमानां सहशिष्यसङ्ख्याम्।

४८। एकत्र उपवेशनभोजनादिभिरतिमहद्भिः कर्मभिः नीतिपथिकेन भूदेवेन सखित्वमिव नीतास्ते बहुभिः प्रयत्नैस्तस्य कार्य्याणि विदधुः।

४९। नियोगमात्मनोऽधिकारकार्य्यम्, उपपाद्य समाधाय, परमार्थबुद्ध्या परमपुरुषार्थज्ञानेन पितुः पादसेवनमेव परमप्रयोजनमिति निश्चित्य।

मातुस्तदा तु परलोकमुपेतवत्याः
पादाभिवादनसुखं परमं न लेभे।
आत्मानमभ्यशुभभाजनमप्यभाग्यं
तेनैष वञ्चितमिवामनुतेह लोके ॥ ५० ।
जायावियोगविधुरोऽपि निगृह्य शोकं
पुत्रं चिरात् समधिगम्य स विश्वनाथः ।
प्रेम्णा क्रमाद्द्विगुणितेन समभ्यनन्दद्-
राशीभवत्यपृथगाश्रयमाशु हार्द्दम् ॥ ५१ ॥
न्याय्यैः समुन्नतफलैर्विविधोपदेशै-
र्धर्मस्य शास्त्रनिहितैश्च निगूढतत्त्वैः ।
पुत्रं विनीतमपि तं नितरां व्यनैषी-
च्छिष्टं हि शिष्टतरमिच्छति को न पुत्रम् ॥ ५२ ॥
भूदेव एष च पितुश्चरणारविन्द-
मानन्दितेन मनसा वपुषा गिरा च ।
प्रत्यक्षदैवतमिवाखिलभव्यमूर्त्तिं
शुश्रूषते स्म नियतं परमादरेण ॥ ५३ ॥
हन्तैकदा प्रबलया तु रुजा प्रकाम-
मुत्थानशक्तिरहिते सति विश्वनाथे ।
आकर्ण्य तामकुशलां सपदि प्रवृत्तिं
शुश्रूषितुं पितृपदं सदनं प्रपेदे ॥ ५४ ॥
सम्वाहयन् पदयुगं करपल्लवाभ्या-
मङ्गानि तापविधुराणि परामृशंश्च ।
संबीजयन् मृदु मृदु व्यजनेन वासौ
कष्टं स्वयं बहु पितुः शमयाम्बभूव ॥ ५५ ॥
आस्योद्गतामथ गुरौ सृणिकां विहातुं

५१। हार्द्दं प्रेम अपृथगाश्रयं एकाश्रयं सत् राशीभवति पुञ्जीभूतं भवतीत्यर्थः। पूर्वं विश्वनाथस्य प्रेम पत्न्यां पुत्रे च द्विनिष्ठमासीत् पश्चात् पत्न्यां परलोकगतायां पुत्रे एव एकनिष्ठमभूत् इति राशीबभूवेति भावः।

५२। विनीतमपि शिक्षितमपि नितरां व्यनैषीत् अतिशयेन शिक्षयामास ।

५५। तापविधुराणि ज्वरेण विह्वलानि ।

निष्ठीवनत्यजनपात्रमपेक्षमाणे।
भूदेव आशु कमलानिलयं कराब्जं
प्रासारयत् तमभितः सृणिकां ग्रहीतुम् ॥ ५६ ॥

श्रीविश्वनाथ उचितेऽपि सुतस्य हस्ते
पद्मादपि प्रियतमे कमलालयायाः ।
तावत्मलं न तदपात्विपदेव याव-
न्निष्ठ्यूतिपात्रमिह दास उपाहरन् न ॥ ५७ ॥

निष्ठीव्य तत्र सृणिकामथ विश्वनाथ
आनन्दनिर्भरमना जडवन्मुहूर्तम्।
तूष्णीं स्थितोऽभ्युपगतान् प्रतिवेशिनस्ता-
नार्तोऽपि वार्त इव गद्गदवागवादीत् ॥ ५८ ॥

पुत्रो भवेद् यदि तदेदृश एव सोऽस्तु
भक्तिं पितर्यनुपमामनिशं दधानः ।
धन्यः पिता च खलु येन कुलं च धन्यं
रामेण वा दशरथश्च रघोः कुलञ्च ॥ ५९ ॥

अङ्गं ततः करतलेन परामृशन् सन्
प्रेम्णाशिषं प्रयुयुजे गुरुरात्मजस्य ।
आशीः पुराभवदमोघफलाय तस्य
वाचो मृषा न हि भवन्ति तपोधनानाम् ॥ ६० ॥

---

५६ । गुरौ पितरि विश्वनाथे आस्योद्गतां मुखे समुत्थितां सृणिकां स्यन्दनीं विहातुं त्यक्तुम् निष्ठीवनत्यजनपात्रम् औगल्दानी-पिकदानीत्यादि-नाम्ना ख्यातं अपेक्षमाणे प्रतीक्षमाणे सति भूदेवः कराब्जं पद्मसदृशं करं तं विश्वनाथं अभितः तस्याभिमुखे प्रासारयत्, अभिमुखार्थाभेश्च इत्यनेन अभिशब्दात्तसिः अभितः शब्दयोगे षष्ठ्यर्थे द्वितीया ।

५८ । आर्तोऽपि पीडितोऽपि वार्तइव निरामयइव गद्गदा विकृतस्वरा आनन्देनेत्यर्थः वाक् यस्य तादृशः सन् अवादीत् ।

५९ । रामेण वा रामेण यथा दशरथो धन्यो रघोः कुलं च धन्यं भवति तादृशः पुत्रोऽस्तु । वा शब्दः उपमार्थकः "वा स्याद्विकल्पोपमयोरेवार्थे च समुच्चये" इत्यमरः ।

६० । गुरुः पिता विश्वनाथः आत्मजस्य पुत्रस्य आशिषं शुभेच्छाम् प्रयुयुजे,

भूदेवो यां परममहतीमन्तरेणान्तरायम्
प्रापौन्नत्यश्रियमसुलभामप्यनिलण्डजातैः ।
तातस्यास्य प्रचुरतपसो विश्वनाथस्य मन्ये
पीयूषाभं फलमविकलं तत् तपःपादपस्य ॥ ६१ ॥

इति श्रीमहेशचन्द्रकृतौ भूदेव-चरिते महाकाव्ये
धनार्जनं नामाष्टादशः सर्गः ॥

एकोनविंशः सर्गः ।

धनार्जनम् ।

सुचिरमचरदुच्चैस्तानि भूदेवतातः
कृशतनुरपि धीरो विश्वनाथस्तपांसि ।
कलि-कलुषितचित्तैः कृच्छ्रसाध्यान्यपुण्यै-
र्ध्रुवममलमनोभिर्दुश्चराण्येव तानि ॥ १ ॥

आत्मजस्य अङ्गं प्रेम्णा परामृशन् ।

६१ । भूदेवः अन्तरायं विघ्नं अन्तरेण विना विघ्नव्यतिरेकेणेत्यर्थः, परममहतीं अतिशयेन उदारां तथा अनिलण्डजातैरनिलण्डजातभिन्नैः प्राज्ञैः असुलभामपि दुर्लभामपि उन्नतस्य भावः औन्नत्यं उन्नतिः तदेव श्रीः सम्पत् तामौन्नत्यश्रियं प्राप लेभे । तत् पीयूषाभममृततुल्यं अविकलं अङ्गवैकल्यरहितं फलम् , प्रचुराणि प्रभूतानि तपांसि यस्य तस्य प्रचुरतपसो विश्वनाथस्य भूदेवजनकस्य तप एव पादपो वृक्षस्तस्य, मन्ये उत्प्रेक्षे, तपोवृक्षस्य फलं मन्ये इत्यर्थः ।

१ । भूदेवतातो विश्वनाथः सुचिरं दीर्घकालं व्याप्य यानि तपांसि अचरत् चकार, उच्चैरुन्नतानि तानि तपांसि कलिना कलहेन कलियुगेन वा कलुषितं मलिनीकृतं चित्तं येषां तैरपुण्यैः पापकर्मभिर्जनैः कृच्छ्रेण कष्टेन साध्यानि अवलमनोभिर्दुर्बलचित्तैस्तानि दुश्चराण्येव दुष्कराण्येव ।

विसरदरुणभासा वासवाशामुखाब्जे
मृदु मृदु हसतीव ध्वान्तशान्तिं विलोक्य ।
शयनतलममुञ्चत् प्रत्यहं विश्वनाथः
परमगुरुमभीष्टं संस्मरन् विश्वनाथम् ॥ २ ॥
सपदि विहितशौचो जाह्नवीस्नातपूतः
परमशुचिरकार्षीत् पूर्वसन्ध्यां विधिज्ञः ।
तदनु जपविधानं भास्करायार्घ्यदानं
पितृमखमथ कृत्वा प्रोञ्छिकाय प्रसूनम् ॥ ३ ॥
शतमथ शिवलिङ्गान्यात्मनाष्टोत्तराणि
व्यरचयदमलात्मा जाह्नवीमृत्तिकाभिः ।
तदनु विबुधनद्यां भूय एवाभिषिच्य
स्मरहरशतलिङ्गान्यार्चिचत्तानि भक्त्या ॥ ४ ॥
तदनु स उपचारैर्मानसैस्तैरभीष्टै-
रयजत परमेष्टां देवतां ध्यानपूर्वम् ।
अथ बहिरुपहारैः शक्तितो भक्तितश्च
प्रमदतिमितनेत्रः पूजयित्वा ववन्दे ॥ ५ ॥
प्रतिनियतमपाक्षीत् सोऽथ गोमूत्रमध्ये
शुचि शुचिनि हविष्यं विश्वनाथो व्रतस्थः ।
निरुपकरणमन्नं देवतायै निवेद्य
स्वयमुपयुयुजे तत् स्वादु मत्वा प्रसादम् ॥ ६ ॥

---

२ । वासवाशामुखाब्जे प्राच्यादिशो मुखमाद्यभागस्तस्मिन् अब्जे पद्मे स्त्रियो मुख-
पद्मतुल्ये अरुणभासा अनूरुकरेण मृदु मृदु हसति सतीव इत्यर्थः ।

३ । पितृमखं तर्पणं ।

४ । आत्मना स्वयं व्यरचयत् निर्मितवान् । विबुधनद्यां गङ्गायां । अभिषिच्य
स्नात्वा । आर्चिचत् पूजितवान् ।

५ । मानसैर्मनसा सङ्कल्पितैरभीष्टैरभिलषितैः प्रियैरिति यावत् तैस्तन्मनोव-
र्त्तिभिः । उपचारैः पूजोपकरणैः प्रमदेनानन्देन आनन्दाश्रुभिः तिमिते
आर्द्रे नेत्रे यस्य स प्रमदातिमितनेत्रः सन् ।

६ । प्रतिनियतं नियतं नियतं नित्यं नित्यमित्यर्थः । शुचिनि पवित्रे गोमूत्र-

इति यमनियमाभ्यां वर्षमेकं तपांसि
प्रशमसुखमुपैतुं विश्वनाथश्चचार ।
क्वचिदपि न जितात्मा प्राप्तमात्मोपकण्ठं
तनयमुपदिदेश न्यायवद्धर्ममार्गान् ॥ ७ ॥
श्रुतिपथमनुसृत्य स्मार्तमार्गं प्रविष्टै-
रमृतवदुपदेशैस्तातपादस्य तैस्तैः ।
दृढमजनि तथासौ संस्कृतो वैश्वनाथि-
र्नृपतिपुरुषवाचाप्यन्यथा नो यथा स्यात् ॥ ८ ॥
क्वचिदथ स महात्मा वङ्गदेशस्य शास्त्रा
सविनयमुपहूतस्तस्य सौधं जगाम ।
तदनु परिसमाप्ते कार्य्यसंलापजाते
स्वमशनमुपयोक्तुं शास्तुरासीद्वकाशः ॥ ९ ॥
जिगमिषुरथ शास्ता भोजकः कल्यवर्तं
तमपि च सह भोक्तुं वैश्वनाथिं जुहाव ।
सुजनमुपवसन्तं न ह्युपेक्षेत शिष्टः
स्वमशनमपि दत्त्वा भोजयत्येव शक्तः ॥ १० ॥

मध्ये शुचि हाविष्यमन्नं अपाक्षीत् स्वयं पक्ववान् । व्रतस्थः नियमस्थः । उपयुयुजे बुभुजे भुक्तवानित्यर्थः ।

७ । यमाः सर्वेषां वर्णानामाश्रमाणाञ्च कर्तव्यधर्माः । यथा—

" अहिंसा सत्यवचनं ब्रह्मचर्यमकल्मसम् ।
अस्तेयमिति पञ्चैते यमाख्यानि व्रतानि च" ॥

नियमस्तु वर्णविशेषाणामाश्रमविशेषाणां व्रतं ।
"नियमस्तु स यत्कर्म नित्ययागन्तुसाधनम्" इति उपवासादिकर्म ।

८ । श्रुतिपथं कर्णपथं । स्मार्तमार्गं स्मरणपथं अथच वेदमनुगत्य धर्मशास्त्रपथं प्राप्तैः ।

९ । उपयोक्तुं भोक्तुं । वकाशः अवकाशः समयइति यावत् । वष्टिभागुरिरल्लोपमवाप्योरुपसर्गयोरित्यवस्याकारलोपः ।

१० । कल्यवर्तं प्रातराशं भोजकः भोक्तुं जिगमिषुरित्यर्थः । भोजकइति तुमर्थे णकः, अथवा वुण् ,अतएव कल्यवर्तं इत्यत्र न कर्मणि षष्ठी । उपवसन्तं अभुक्तं अथच समीपे वसन्तं ।

स तु पितुरुपदेशैः चालितो शैशवनाथिः
सुमधुरमपि भोक्तुं नैहत म्लेच्छभोज्यम् ।
सविनयमत एव प्रत्यवोचन्महात्मा
तमिममविनयं मे वङ्गराज क्षमस्व ॥ ११ ॥
अशितुमहमनीशो हन्त साहेबभोज्यं
तत इममनुरोधं रक्षितुं नास्मि शक्तः ।
इति निगदितवन्तं तं पुनः स्माह शास्ता
पिब रसय च भोज्यं भोजने कोऽस्ति दोषः ॥ १२ ॥
पुनरपि स विभुं भूदेव आह स्म नम्रो
ननु सह भवता नो युज्यते नैव तर्कः ।
अपि यदि न हि दोषः कोऽपि युष्मन्मते स्या-
त्तदपि भवति नस्तद्भोजने लोकनिन्दा ॥ १३ ॥
पठितुमिह यदेंलिश्वाङ् मयारम्भि पूर्वम्
परमगुरुरवोचत्तातपादस्तदा मां ।
फलमुपरि तदेंलिशपाठतोऽहन्तु जाने
ननु भवति कुसङ्गाद् हिन्दुभोज्यस्य भुक्तिः ॥ १४ ॥
अथ तमहमवोचं तातपादं विनीतो
न खलु न खलु भोक्ष्ये क्वापि साहेबभोज्यम् ।
इति मम दृढमङ्गीकारमाकर्ण्य तातः
स्मितमधुरमकार्षीत् वत्सलो मेऽभ्यनुज्ञाम् ॥ १५ ॥

---

१२ । अनीशः असमर्थः अशक्त इतियावत् । हन्त विषादे । स्माह आह स्म उवाचेत्यर्थः । रसय आस्वादय ।

१३ । आह स्म उवाच भवता सह नः अस्माकं तर्को नैव युज्यते युक्तो भवति । नोऽस्माकं तद्भोजने साहेबभोज्यभोजने लोकनिन्दा भवति ।

१४ । इह जीवने यदा इंलिश्वाक् इंरेजिभाषा मया पूर्वं प्रथमं पठितुं आरम्भि आरब्धा । उपरि भविष्यत्काले इंलिशपाठतः इंरेजिपाठात् फलं तु अहं जाने उत्प्रेक्षे, किन्तत् फलमित्याह, कुसङ्गात् कुत्सितलोकसङ्गात् हिन्दूनामभोज्यस्य भुक्तिः भोजनं ननु भवति भविष्यति, ननुशब्दयोगे भविष्यदर्थे लट् ।

१५ । अभ्यनुज्ञां इंरेजिपाठस्य अनुमतिमकार्षीत् ।

जनकचरणसाक्षि प्राङ्मयाङ्गीकृतं यत्
तदहमितरथा नो कर्तुमीशे कदाचित् ।
अयमुपचरितस्तद् वङ्गराजाञ्जलिस्ते
यदि भवति ममागः क्षम्यतां तद् भवद्भिः ॥ १६ ॥

इति निगदितवन्तं वैश्वनाथिं विनम्रम्
व्यसृजदुपि विलक्षश्चित्तवृत्त्याभिनन्द्य ।
प्रभुरशितुमथागात् प्रातराशं महाशः
स च निजभवनं भूदेव आशु प्रतस्थे ॥ १७ ॥

गुरुषु परमभक्तिं हिन्दुधर्मेऽनुरक्तिं
कुलविधिषु च सक्तिं तस्य शास्ता विलोक्य ।
निभृतमनुभवन्नप्यान्तरं प्रेम किञ्चि-
न्न बहिरजनि हृष्टस्ते हि गम्भीरभावाः ॥ १८ ॥

द्रविणचयकृतेऽपि व्यापृतो वैश्वनाथि-
र्नरपतिसचिवोऽपि त्यक्तवान् न स्वधर्मम् ।
अधिकमधिकमर्थं स क्रमेणापि चिन्वन्
नृपतिपुरुषगीतामर्जयामास कीर्त्तिम् ॥ १९ ॥

दिशि दिशि गुणनद्धां शुद्धवर्णां तथाहि
प्रतिदिनमपि वालैरागिभिर्गीयमानाम् ।
पुरजनपदमध्ये मौक्तिकालीसमाना-
मलभत कविकण्ठग्राहिणीं कीर्तिमालाम् ॥ २० ॥

---

१७ । विलक्षोऽपि विस्मितोऽपि अप्रतिभोऽपि निजामन्त्रणस्य अरक्षणादिति भावः । चित्तवृत्त्या मनसाभिनन्द्य अनुमोद्य व्यसृजत् गन्तुं विससर्ज । महाशः महती आशा यस्य स तादृशः ।

१८ । सक्तिं प्रसक्तिं । ते हि तादृशा हि गम्भीरो दुरवगाहो भावो येषां ते गम्भीरभावाः ।

१९ । द्रविणचयस्य धनसञ्चयस्य कृतेऽपि निमित्तेऽपि व्यापृतः व्यापारवान् तथा राज्ञः सचिवोऽपि मन्त्र्यपि यत् स्वधर्मं न तत्याज, प्रायेण उच्चपदस्था राजसचिवा धनार्जनार्थे स्वधर्मं त्यजन्ति भूदेवस्तु न तत्याज ।

२० । गुणैर्दयादाक्षिण्यपरोपकारादिगुणैर्बद्धां कीर्त्तिं मौक्तिकालीपक्षे तु

अथ स परमदक्षो लब्धभूरिप्रतिष्ठः
प्रभुसचिवनियोगम् प्राप्य पञ्जाबदेशे ।
स्कुलपरिकलनार्थं प्रेरितस्तत्र गत्वा
व्यलिखदतिविचित्रं दृष्टशिक्षाप्रकारम् ॥ २१ ॥
नृपतिसचिववर्य्यैस्तस्य मन्तव्यलेखे
विगणितगुणदोषे तत्र सर्वैस्तुतेऽथ ।
गुरुतरमधिकारं चक्रसन्दर्शनार्थं
स सममधिकवृत्त्या प्राप पाश्चात्यदेशे ॥ २२ ॥
तदनु समधिरुह्य श्रेणिमुच्चैर्द्वितीया-
मचिरमधिरुरोह श्रेणिमभ्युन्नतां सः ।
भृतिमलभत धीरो यत्र सार्द्धं सहस्रं
धुरमपिञ्च बहूनां दर्शने मण्डलानाम् ॥ २३ ॥
भगलपुरमखण्डं वर्द्धमानं च चक्रं
कुसुमपुरविभागं द्रष्टुमप्युत्कलांश्च
स धुरमपरचक्रालोकनेनैव सार्द्धं
स्वयमुदवहदुर्वी शेष उर्वीधुरां वा ॥ २४ ॥

गुणैः कौषेयसूत्रैर्नद्धां ग्रथितां । कीर्त्तिपक्षे शुद्धः व्युत्पन्नो वर्णोऽक्षरं यस्यास्तां मौक्तिकालीपक्षे तु शुभ्रो वर्णो, रूपं यस्यास्तम् । बालैरपि किमुत युवभिर्वृद्धैर्वा रागिभिः भैरवादिरागयुक्तैः अनुरागवद्भिश्च गीयमानां । पुरेषु नगरेषु जनपदेषु ग्रामादिषु मध्ये । कविकण्ठग्राहिणीं कीर्त्तिपक्षे कण्ठस्वरग्राहिणीम् । मौक्तिकालीपक्षे कण्ठभूषणीभूताम् ।

२१ । प्रभोर्वङ्गशास्तुः सचिवादः डिरेक्टरादेर्नियोगम् । पञ्जाबदेशे सिन्धुदेशे । परिकलनार्थं परिदर्शनाय ।

२२ । विगणितौ विशेषेण विचारितौ गुणदोषौ शिक्षाया गुणो दोषश्च यस्मिन् तादृशे तस्मिन् तस्य मन्तव्यलेखे सर्वैर्नृपतिसचिवप्रकाण्डैः स्तुते प्रशस्ते सति अथ पश्चात् चक्रवालपरिदर्शनार्थं गुरोरपि गुरुमधिकारं प्रापेत्यर्थः ।

२३ । ततो द्वितीयां श्रेणिमारुह्य पुनः सर्वत उन्नतां प्रथमां श्रेणिमारुरोहे-त्यर्थः । अत्र श्रेण्यां पञ्चदशशतानि रजतानां भृतिं वेतनमलभत ।

२४ । अपरचक्रालोकनेनैव पाश्चात्यचक्रवालपरिदर्शनेन सह भगलपुरादीनां चक्राणां

स्कुलपरिकलनार्थं वैश्वनाथिर्विहार-
प्रभृतिषु विषयेषु प्रेरितो यर्हि येषु ।
कुशलमखिललोकप्रार्थितं तर्हि तेषु
व्यधित किमपि धीमान् कीर्त्तिवल्ली-निदानम् ॥ २५ ॥
अधिकरणसभायां लेख्यपत्रे च पूर्वं
समजनि चलितोर्दूवाग् विहारप्रदेशे ।
इति शिशुजनमूर्दूं शिक्षयन्ति स्म वाचं
शिशुजनकपितृव्याः पारसीकांश्च वर्णान् ॥ २६ ॥
अथ नियममिमं तं विश्वनाथस्य सूनुः
प्रियमपि यवनानां युक्तिपूर्वं व्युदस्य ।
निखिलजनहितैषी तत्पदे मातृभाषां
शिशुजनविनयाय स्थापयामास धीमान् ॥ २७ ॥
अधिकरणपतींश्चावेद्य वङ्गाधिपं च
प्रभुमनुमतिमेषां न्यायतः कारयित्वा ।
व्यवहृतिविषये वाऽध्यापनामन्दिरे वा
परित इह विहारेऽचालयद्धिन्दुभाषाम् ॥ २८ ॥

धुरं भारं स्वयं ऊढ़वान् । उर्वी गुर्वी धुरं शेषः अनन्तः यथा उर्व्याः पृथिव्या धुरं उद्वहति तद्वदित्यर्थः ।

२५ । विहारप्रभृतिषु भगलपुरकुसुमपुरादिषु विषयेषु देशेषु अखिललोकप्रार्थितं सर्वजनाकाङ्क्षितं कुशलं मङ्गलं व्यधित चकार ।

२६ । अधिकरणसभायां आदालतइति ख्याते व्यवहारस्थाने । लेख्यपत्रे दलिलइति ख्याते प्रमाणपत्रे उर्दुवाक् उर्दु इति ख्याता भाषा शिशुजनकपितृव्याः शिशूनामभिभाषकाः । वर्णान् अक्षराणि ।

२७ । व्युदस्य व्यावर्त्त्य परित्यज्येत्यर्थः । शिशुजनविनयाय शिशूनां शिक्षायै स्थापयामास प्रावर्तयदित्यर्थः ।

२८ । अधिकरणपतीन् प्राड्विवाकान् विचारकानित्यर्थः । वङ्गाधिपं प्रभुञ्च लेफ्टिनेण्टगभर्णरञ्च । न्यायतो युक्त्या एषां प्राड्विवाकप्रभृतीनां । व्यवहृतिविषये साक्ष्यग्रहणलिखनादौ । हिन्दुभाषां हिन्दीतिख्यातां हिन्दुस्थानीयां भाषां ।

स्थविरतरुणबालाः पूरुषा योषितो वा
सततमखिलवर्णा ब्राह्मणाश्चान्त्यजाश्च ।
कविभिरुपनिबद्धां वैश्वनाथैरपूर्वां
जगुरुपचितभावास्तस्य तत्कीर्त्तिगीतिम् ॥ २९ ॥
इति स परिदिदृक्षुः सर्वतः पाठशाला
मगमदुदितहर्षो यं यमेव प्रदेशम् ।
गुणनिचयनिबद्धां तत्र तत्रैव विद्वा-
नुदनमयदनीचैः कीर्त्तिसम्पत्पताकाम् ॥ ३० ॥
नानोदन्तान् पुरजनपदान् भिन्नधर्मान् स देशान्
दर्शं दर्शं विविधचरितान् भूरिभाषांश्च लोकान् ।
भूयोदृष्टिप्रभवमचिनोज् ज्ञानरत्नं महद् यत्
तस्यालोकः स्फुरति भुवनेऽद्यापि तत्पुस्तकेभ्यः ॥ ३१ ॥
पूर्वेषां पूरुषाणां परमशुचिपदं कान्यकुब्जप्रदेशं
गत्वा यं ब्राह्मणानां समकलयदुपादेयमाचारधर्मम् ।
स्वस्याचारप्रबन्धे तमखिलमलिखत् पुस्तके वर्णमुख्यः
स्वं दोषं धूमपानं दुरपनयनमपि द्रागनन्यं जहौ च ॥३२॥
पाश्चात्यान् दाक्षिणात्यान् स्कुलपरिकलनस्याज्ञया स्वेच्छया च
भ्राम्यन् प्राच्यानुदीच्यान् नगरजनपदान् भारतं वर्षमेव ।
प्रायः कृत्स्नं स दृष्ट्वा जलधिमिव ततो मौक्तिकालीमिवाच्छां

---

२९ । स्थविरा वृद्धाः । तरुणा युवानः । जगुर्गायन्ति स्म ।

३० । कीर्तिरेव सम्पत् समृद्धिः तद्रूपां पताकां जयपताकां उदनमयत् उद्गाययति स्म इत्यर्थः ।

३१ । नाना बहुविधा उदन्ता वृत्तान्ता येषु तान् नानोदन्तान् पुरजनपदान् नगरग्रामान् । दर्शं दर्शं दृष्ट्वा दृष्ट्वा विविधानि चरितानि येषां तान् विविधचरितान् । भूयो बहुतरा भाषा वाचो येषां तान् भूरिभाषान् भूयोदृष्टिप्रभवं बहुदर्शनजन्यं स्फुरति प्रकाशते ।

३२ । परमशुचिपदं परमपवित्रस्थानं समकलयत् संगृहीतवान्, उपादेयं आदरेण ग्राह्यम्, वर्णमुख्यो ब्राह्मणः. अनन्यं एकमेव न त्वन्यं । अन्यो दोषस्तस्य नासीदितिभावः । द्राक् झटिति ।

भूयो दृष्टि महात्मा समचिनुत इदोऽलङ्कृतिं वैश्वनाथिः ॥ ३३ ॥

तत्रातिथ्यमुदारमादरवतां दृष्ट्वा स षट्कर्मणां
विस्मेरः समचिन्तयत् कविरहो धर्मोऽयमश्वत्थवत् ।
वेदोक्तः स्मृतिसंहितानुविवृतः पुष्टः पुराणादिभि-
र्हिंस्रेभ्यः परिरक्षितश्च जयति न्यायादिभिर्दर्शनैः ॥ ३४ ॥

मुम्बय्यां पुरि विश्वनाथतनयो गोविन्दनाम्ना सता
राणाडे इति विश्रुतेन धरणीदेवेन दिव्यश्रिया ।
आतिथ्येन पुरस्कृतः सुकृतवित् तद्भार्य्यया सेवित-
स्तस्यां सम्यगकल्पयद् दुहितृतासम्बन्धमानन्दितः॥ ३५॥

इत्थं भारतभूमिमण्डलमिदं प्रायः परीत्य क्रमाद्
भूदेवोऽधिकृतं वृटिशभिरगमद्देशं स वर्म्माभिधम् ।
तद्देशप्रतिवासिनामपि मनो हृत्वा गुणैर्हारिभिः
प्रत्यावर्तत तैः समं कतिपयैः प्रेम्णानुबद्धैरिव ॥ ३६ ॥

इति श्रीमहेशचन्द्रकृतौ भूदेवचरिते काव्ये धनार्जनं नाम
एकोनविंशः सर्गः ॥

---

३३ । पाश्चात्यान् पश्चिमदिग्भवान् दाक्षिणात्यान् दक्षिणदिग्भवान् प्राच्यान् पूर्वदिग्भवान् उदीच्यान् उत्तरदिग्भवान्। ततो भारतवर्षात्। समचिनुत सञ्चितवान् ।

३४ । षट्कर्मणां षट् यजनयाजनाध्ययनाध्यापनदानप्रतिग्रहाः कर्माणि येषां ते षट्कर्माणो ब्राह्मणाः तेषां ब्राह्मणानामित्यर्थः । विस्मेरो विस्मययुक्तः । अश्वत्थवत् अश्वत्थवृक्षतुल्यः । स्मृतिसंहिताभिर्धर्मपुस्तकैर्मनुसंहितादिभि-रनुविवृतः वेदानुसारेण प्रकाशितः, हिंस्रेभ्यो नास्तिकादिभ्यः ।

३५ । मुम्बय्यां पुरि वोम्बे इति ख्यातायां नगर्य्यां सभापण्डितेन गोविन्द राणाडे इतिख्यातेन दिव्यश्रिया दिव्यसम्पद्युक्तेन पुरस्कृतः सत्कृतः तस्यां तद्भार्य्यायाम ।

३६ । प्रायो बाहुल्येन परीत्य परिभ्रम्य । वृटिशभिरधिकृतं वृटिशवर्मा इति ख्यातं । हारिभिर्मनोहारिभिर्गुणैः परोपकारादिभिरेव गुणैः सूत्रैः । प्रेम्णा प्रीत्या । अनुबद्धैः पश्चाद्बद्धैरिव तैः समं सह प्रत्यावर्तत परागतोऽभ वदित्यर्थः ।

विंशः सर्गः ।

त्रिवर्गसाधनम् ।

इत्थमुच्चादुच्चतरं क्रमेणोच्चतमं पदम् ।
शिक्षाविभागाधिकृतेर्भूदेवोऽधिरुरोह सः ॥ १ ॥
तपोबलेन तातस्य पौरुषेण निजेन च ।
विद्यया चोन्नतिं लेभे सोपानैरिव सोऽनघः ॥ २ ॥
असूयामासुरुन्नत्यै तस्य केचिद् बुधा अपि ।
दोषैः पूर्णो हि संसारो नक्रैरिव महाह्रदः ॥ ३ ॥
प्रतिबन्धुं न शेकुस्तु न वा स्थगयितुं च ते ।
वर्षास्विव महासिन्धोर्वृद्धिं तस्योत्तरोत्तराम् ॥ ४ ॥
पक्षर्तुवसुभूसंख्ये संख्यावान् खीष्टवत्सरे ।
अभूज्जुलाइ मासेऽसौ सहायः परिदर्शकः ॥ ५ ॥
अनलर्त्तुवसुक्षौणिगणिते खीष्टवत्सरे ।
सोऽतिरिक्तो जानुयारीमासेऽभूत् परिदर्शकः ॥ ६ ॥
पर्य्यालोच्य स्वयं कर्म कुर्वन् स स्वामिनो मनः ।
तदानीं तोषयामास फलेनैवाविलम्बिना ॥ ७ ॥
नवर्तुवसुभूमाने तस्य खीष्टीयवत्सरे ।
कनिष्ठस्तनयोऽकाले कालधर्मं वतागमत् ॥ ८ ॥
भूदेवः पुत्रशोकार्तोऽप्यप्रमत्तमना इव ।
चकारैव प्रभोः कर्म धीरोऽह्यविचलः पदात् ॥ ९ ॥

---

१ । शिक्षाविभागाधिकृतेः शिक्षाविभागस्य कार्यानुष्ठानस्य उच्चतमं पदं ।

२ । अनघो निर्दोषो निष्पापश्च ।

३ । तस्य उन्नतये असूयामासुः तस्योन्नतिं न सेहिरे इत्यर्थः ।

४ । प्रतिबन्धुं व्यावर्तयितुम् । स्थगयितुं विलम्बयितुम् ।

५ । पक्षर्तुवसुभूसंख्ये १८६२ संख्यके खीष्टीयवर्षे । संख्यावान् पण्डितः ।

६ । अनलर्तुवसुक्षौणिगणिते १८६३ परिमिते । अतिरिक्तोऽधिकः स्वाधीनः ।

७ । अविलम्बिना अचिरोत्पन्नेन फलेन प्रयोजनेन । स्वामिनो डिरेक्टरादेः ।

८ । नवर्तुवसुभूमाने १८६९ गणिते, कालधर्मं मृत्युं, वत खेदे ।

९ । अप्रमत्तं सावधानं मनो यस्य तादृश इव ।

पश्चिमोत्तरचक्रस्य पञ्जाबविषयस्य सः ।
शिक्षारीति परिद्रष्टुं प्रभुनाथ न्ययुज्यत ॥ १० ॥
पञ्जाबचक्रवालस्य शिक्षारीतिमवेक्ष्य सः ।
युक्तं लिलेख मन्तव्यमिंलिश्वाचामयं बृहत् ॥ ११ ॥
मन्तव्यं तदुदारार्थं प्रधानैराजपूरुषैः ।
इंलण्डीयैरिहत्यैश्च भृशमस्तूयताखिलैः ॥ १२ ॥
भूदेवस्तस्य कार्य्यस्य पुरस्कृतिमिवोन्नतिम् ।
अचिरादन्वभूद् राज्ञां प्रसादे श्रीर्हि तिष्ठति ॥ १३ ॥
बाणाश्ववसुभूसंख्ये खीष्टाब्दे मास एप्रिले ।
न्ययुज्यत स पाश्चात्य-चक्रस्य परिदर्शकः ॥ १४ ॥
उच्चशिक्षाविभागस्य भूदेवस्तत्र वत्सरे ।
द्वितीयां श्रेणिमुन्निन्ये मासि मे-नाम्नि भाग्यवान् ॥ १५ ॥
रसाश्ववसुभूमाने वर्षे मासि नवेम्बरे ।
सोऽभूद् विहारचक्रस्य अतिरिक्तस्तु दर्शकः ॥ १६ ॥
यथा यथोन्नतिं निन्ये भूदेवो राजपूरुषैः ।
तथा तथाधिको भारस्तत्र तैश्च न्यधीयत ॥ १७ ॥
यथा यथाधिको भारो न्यधीयत च तत्र तैः ।
तथा तथा बुधः सोऽपि स्वं दाक्ष्यं बह्वदर्शयत् ॥ १८ ॥
परीक्षित इवासीत् स दत्त्वा भारं गुरुं गुरुम् ।
नरेन्द्रपुरुषैर्मुख्यैर्जिगीषुभिरिवेर्ष्यया ॥ १९ ॥
चुँचुड़ापुर एवासौ वसन् स्वकृतवेश्मनि ।

---

१० । प्रभुना लेफ्टेनेण्टगभर्णरसाहेबेन ।

११ । पञ्जाबचक्रवालस्य पञ्जाबमण्डलस्य । इंलिश्वाचामयं इंरेजीभाषात्मकं ।

१२ । इहत्यैर्भारतवर्षस्थैः । अस्तूयत प्रशंसितमभूत् । अखिलैः सर्वैः ।

१३ । अन्वभूत् प्रापेत्यर्थः । राज्ञां प्रसादे इत्यादिरर्थान्तरन्यासः ।

१४ । १८७५ इयत्परिमिते । पाश्चात्यचक्रस्य पश्चिमचक्रवालस्य ।

१६ । १८७६ इयत्परिमिते वर्षे खीष्टीयवत्सरे ।

१७ । तैः राजपुरुषैः तत्र भूदेवे न्यधीयत निहितोऽभूत् ।

१८ । स्वं दाक्ष्यं निजां कार्यदक्षतां ।

१९ । ईर्ष्यया वक्रवादिनः प्रतिगुणासहिष्णुतया ।

समादधे स्वकार्य्याणि चक्रयोरुभयोरपि ॥ २० ॥
प्रज्ञावतामसाध्यं किं किं दूरं व्यवसायिनाम् ।
विकाशयति पद्मानि दूरस्थोऽपि दिवाकरः ॥ २१ ॥
गभर्णमेण्टसम्मत्या सहायान् परिदर्शकान् ।
विधेयान् प्राप्य तैराप्तैः कर्माणि स समादधे ॥ २२ ॥
अथ शिक्षाविभागस्य श्रेणीं सर्वोन्नतां गतः ।
सार्द्धं सहस्रं रूप्याणां वृत्तिः प्राप स मासिकीम् ॥ २३ ॥
एको भूदेव एवासौ मध्ये वङ्गनिवासिनाम् ।
वृत्तिं लेभे पञ्चदशशतानि न पुनः परः ॥ २४ ॥
अथाश्वहृयवस्विन्दुगणिते खृष्टहायने ।
भूदेवस्य प्रसन्नासीद् भारतस्याप्यधीश्वरी ॥ २५ ॥
सि आइ इ इत्युपाधिं सा भूदेवाय ददौ मुदा ।
भिक्टोरिया महाराज्ञी विदुषी गुणगौरवम् ॥ २६ ॥
चूडामणिमिवोद्दीप्तं गुरुमप्यदुरुद्वहम् ।
उपाधिं शिरसा बिभ्रद् भूदेवः शुशुभेतराम् ॥ २७ ॥
अथ द्विवसुवस्विन्दुमिते खृष्टीयवत्सरे ।
स सभ्योऽजनि वङ्गीयव्यवस्थापकसंसदः ॥ २८ ॥
इत्थं पूर्णोऽपि भूदेव उपर्य्युपरि गौरवैः ।
नामून्मनागपि स्फीतो नदैरिव महार्णवः ॥ २९ ॥

---

२० । समादधे निर्वाहयामास ।

२१ । व्यवसायिनां निश्चयवतां ।

२२ । विधेयान् वश्यान् । आप्तैः विश्वस्तैः ।

२४ । पञ्चदशशतानि लेभे तदानीमिति शेषः ।

२५ । १८७७ इयत्परिमिते । भारतस्याधीश्वरी भिक्टोरिया ।

२६ । गुणगौरवं विदुषी गुणानां गौरवं जानतीत्यर्थः ।

२७ । गुरुगौरवशालि वस्तु प्रायेण दुरुद्वहं भवति उपाधिस्तु सम्मानेन गुरुरपि अनायासेन वोढुं शक्यः ।

२८ । १८८२ इयत्परिमिते । वङ्गीयव्यवस्थापकसभायाः सभ्योऽभूत् ।

२९ । मनागपि ईषदपि स्फीतो गर्वितो नाभूदिति भूदेवपक्षे, महार्णवपक्षे तु उद्वेलो नाभूदित्यर्थः ।

स त्वनारूढपूर्वोऽपि वङ्गेन्द्रस्य प्रभोः सभां।
मातृभूमेर्व्यथाच्छ्रयः किमुतारूढवान् पुनः॥ ३० ।
एकदा किम्वदन्त्यासीदुच्चशिक्षाविधेर्व्ययम् ।
गभर्णमेण्टो न पुनर्दद्यादिति समन्ततः ॥ ३१ ॥
यदा सा किम्वदन्त्यासीदुदिता विश्वनाथजः ।
स राजसाहीचक्रस्य तदासीत् परिदर्शकः॥ ३२ ॥
उच्छेत्स्यते कलेजेभ्य उच्चैरध्ययनक्रमः ।
इति सर्वस्य लोकस्य चिन्ताज्वर इवाजनि ॥ ३३ ॥
उच्छेद्यतोन्नता शिक्षा राजसाहीकलेजतः ।
इति शङ्कोदभूत्तस्य भूदेवस्यापि चेतसि ॥ ३४ ॥
संहृतेऽप्युच्चशिक्षाया व्यये भारतसम्पदा ।
तत्रोच्चशिक्षां रक्षिष्यन् स उपायमचिन्तयत् ॥ ३५ ॥
य उच्चैः शिक्षितो राजा तं दीघापतियापतिम् ।
भूदेवस्तद्व्ययं दातुं प्रावर्तयदुदारधीः ॥ ३६ ॥
भूदेवं भूपतिः सोऽपि देवतुल्यममन्यत ।
उपदेशं ततस्तस्य मूर्द्ध्ना वरमिवाग्रहीत् ॥ ३७ ॥
दुवल् हाटीपतिश्चासीद् भूदेवं प्रति भक्तिमान् ।
उच्चशिक्षां कलेजस्य सोऽपि रक्षितुमैहत ॥ ३८ ॥
स दीघापतियाराजो दुवल्हाटीपतिश्च सः ।
उच्चशिक्षां राजसाहीकलेजे द्वौ ररक्षतुः ॥ ३९ ॥
गभर्णमेण्टकोषेऽर्थमेकोऽन्यस्य वहुं चिरम् ।

---

३० । पूर्वमनारूढोऽपि सभामित्यर्थः । यदा सभां नाधिरूढवान् तदा इत्यर्थः

३१ । समन्ततः सर्वतः किम्वदन्ती जनश्रुतिरासीदित्यर्थः ।

३२ । उदिता आसीत् उत्थिता अभवदित्यर्थः ।

३४ । शङ्का उदभूत् संशय उत्पन्न इत्यर्थः ।

३५ । भारतसम्पदा भारतवर्षराज्येन । भारतगभर्णमेण्टेनेत्यर्थः ।

३६ । तद्व्ययं उच्चशिक्षाया व्ययं ।

३७ । वरमिव देवेन दत्तमभीप्सितमिव ।

३८ । ऐहत ऐच्छत् ।

कलेजस्योच्चशिक्षायै न्यासवृद्धीर्न्ययोजयत् ॥ ४० ॥
भूमिभागं ददावन्यो यस्यायः प्रतिवत्सरम्।
रजतानां सहस्राणि चत्वार्य्यासीद्विनिश्चितः ॥ ४१ ॥
उच्चशिक्षाव्ययस्ताभ्यां दत्तयार्थधराश्रिया।
राजसाहीकलेजस्य निर्वहत्यधुनाप्यलम् ॥ ४२ ॥
अथान्यदा स्थापयितुं शिक्षाविषयकं करम्।
गभर्णमेण्ट ऐहिष्ट वङ्गभूमेः प्रजास्वपि ॥ ४३ ॥
शिक्षाकरं तं भूदेवो वह्वीभिरुपपत्तिभिः।
वङ्गप्रजासु दीनासु भविष्यन्तं न्यवारयत् ॥ ४४ ॥
अथ द्विसप्तवस्विन्दुमिते खिष्टीयवत्सरे।
सती तस्य प्रिया पत्नी कालधर्ममुपागमत् ॥ ४५ ॥
सुतौ पतिश्च रक्षित्वा हारसिन्दूरमण्डिता।
विहाय सा पृथग् देहं हृदयं प्रेयसोऽविशत् ॥ ४६ ॥
सा व्यावृत्तापि संसारात् स्मरणीयां गतिं गता।
न जहौ हृदयं पत्युः पत्यत्यागः सतीव्रतम् ॥ ४७ ॥
अर्द्धाङ्ग इव जायायां गतायां चरमां गतिम्।
अर्द्धेनेव शरीरेण स तस्थौ शोककर्शितः ॥ ४८ ॥
आधिव्याधिभिराक्रान्तस्तदादि प्रेयसीशुचा।
अजीर्य्यत स भूदेवः क्रमाद्वंशो घुणैरिव ॥ ४९ ॥

४०। न्यासवृद्धीः न्यासस्य रक्षितस्य धनस्य वृद्धीः कुसीदानि सुद इति भाषा। एको दिघापतियाराजः।

४१। अन्यो दुवल्हाटीपतिः।

४२। अर्थधराश्रिया अर्थश्रिया धनसम्पदा धराश्रिया भूसम्पदा च।

४३। ऐहिष्ट इयेष।

४४। उपपत्तिभिर्युक्तिभिः।

४५। १८७२ इयद्गणिते। कालधर्मं मृत्युं।

४७। पत्यत्यागः पत्युरत्यागः अपरिहारः।

४८। अर्द्धाङ्गतुल्यायां। तत्रप्रमाणं "शरीरार्द्धं स्मृता जाया" इति।

४९। प्रेयस्याः शुचा शोकेन। आधिर्मनःपीडा व्याधिः शारीरी पीडा। घुणैः कीटविशेषैः। वंशः कीचको यथा जीर्य्यते तथा क्रमादजीर्यत इत्यर्थः।

सुहृद्भिरनुरुद्धोऽपि सम्बन्धेष्वागतेष्वपि ।
भूदेवः पुनरुद्वाहं नान्वमन्यत पूर्ववत् ॥ ५० ॥
पिता मे मृतभार्य्योऽपि पितुः पन्थानमन्वितः ।
यथा नोद्वहद् भूयस्तथाहमपि नोद्वहे ॥ ५१ ॥
इति निश्चित्य सम्बन्धान् सर्वान् प्रत्यादिदेश सः ।
पुत्रे सत्यपि यो भूयो विवाहः काम एव सः ॥ ५२ ॥
अज्ञः प्रियवियोगार्तो मोहमेव प्रपद्यते ।
विज्ञः पुनः शुचार्तोऽपि ज्ञानमेवानुपश्यति ॥ ५३ ॥
व्याकुलोऽपि बहिः किञ्चिन्नाभवत्सोऽन्तराविलः ।
अपि वाताहतः सिन्धुः कालुष्यं न हि गच्छति ॥ ५४ ॥
संसारस्यापसारत्वं प्रियस्याप्रियकारिताम् ।
अर्थस्य च निरर्थत्वं शुचार्तो बुबुधे बुधः ॥ ५५ ॥
तीर्थेषु महतां सङ्गो ज्ञानं वेदान्तवस्तुनः ।
सद्भ्यो दानं च पात्रेभ्यस्तस्मै भृशमरोचत ॥ ५६ ॥
नानादेशान् परिक्रम्य यद् यज्ज्ञानमुपार्जयत् ।
अन्यान् ज्ञापयितुं तत्तद् ग्रन्थान् स विदधे बुधः ॥ ५७ ॥
ज्ञानं वा धनरत्नं वा वैश्वनाथिर्यदार्जयत् ।
विभज्य तत् सुतादिभ्यो ददौ सर्वं बहुप्रदः ॥ ५८ ॥
असंविभज्य बालेभ्यः शिष्टो मिष्टान्नमागतम् ।
एकाकी न यथा भुङ्क्ते तथा ज्ञानामृतं च सः ॥ ५९ ॥
रसभावापदेशेन दित्सन् ज्ञानामृतं स तत् ।
कविर्बहूनि काव्यानि प्रणिनाय नयान्वितः ॥ ६० ॥
अथाग्निवसुवस्विन्दुपूरणे खृष्टहायने ।

---

५० । पूर्ववत् पूर्वपुरुषाः पितृपितामहा इव ।

५२ । प्रत्यादिदेश निराचकार ।

५४ । कालुष्यं मलिनत्वं ।

५५ । अपसारत्वं अपगतः सारो यस्मात् तस्य भावः सारशून्यत्वमित्यर्थः ।

५६ । वेदान्तवस्तुनः वेदान्तशास्त्रप्रतिपाद्यस्य ब्रह्मण इत्यर्थः ।

५८ । धनानि च रत्नानि च इति धनरत्नं समाहारद्वन्द्वः ।

गभर्णमेण्टसाचिव्याद्वकाशमवाप सः ॥ ६१ ॥
वृटिश् गभर्णमेण्टस्य नियमोऽयं सनातनः ।
वृद्धेभ्यो यद्मात्येभ्यो मुक्तिर्देयाधिकारतः ॥ ६२ ॥
तेनैव नियमेनासौ भूदेवोऽपि न्यवर्तत ।
विश्रामायाष्टपञ्चाशत्तमे वर्षे वयःक्रमे ॥ ६३ ॥
तथा पञ्च सहस्राणि रूप्याणाम्प्रतिवत्सरम् ।
राजप्रसादतो लेभे यावज्जीवं स जीविकाम् ॥ ६४ ॥
कर्मणोऽवसरं लब्ध्वा गार्हस्थ्यसुखमन्वभूत् ।
ग्रन्थांश्च प्रणयन् विद्वानतनोत् कीर्तिमुज्ज्वलाम् ॥ ६५ ॥
अहन्यहनि भूदेवो मुहूर्ते ब्राह्म उत्थितः ।
कृतशौचाह्निकः पूर्वां सन्ध्यां पूर्वमवन्दत ॥ ६६ ॥
तत एकत्र निर्दिष्टे सौधे समुपविश्य सः ।
सर्वान् ददर्श पुत्रादीन् प्राप्तानेकैकशः क्रमात् ॥ ६७ ॥
अभिवादयमानांस्तान् प्रीतः प्रत्यभिवाद्य च ।
पप्रच्छ कुशलं नाम योजयन् शुभयाशिषा ॥ ६८ ॥
पुत्रौ पौत्राश्च नप्तारौ नप्त्र्यश्चान्ये च बालकाः ।
पङ्क्तिक्रमेण तिष्ठन्तो दृष्टिं तस्यान्वरञ्जयन् ॥ ६९ ॥
अथ ते देवतास्तोत्रं जगुस्तस्याग्रतोऽर्भकाः ।
अभितो भास्करं साम वालखिल्या इवर्षयः ॥ ७० ॥
रामायणस्य च श्लोकान् कलकण्ठाः समस्वराः ।
शुद्धवर्णान्सङ्कीर्णं जगुः कुशलवाविव ॥ ७१ ॥
नास्तिकानामपि स्तोत्रगानं तत् पिवतां वत ।
हृदयं देवताभक्तिरसेनार्द्रमिवाजनि ॥ ७२ ॥

---

६१ । १८८३ इयत्परिमिते । साचिव्यादमात्यपदात् ।

६३ । न्यवर्तत निवार्तितोऽभूत् ।

६६ । पूर्वं प्रथमतः, पूर्वां सन्ध्यां प्रातःसन्ध्यां ।

७० । वालखिल्या नाम ऋषयः भास्करस्याभिमुखे यथा साम गायन्ति तथा बालकास्तस्याग्रतो देवतास्तोत्रं जगुरित्यर्थः ।

७१ । कलकण्ठा मधुरकण्ठस्वराः । कुशलवौ यथा तद्वत् ।

७२ । पिवतां शृण्वतां सतृष्णमिति व्यंङ्गयम् ।

विरम्य स्तोत्रपाठान्तेष्वधीयानेषु पुस्तकं ।
किञ्चिद्विहर्तुमुद्याने पादचारेण सोऽगमत् ॥ ७३ ॥
विहारोऽपि न तस्यासीदनर्थः समयात्ययः ।
कार्य्याण्युद्यानपालान् स ह्यादिशद् विहरन्नपि ॥ ७४ ॥
सन्तानानिव सोऽपश्यद् वृक्षकानपि वत्सलः ।
परेषामुपकुर्वन्ति ते हि काले फलश्रिया ॥ ७५ ॥
विहृत्य किञ्चिद् विश्रम्य श्रिय आयव्ययस्थितीः ।
मुहूर्तमपि भूदेवो ददर्शानन्यमानसः ॥ ७६ ॥
स हि मेने स्वयं लक्ष्मीमालस्याद् यो न पश्यति ।
अनादरमिव प्राप्य सा नश्यति ततोऽचिरात् ॥ ७७ ॥
अधिकोऽपि व्ययस्तस्य दानपुण्येष्वभून्मतः ।
अल्पोऽप्यपव्ययः किन्तु तस्यासह्य इवाजनि ॥ ७८ ॥
दृष्ट्वायव्ययसंख्यानं संख्यावान् स्नातुमुत्थितः ।
शिशुभिस्तैः परिवृतस्तीर्थं त्रिस्रोतसोऽगमत् ॥ ७९ ॥
तत्र क्रीड़त्सु बालेषु सानन्दं तेषु वारिणि ।
स्नात्वा गङ्गामृतैर्देवान् स पितॄनप्यतर्पयत् ॥ ८० ॥
ततस्तैः सममुत्थाय बिभ्रत् कौषेयवाससी ।
बालैः सह महात्मासौ प्राविशद्देवमन्दिरम् ॥ ८१ ॥
शौचेन देवसौधन्तत् सद्यश्चित्तप्रसादनम् ।
मन्ये यत्र स्थिरा देवा दिवं न बहु मेनिरे ॥ ८२ ॥
भूदेवो भक्तिभावार्द्रस्तत्रार्च्चीत् कुलदेवताम् ।
उपविष्टास्तमभितो बाला ददृशुरर्च्चनम् ॥ ८३ ॥
स्वाभाविकमपि त्यक्त्वा चापलं स्थिरचेतसः ।
बालाः सर्वे तमन्वास्य तस्थुश्चित्रार्पिता इव ॥ ८४ ॥

---

७५ । फलश्रिया फलसम्पदा ।

७६ । श्रिय आत्मसम्पदः ।

७९ । संख्यावान् पण्डितः ।

८१ । कौषेयवाससी कृमिकोषोत्थं वस्त्रयुगम् ।

८४ । चापलं चपलताम् । तमन्वास्य तस्य समीपे उपविश्य ।

चन्दनैर्विविधैः पुष्पैर्धूपैरपि सुगन्धिभिः ।
नैवेद्येन च भूदेवः पूजनं निरवर्तयत् ॥ ८५ ॥
भक्त्या समर्प्य चात्मानं वन्दित्वा स यथाविधि ।
निर्माल्यपुष्पैर्बालेभ्यो ददौ प्रत्येकमाशिषम् ॥ ८६ ॥
तिलकानि ददौ तेषां भाले स्नेहाच्च चन्दनैः ।
निवेदितञ्च मिष्टान्नं ददौ तेभ्यो विभज्य सः ॥ ८७ ॥
निर्गत्य देवतागारात् पुत्रनप्त्रादिभिः सह ।
द्वितलं सौधमारूढो बुभुजे सकुटुम्बकः ॥ ८८ ॥
भुक्त्वा गतेषु बालेषु तेषु विद्यालयान् प्रति ।
ग्रन्थान् स्वसौध आसीनो भूलेखो लिखति स्म सः ॥८९॥
ग्रन्थं पुष्पाञ्जलिं नाम प्रबन्धं पारिवारिकम् ।
सम्माज्जिकप्रबन्धं च किञ्चाचारप्रबन्धकम् ॥ ९० ॥
भागद्वयेन विविधप्रबन्धमपि नामतः ।
भारतस्येतिहासञ्च स्वप्नलब्धतया मतम् ॥ ९१ ॥
इतिहासमुदारार्थं मिलएडीयञ्च पण्डितः ।
शिष्याणामुपकारार्थं चकार गुणमण्डितः ॥ ९२ ॥
अध्यापनावकाशे च ग्रन्थान् स प्रणिनाय षट् ।
उक्तान् सप्तदशे सर्गे पश्चात् सप्तापरानपि ॥ ९३ ॥
विद्यालयात् परावृत्य बालानां क्रीडतां ततः ।
दिवावसाने सोऽपश्यदामोदं सजयाजयम् ॥ ९४ ॥
प्रदोषे पुनरासीनः शिक्षयामास यत्नतः ।
श्लोकांश्च धर्मनीतिञ्च पुत्रनप्त्रादिकान् स्वयम् ॥ ९५ ॥
इत्थं कीर्तिधनः कुटुम्बभरणं कुर्वन्नखर्वाशयो
भूदेवः समुपार्जयत् प्रतिदिनं धर्मार्थकामान् गृही ॥

---

८५ । निरवर्तयत् समापयामास ।

८८ । सकुटुम्बकः कुटुम्बैः सह वर्तमानः ।

८९ । भूलेखो भूदेवो ब्राह्मणः ।

९४ । सजयाजयं सह जयपराजयाभ्याम् वर्त्तमानम् ।

जिज्ञासुस्तदनन्तरं शुचिमना वेदान्ततत्त्वं परं
ज्ञानक्षेत्रमियेष गन्तुमचिराद्वाराणसीं पावनीम् ॥ ६६ ॥

इति श्रीमहेशचन्द्रकृतौ भूदेवचरिते काव्ये त्रिवर्ग-
साधनं नाम विंशः सर्गः ॥

एकविंशः सर्गः ।

चित्रकाव्यप्रायः ।

अथ भूदेवनामार्य्यः काशीं भूदेववत्सलः ।
प्राप्तोऽभूद्देव जिज्ञासुरात्मभूदेवमद्वयम् ॥ १ ॥
विश्वनाथं स तत्रेशं जगत्पितरमार्च्चिचत् ।
आत्मनः पितृतोऽनन्यं मन्यमानो महामनाः ॥ २ ॥
तमसामपघाताय तमसाबिन्दुशेखरम् ।
ययाचे ब्रह्मविद्याञ्च यया चेतः प्रसीदति ॥ ३ ॥

१। अथेति । अथ अनन्तरं, भूदेवो नाम यस्य स भूदेवनामा आर्य्यवंशावतंसः, आर्य्यलक्षणं यथा "कर्त्तव्यमाचरन् काममकर्तव्यमनाचरन् । तिष्ठति प्रकृताचारे स वा आर्य्य इति स्मृतः" इति, वेदप्रतिपादितकर्त्तव्यमाचरन्नित्यर्थः । भूदेवानां ब्राह्मणानां वत्सलः प्रियः स्नेहवान् ब्राह्मणान् प्रति स्नेहवानित्यर्थः । आत्मना स्वयं भवति प्रकाशते इत्यात्मभूः स्वप्रकाशः स एव देवो द्योतनात्मकः परमात्मा इत्यर्थः, तं जिज्ञासुर्ज्ञातुमिच्छन्; तथाचोक्तं "दीव्यति क्रीड़ते यस्माद् रोचते द्योतते दिवि । तस्माद्देव इति प्रोक्तः स्तूयते सर्व्वदैवतैः" इति, अद्वयं अद्वितीयम् । अन्यत् स्पष्टम् । मध्यत्र्यक्षरयमकम् ।

२। विश्वनाथमिति । आर्च्चिचत् अर्च्चयामास । अनन्यम् अभिन्नम् । अन्यत् सुगमम् ।

३। तमसामिति । असौ भूदेवः तमसां मोहानां तमोगुणजन्यानां संशयादीनामज्ञानानाम् अपघाताय उच्छेदं कर्तुं तम् इन्दुशेखरं महादेवं ब्रह्मविद्यामुपनिषद्विद्यां ययाचे च प्रार्थयामास च इत्यर्थः । यया ब्रह्मविद्यया चेतो मनः प्रसीदति प्रसन्नं भवति । अत्र तमसा तमसा इति

ततो ब्रह्ममयीं देवीमन्नपूर्णामपूपुजत्।
साक्षाद् ब्रह्ममयीं देवीं स्वमातरमिवान्नदाम् ॥ ४ ॥
भूयो बोधञ्च विद्यायाः शङ्करीञ्जननीमिव।
भूदेवोऽयाचताद्या या शक्तिरीशानकामिनी ॥ ५ ॥
अथवा सा महाविद्या ब्रह्मविद्या च सा परा।
सा च ब्रह्ममयी देवी निर्भिदा अमृतान्नदा ॥ ६ ॥
इति तामर्च्चयामास ध्यानमानजपार्च्चनैः।
गतिदामभयाश्वासज्ञानदानकृपार्थनैः ॥ ७ ॥

प्रथमार्द्धे ययाचे ययाचे इति द्वितीयेऽर्द्धे यमकद्वयम्।

४। तत इति। ब्रह्ममयीं ब्रह्मस्वरूपां देवीं द्योतनात्मिकां दिव्यन्तीं वा सृष्टिस्थितिसंहाररूपां क्रीड़ां कुर्व्वतीमित्यर्थः, अन्नपूर्णां अपूपुजत् पूजयामास। स्वमातरम् आत्मीयां जननीमिव अन्नदां अन्नप्रदां साक्षात् मूर्त्तिमतीं ब्रह्ममयीं तन्नामिकां देवीं देवस्य भूदेवस्य मातरम् ब्राह्मणजातीयाञ्च इत्यर्थः।

५। भूय इति। भूदेवः जननीमिव मातृसदृशीं शङ्करीं मङ्गलकरीं अन्नपूर्णामित्यर्थः, विद्याया ब्रह्मविद्याया बोधं ज्ञानं भूयश्च पुनश्च अयाचत ययाचे। या शङ्करी आद्या शक्तिः, तथा ईशानस्य महादेवस्य कामिनी प्रार्थिनीत्यर्थः, विषमाक्षरगोमूत्रिकाबन्धनामकं चित्रमिदं, तल्लक्षणं यथा सरस्वतीकण्ठाभरणे "गतिरुच्चावचा यत्र मार्गे मूत्रस्य गोरिव। गोमूत्रिकेति तत् प्राहुर्दुष्करं चित्रवेदिनः" इति।

६। अथवेति। ४र्थ ५म श्लोकयोरुक्तं जननीमिव अन्नपूर्णां देवीं पूजयामास विद्याया बोधमयाचत चेति। अथवा पक्षान्तरे, सा महाविद्या अष्टादशमहाविद्यात्मिका सा अन्नपूर्णा परा उत्कृष्टा सा ब्रह्मविद्या उपनिषद्विद्या च सा च निजजननी ब्रह्ममयी देवी च तिस्र एव निर्भिदा भिदाया भेदात् निष्क्रान्ता अभिन्ना इत्यर्थः, यतस्ताः अमृतान्नदाः महाविद्यापक्षे अमृतं निःश्रेयसमन्नमिव इत्यमृतान्नं तद्ददातीति तथा, ब्रह्मविद्यापक्षे अमृतममृततुल्यो रसः तदन्नमिवेति अमृतान्नं तद्ददातीत्यर्थः। निजजननीपक्षे तु अमृतसदृशमन्नं अमृतान्नं तद्ददातीति अभिन्नास्तिस्रः।

७। इति तामिति। इति हेतोस्तिसृणामभेदाद्धेतोः तामन्नपूर्णां ध्यानमानजपा-


अथ तुष्टाव भूदेवो देवदेवं जगद्गुरुम् ।
स्वप्रकाश प्रकाशस्व हृदि नो भक्तवत्सल ॥ ८ ॥
महतो यतिनो दारयतमानासुखान्तक ।
महिनीरतमोदारयजमानासुखात्मक ॥ ९ ॥

र्च्चनैः ध्यानं स्वरूपचिन्ता मानमनुमानं जपो मन्त्रजपः अर्च्चनं पूजा तैः पूजयामास । कीदृशीं तां; गतिदां गतिं गम्यं वस्तु स्वर्गमपवर्गं वा ददातीति गतिदां अभयाश्वासज्ञानदानकृपार्थनैः विशिष्टो भूदेवः विशेषणे तृतीया, अभयं यमादपि भयाभाव आश्वासः सान्त्वनाविशेषः ज्ञानदानं तत्वज्ञानस्य प्रदानं कृपा दया तासामर्थनैः प्रार्थनैर्याच्ञाभिरित्यर्थः । अयं समानामक्षराणां द्विचतुःषडष्टसंख्यकानां श्लिष्टत्वात् समाक्षरगोमूत्रिकाबन्धः लक्षणन्तु प्रागेवोक्तम् ।

८ । अथेति । अथ अनन्तरं भूदेवः जगद्गुरुं जगतां पितरं देवदेवं महादेवं तुष्टाव स्तुत्या प्रीणयामास । किं तुष्टावेत्याह—हे स्वप्रकाश स्वेन आत्मना प्रकाशते इति स्वप्रकाश ! हे भक्तानां वत्सल ! नः अस्माकं हृदि प्रकाशस्व आविर्भव स्वयमिति भावः ।


९ । महत इति । अस्य पदच्छेदाः । महतः । यतिनः । दारयतमान असुखान्तक । महिनीरतमोदारयजमानासुखात्मक । अर्थस्तु हे महतो यतिनः असुखान्तक ! महतो महत्त्वशालिनो यतिनो जितेन्द्रियस्य ब्रह्मचारिणो वा असुखानां दुःखानां त्रयाणां तापानामन्तक विनाशक निर्व्वाणप्रद इत्यर्थः । तथा हे दारयतमान दारैः पत्न्या पार्व्वतीदेव्या यतं बद्धं मानं देहपरिमाणं यस्य स तादृश पार्व्वत्या बद्धदेहार्द्ध इत्यर्थः । अथवा दाराणां पत्न्या यतं उपरतः मानः कोपो यस्मिन् येन वा इति दारयतमान ! अथवा दाराणां सम्बन्धे यतमान यत्नं कुर्व्वन्, यतीप्रयत्ने इत्यस्मात् शानः यतमान । तथा महिः पृथिवी महीशब्दस्य ह्रस्वान्ततापा अपि दर्शनात् । नीरं जलं तमोऽन्धकारं दारयन्तीति तमोदाराः चन्द्रसूर्य्याग्नयः, यजमानो यज्ञे दीक्षितः तथा असवः प्राणाः वायव इत्यर्थः । वायुविशेषे प्राणवाचकस्य असुशब्दस्य लक्षणया सामान्यबोधकत्व । खं आकाशश्च आत्मानो मूर्त्तयो यस्य स महिनीरतमोदारय-

अर्द्धगोमुत्रिका बन्धः।




(९-१० श्लो, २१२-२१३ पृ)

विषमाक्षर गोमूत्रिकाबन्धः



(५ श्लो, २११ प)

समाक्षर गोमुत्रिकाबन्धः



(७ श्लो, २११ प)

महनीयतनोऽदारयतमानासुखात्मक ।
महितो रतिमोदार यजमानासुखान्तक ॥ १० ॥
इति स्तुत्वा विश्वनाथं पितृवत्तस्य सोऽग्रहीत् ।
प्रसादमिव निर्म्माल्यं पुण्यञ्च चरणामृतम् ॥ ११ ॥
सोऽथ वेदान्तमध्येतुमन्वियेष यशोधनम् ।
विख्यातं शान्तमध्ये तु गुरुं संशयशोधनम् ॥ १२ ॥

जमानासुखात्मक इति सम्बोधनपदम् । अत्र गोमूत्रिकेयमुरीष्ठति ।

१०। महनीयेति । हे महनीयतनो महनीयाः पूजनीयाः (महपूजायामित्यस्मात् कर्म्मणि अनीयः) तनवोऽष्टौ मूर्त्तयो यस्य स तादृश, तथा अदाराः दारत्यागिनः सन्न्यासिनः गृहत्यागिनः इत्यर्थः । "न गृहं गृहमित्याहुर्गृहिणीगृहमुच्यते" इति शास्त्रात् । यत उपरतो मानोऽभिमानः अहङ्कारो येषां ते यतमानाः, अथवा यतमानाः मुक्तये यत्नवन्तः अदाराश्च ते यतमानाश्चेति अदारयतमानास्तेषामसवः प्राणाः खानि इन्द्रियाणि च आत्मा आत्मवत् प्रियाणि यस्य स तादृश । विषयेभ्यो विरक्तानां निरहङ्काराणां मुक्तये यत्नवतां वा प्राणवत् इन्द्रियवच्च वत्सल स्नेहवन् इत्यर्थः । अथवा दाराणां पत्न्या यतमानानाञ्च असुखात्मक प्राणेन्द्रियाभिन्न । तथा महितः मह उत्सवः जातोऽस्येति महितः तारकादेरितप्रत्ययः नृत्योत्सवयुक्तस्त्वं तथा रतिमोदार रतिः प्रीतिः मोद आनन्दः तौ इयर्त्ति प्राप्नोतीति रतिमोदार—ऋधातोः कर्म्मण्यण् इति अण्, प्रेमानन्दवन्नित्यर्थः । तथा यजमानानां आत्मानं पूजयतां जनानामसुखानां दुःखानां अन्तक विनाशक इत्यर्थः ।

११। इतीति । विश्वेषां नाथमीश्वरं महादेवं पितृवत् पित्रा तुल्यं पितुरिव इति वा स्तुत्वा, निर्म्माल्यं पुष्पादिकं प्रसादमिव अग्रहीत् । पुनातीति पुण्यं पवित्रकारकं चरणामृतञ्चाग्रहीदिति भावः ।

१२। सोऽथेति । अथ स भूदेवः वेदान्तम् उपनिषदम् अध्येतुं पठितुं यशोधनं यश एव धनं यस्य तादृशं, शान्तानां शमिनां मध्ये विख्यातं प्रसिद्धं, संशयान् सन्देहान् शोधयतीति संशयशोधनं गुरुं अन्वियेष, तु इति चकारार्थे पादपूरणे वा । अत्र न्तमध्येतु न्तमध्येतु यशोधनं यशोधनं इति द्वे यमके ।

प्राप सर्वदयालाख्यं स्वामिनश्चाचिराद् गुरुम् ।
इन्द्रजालद्रुवत् सद्यः सतां हि फलतीहितम् ॥ १३ ॥
भक्त्या वव्रे मुदासीनमुदासीनमुपेत्य सः ।
तथाचार्य्यं सदानन्दं सदानन्दम्भवर्जितम् ॥ १४ ॥
उवाच चाभिवाद्य तं गुरो प्रसीद देहि मे ।
तमोमलीमसात्मने नताय तत्त्वमुत्तमः ॥ १५ ॥
परात्परं चिरन्तनं धराधरं निरञ्जनम् ।
चराचरं चरद्घनं जराहरं दुरर्ज्जनम् ॥ १६ ॥

---

१३ । प्रापेति । स इत्यनुवर्तनीयं । सर्व्वदयाल आख्या नाम यस्य तं स्वामिनं अचिरात् शीघ्रं गुरुं उपदेशकं प्राप च । हि यतः सतां सज्जनानामीहितम् इच्छा इन्द्रजालद्रुवत् इन्द्रजालस्य वृक्षस्य तुल्यं सद्यः तत्-क्षणादेव फलति फलं जनयते । ऐन्द्रजालिका हि आम्रादिवृक्षस्य बीजं यदा वपन्ति तदैव तस्य फलान्यपि दर्शयन्ति तद्वत् ।

१४ । भक्त्येति । मुदा हर्षेण आसीनमुपविष्टं उदासीनं विषयेभ्यो निवृत्तं सदा-सर्व्वदा आनन्दो यस्य तथा सदानं दानेन सह वर्तमानं दानं विद्यादानं शुद्धिर्व्वा तेन सह वर्तमानं कपटेन धार्म्मिकत्वादिना स्वोत्कर्षख्यापनेच्छा दम्भः तेन वर्जितम् ।

१५ । १६ । उवाच चेति परात्परमिति च अनयोर्द्वयोरेकोऽन्वयः कर्त्तव्यः । तथाहि स भूदेवः तं गुरुमभिवाद्य पादयोर्गृहीत्वा उवाच च, किम् उवाचेत्याह, हे गुरो मह्यं प्रसीद प्रसन्नो भव, तमोमलीमसा-त्मने तमसा जघन्येन गुणेन मलीमसो मलिन आत्मा बुद्धिर्यस्य तस्मै तादृशाय नताय प्रणताय मे मह्यं तत्त्वं तत्त्वज्ञानम् ब्रह्म वा देहि वितर, कीदृशं तत् तत्त्वं—उत्तमः उद्गतमुच्छिन्नं तमोऽज्ञानं यस्मात् येन वा । पुनः कीदृशं—परात् व्यापकादपि परं व्यापकम् आकाशादिभ्योऽपि व्यापकमित्यर्थः । चिरन्तनं सनातनं नित्यमि-त्यर्थः । धराधरं धरां पृथिवीं धरति रक्षतीति धराधरं परमात्मनः कर्म्मसाक्षित्वात् तत्र विश्वास एव कर्म्मप्रवर्त्तकः अतएव धरा-रक्षकः तं तादृशं । निरञ्जनं अञ्जनेभ्यो मलेभ्यो निष्क्रान्तम् । तथा

गोमूत्रिका धेनुः

त्य चि न्त ध ध नि न्न

प ग रं र नं ग रं र नं

च न्न व द्ध ज ह दु र्ज

(१६ श्लो, २१४ प)

घनं निबिडं यथा स्यात् तथा चराचरं स्थावरजङ्गमात्मकं विश्वं चरत् व्याप्नुवत्, चरगतौ इत्यस्य रूपं। गतिश्च व्याप्तिरेव। तथा जरोहरं जरामरणजन्मक्लेशोच्छेदकम् पुनर्जन्मादिनिवर्त्तक-मित्यर्थः। तथा दुःखेन अर्ज्यते यत् तत् दुरर्जनम् अज्ञेयमग-म्यमित्यर्थः। तादृशं तत्त्वं ब्रह्म देहि उपदेशेन ज्ञापय इत्यर्थः। अयं श्लोको वह्वीर्गोमूत्रिकाः प्रसूते इति गोमूत्रिकाधेनुरुच्यते। तथाहि पादानां क्रमेण पाठादेका गोमूत्रिका तथाच सर-स्वतीकण्ठाभरणे "चतुर्णामपि पादानां क्रमेण व्युत्क्रमेण च। इयं गोमूत्रिकाधेनुर्वैपरीत्यवशेन च" इति।

स्तात्परमित्यादिश्लोकः पादानां क्रमेण पाठात् दर्शितपूर्व्वम्। यः श्लोकं प्रसूते स एको वत्सः। अथ व्युत्क्रमेण—

धराधरभीति द्वितीयपादः प्रथमतः पाठ्यः—

२यः पादः	३यः पादः	४र्थः पादः	१मः पादः	इत्यपरं वत्सं प्रसूते।
३यः ,,	४र्थः ,,	१मः ,,	२यः ,,	इत्यन्यं वत्सं प्रसूते।
१मः ,,	३यः ,,	२यः ,,	४र्थः ,,	इत्यन्यम्।
१मः ,,	४र्थः ,,	२यः ,,	३यः ,,	,,
२यः ,,	४र्थः ,,	१मः ,,	३यः ,,	,,
४र्थः ,,	३यः ,,	२यः ,,	१मः ,,	,,
३यः ,,	२यः ,,	१मः ,,	४र्थः ,,	,,
२यः ,,	१मः ,,	४र्थः ,,	३यः ,,	,,
४र्थः ,,	२यः ,,	३यः ,,	१मः ,,	,,
४र्थः ,,	१मः ,,	३यः ,,	२यः ,,	,,
३यः ,,	१मः ,,	४र्थः ,,	२यः ,,	,,
१मः ,,	२यः ,,	४र्थः ,,	३यः ,,	,,
१मः ,,	४र्थः ,,	३यः ,,	२यः ,,	,,
१मः ,,	३यः ,,	४र्थः ,,	२यः ,,	,,
४र्थः ,,	३यः ,,	२यः ,,	१यः ,,	,,

एवं षोडशवत्सान् प्रसूते एवं प्रतिपादं पादार्द्धस्य परिवर्त्य पाठात् चतुः

आकृत्या च प्रकृत्या च संस्कृत्या च प्रसेदिवान् ।
भूदेवाय प्रतिश्रुत्य कामं स्वामीदमब्रवीत् ॥ १७ ॥
हन्त वेश्म तवैष्यामि तृतीयप्रहरे कवे ।
वेदान्तं तत्र नेष्यामि त्वां तृप्त्यै नियमेन ह ॥ १८ ॥
गुरुं तमथ भूदेवः कृताञ्जलिरभाषत ।
कृतार्थोऽनुगृहीतोऽस्मि दिव्यं प्राप्तोऽस्मि दर्शनम् ॥१९ ॥
गुरवाचार्यवाचार्य यच्छ मे यच्छमे हितम् ।

षष्टिं वत्सान् प्रसूते प्रस्तावक्रमेण गणना कर्त्तव्या इति गोमूत्रिकानां धेनुः । यथा चिरन्तनं परात्परं निरञ्जनं धराधरं, चरद्घनं चराचरं दुरञ्जनं जराहरं, एवं निरञ्जनं परात्परं चिरन्तनं धराधरं, दुरञ्जनं जराहरं चरद्घनं चराचरम् इत्यादय ऊह्याः ।


१७ । आकृत्येति । स्वामी सर्वदयालनामा परमहंसः आकृत्या च शरीरसंस्थानविशेषेण च प्रकृत्या च स्वभावसौन्दर्येण च संस्कृत्या च संस्कारेण च शास्त्रेषु व्युत्पत्तिविशेषेण च प्रसेदिवान् प्रीतवान् भूत्वा भूदेवाय काममभिलषितं वेदान्ताध्यापनं प्रतिश्रुत्य अङ्गीकृत्य इदं वक्ष्यमाणं वचनं अब्रवीत् उवाचेत्यर्थः ।

१८ । हन्तेति । कवे हे पण्डित ! तृतीयप्रहरे प्रत्यहं तृतीये यामे तव वेश्म गृहं एष्यामि आगमिष्यामि, हन्तेति हर्षे । तत्र काले गृहे वा त्वां तृप्त्यै ज्ञान तृष्णा निवारणाय वेदान्तमुपनिषच्छास्त्रं नियमेन व्याप्त्या नेष्यामि प्रापयिष्यामि ज्ञापयिष्यामि, ह इति सम्बोधने पादपूरणे वा, तथा च मेदिनी ह स्यात् सम्बोधने पादपूरणे च इति। द्विश्रृङ्गाटकचक्रबन्धोऽयं, तस्य प्रमाणं यथा सरस्वतीकण्ठाभरणे शृङ्गाद्ग्रन्थि पुनः शृङ्गं ग्रन्थि शृङ्गं व्रजेदिति द्विशृङ्गाटकबन्धेऽस्मिन् नेमिः शेषाक्षरैर्भवेत् ।

१९ । गुरुं तमिति । अथ अनन्तरं भूदेवः कृताञ्जलिः बद्धाञ्जलिः सन् तं गुरुमभाषत, किमभाषत इत्याह—अहं कृतोऽर्थः प्रयोजनं येन तादृशो भवामि अनुगृहीतो भवामि त्वयेति शेषः । तथा दिव्यं स्वर्गीयं दर्शनं प्राप्तोऽस्मि इति भाव्यर्थस्य निश्चयात् भाव्यर्थो भूतवदङ्गीक्रियत इति न्यायात् भूतत्वं विवक्षितम् ।

द्विशृङ्गाटकबन्धः।

(१ अग्रशृङ्गे आरम्भः)



(१८ श्लो २१६ पृ)

वि विडितचक्रबन्धः



(२२श्लो २१७८)

सुकवे दान्तवेदान्ततत्त्वमेतत्त्वमेतवान् ॥ २० ॥
इत्युक्त्वापृच्छ्य भूदेवो वन्दित्वावसथं ययौ ।
परेद्यविस यामे च तृतीये तमुपास्थित ॥ २१ ॥
वेदान्तम्पावनन्दम्भदामान्तवचनम्भवे ।
वेदितुं माक्षिकम्पातर्याचरद् वन्दनां शिवे ॥ २२ ॥

---

२० । गुरवाचार्येति । हे गुरो हे आचार्य हे आर्य वाचा मे मह्यं एतद्वेदान्ततत्त्वं त्वं यच्छ देहि यत् तत् शमे शान्तौ हितमुपकारकम् । हे सुकवे हे दान्त संयतेन्द्रिय एतवान् आगतवान् मम गेहं आगत्य एतत् तत्त्वं यच्छेत्यर्थः । अत्र वाचार्य वाचार्य यच्छमे यच्छमे वेदान्त वेदान्त तत्त्वमे तत्त्वमे इति चत्वारि यमकानि । युग्मकम् ।

२१ । इत्युक्त्वेति । भूदेवः इति प्रागुक्तप्रकारमुक्त्वा वन्दित्वा प्रणम्य आपृच्छ्य आमन्त्र्य गुरो, इदानीमहं गच्छामीति आमन्त्र्य आवसथं ययौ आवासं जगाम । स सर्वदैयालः परेद्यवि परस्मिन्नहनि तृतीये यामे प्रहरे च तं भूदेवं उपास्थित तमुपजगाम । गङ्गायमुनामुपतिष्ठते इत्यादिवत् आत्मनेपदं सङ्गतिमैत्रीकरणयोश्च इत्यनेन सूत्रेण ।

२२ । वेदान्तमिति । भूदेवइतिकर्ता पूर्वस्मादनुवर्तनाय । भूदेवः पावयति पवित्रं करोतीति पावनः नन्दनइत्यादिवत् कर्त्तरि ल्युः तं पावनं तथा भवे जन्मनि पुनर्जन्मनीत्यर्थः, दम्भदामान्तवचनं दम्भश्छलं मम गृहं मम पुत्रइत्यादि मिथ्याज्ञानजन्यं कापट्यं दम्भएव दाम बन्धनरज्जुः तस्य दाम्नोऽन्तमवसानं वक्ति इति कर्त्तरि ल्युः वाच्यलिङ्गं क्वापि कारके च इत्यनेन एकवचनादाविव कर्त्तरि ल्युः तं दम्भदामान्तवचनं दम्भः कपटात्मकः संसारः तथाचोक्तं कविना "केनाप्यनर्थरुचिना कपटं प्रयुक्तमेतत्सुहृत्स्वजनबन्धुमयं विचित्रम्" इति, तस्य कपटात्मकस्य संसारस्य दाम्नो बन्धनस्य अवसानं कथयन्तं तथा माक्षिकं मधु तत्सदृशं सुरसमित्यर्थः वेदान्तमुपनिषच्छास्त्रं वेदितुं ज्ञातुं पातरि पारक्षणे इत्यस्मात् तृच् पाता तस्मिन् रक्षाकर्त्तरि शिवे वन्दनां प्रणामम् आचरदकरोदित्यर्थः । शिव इत्यत्र अधिकरणत्वविवक्षया सप्तमी, शिवविषयकोत्कर्षज्ञापनानुकूलं प्रणाममकरोदिति । बिबिडित-

गुरुं साक्षाच्छिवं मत्वा भक्त्या तमभिवाद्य च ।
अध्यात्मविद्यामध्येतुं भूदेवमुपचक्रमे ॥ २३ ॥
तमुपादिशदाचार्यः शिष्यं विनयभावितम् ।
तत्त्वपान्थं शमी चारुशिक्षाविन्नयकोविदः ॥ २४ ।
गृह्णाति मुकुरच्छायां प्रतीपामेव पार्श्वयोः ।
उपदेशांस्तु भूदेवः स यथायथमग्रहीत् ॥ २५ ॥
तमिष्टदेवं निश्चित्य गुरुं भूयः समादरैः ।


चक्रबन्धोऽयं तथाच सरस्वतीकण्ठाभरणे " शिखरादन्यतमाद्वै प्रतिपर्व भ्रमति रेखयार्द्धम्। नेमौ तदितरमर्द्धं विविडितचक्राभिधे बन्धे" इति ।

२३ । गुरुमिति । साक्षात् प्रत्यक्षं शिवं ज्ञानदं महादेवं मत्वा । आत्मनइति अध्यात्म आत्मविषये विद्यां आत्मतत्त्वविद्यामित्यर्थः । उपचक्रमे आरेभे इत्यर्थः ।

२४ । तमुपादिशदिति । आचार्यः सर्वदयालस्वामी विनयभावितं विनयेन शिक्षया भावितं संस्कृतं तं शिष्यं भूदेवमुपादिशत् उपदिदेश अध्यात्मविद्यामित्यर्थः । कीदृशं शिष्यं- तत्त्वस्य परमात्मनः पान्थं पथिकं तत्त्वपथि गच्छन्तमित्यर्थः । आचार्यः कीदृशः शमी शमवान् शान्तिमान्, पुनः कीदृशः चारुशिक्षावित् चारु मनोज्ञां शिक्षां वेत्ति जानातीति. तथा नये नीतौ कोविदः पण्डितः । अथवा चारुइति उपादिशादित्यस्याः क्रियाया विशेषणं चारु यथा स्यात्तथा उपादिशत् । द्विचतुष्कचक्रबन्धोऽयम् । तथा च सरस्वतीकण्ठाभरणे " इह शिखरसन्धिमाला विभृयादर्द्धे समाश्रितैर्वर्णैः । द्विचतुष्कचक्रबन्धे नेमिविधौ चामरं भ्रमयेत् " इति ।


२५ । गृह्णातीति । मुकुरो दर्पणः पार्श्वयोर्दक्षिणवामयोः प्रतीपां विपरीतामेच्छायां प्रतिबिम्बं गृह्णाति । बिम्बस्य दक्षिणो भागः प्रतिबिम्बस्य वामः बिम्बस्य वामो भागश्च प्रतिबिम्बस्य दक्षिणो भवति इतिभावः । तु पक्षान्तरे स भूदेवो यथायथं यो यथा तं तथैव उपदेशान् आददे जग्राह न तु विपरीतान् विलक्षणान् वा जग्राहेतिभावः । दर्पणादपि भूदेवस्य बुद्धिः सम्यग्ग्राहिणीति व्यतिरेकालङ्कारः ।

द्विचतुष्कचक्रबन्धः।



(२४ श्लो २१८ प)

नलंपद्मबन्धः ।



(३° श्लो २१९८)

सहोपदेशैः सत्तस्य भूदेवश्चित्तमाददे ॥ २६ ॥
इत्थं कतिपयैरेव दिनैः प्रेम्णा गुणेन सः ।
मृदुनापि दृढं तस्य बबन्ध चरणं गुरोः ॥ २७ ॥
अनागते च शिष्यस्याध्यायकाले तथाहि सः ।
तस्योदकण्ठताचार्य एकदास्यदिदृक्षया ॥ २८ ॥
उत्कण्ठां जायमानां तां शङ्कित्वा सङ्गहेतुकाम् ।
भीत भीत इव स्वामी गुरुः सोऽन्तरचिन्तयत् ॥ २९ ॥

ममाङ्गनायाः प्रणयेऽपि सान्द्र-
हेलस्य सक्तिः प्रशमाश्रितस्य ।
शक्या कथं न प्रविहातुमेका
चलापि शिष्यं प्रति हन्त नव्यम् ॥ ३० ॥

---

२६ । तमिति । भूदेवः तं गुरुं इष्टदेवमाराधनीयं देवं निश्चित्य भूयांसः समादरा येषु तैस्तादृशैरुपदेशैः सह तस्य गुरोः सत् उत्कृष्टं चित्तं आददे गृहीतवानित्यर्थः । अयं गूढचतुर्थः । प्रथमद्वितीयतृतीयपादेषु गूढः सम्भृतश्चतुर्थः पादो यस्य तादृशः । चतुर्थपादस्य वर्णाः पूर्वपादत्रये सन्तीत्यर्थः ।

२७ । इत्थमिति । प्रेमैव गुणः सूत्रं तेन गुरोश्चरणं बबन्ध तस्य गतिं बबन्धे त्यर्थः । अन्यत् सुगमम् ।

२८ । अनागते चेति । तथाहि गुरुचरणं स बबन्धेति यदुक्तं तस्य प्रमाणं हि एकदा एकस्मिन् दिने शिष्यस्य भूदेवस्य अध्यायकाले अध्ययन समये तृतीये प्रहरे अनागते च भाविनि सत्येव आचार्यः सर्वदयाल स्वामी तस्य उदकण्ठत तस्य सस्मार, उत्कण्ठमानो भवतो गुरूणामिति वत् षष्ठी । तस्य आस्यस्य मुखस्य दिदृक्षया दर्शनेच्छया विशिष्ट इत्यर्थः अत्र औष्ठ्यवर्णा न सन्तीति निरौष्ठ्यः ।

२९ । उत्कण्ठामिति । गुरुरुपदेशकः स्वामी स परमहंसः जायमानां उत्पद्यमानां तामुत्कण्ठामौत्सुक्यं सङ्ग आसक्तिर्हेतुर्यस्याः तां तादृशीं शङ्कित्वा वितर्क्य भीतभीतइव ईषद्भीतः सन् अन्तरन्तःकरणेन अचिन्तयत् ।

३० । ममेति । किमचिन्तयदित्याह-अङ्गनायाः स्त्रीविशेषस्यापि प्रणये प्रेमि सान्द्रा निविडा हेला अवज्ञा यस्य तस्य सान्द्रहेलस्य, तथा प्रशमं शान्तिं

सक्तेः कामस्ततो क्रोधः क्रोधान्मोहश्च जायते ।
मोहः समूहो दोषाणामितिशास्त्रस्य निर्णयः ॥ ३१ ॥
अतो हेयो मया प्रेमाचर्योदारमता क्षमा ।
मुक्त्या सहाकराराममयातिदासमजम्प्रति ॥ ३२ ॥

माश्रितस्य मम गव्यं शिष्यं भूदेवं प्रति चलापि भङ्गुरापि एका एकत्वसङ्ख्यावती नतु द्वित्राः सक्तयः सक्तिरासक्तिः कथं प्रविहातुं त्यक्तुं न शक्या अपितु शक्यैव इत्यर्थः । अत्र अष्टसु दलाग्रेषु महेशचन्द्रस्य काव्यम् इतिवर्णाः मध्ये च कर्णिकायां प्र-इतिवर्णः श्लिष्टः । इति अष्टदल-पद्मबन्धः ।

३१ । सक्तेरिति । सक्तिः सङ्गः । मोहः दोषाणां समूहः समूहस्य जनकइति लक्ष्योऽर्थः । आयुर्घृतमित्यादिवत् हेतावपि कार्यत्वेन आरोपः, इति दोषसमूहजनकइतिव्यङ्ग्यम् , इति शास्त्रस्य गीताशास्त्रस्य निर्णयो मीमांसा तथाच " सङ्गात् सञ्जायते कामः कामात् क्रोधोऽभिजायते । क्रोधाद्भवति सम्मोहः सम्मोहात् स्मृतिविभ्रमः । स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात् प्रणश्यति " इति ।

३२ । अतो हेयइति । अस्य पदच्छेदा यथा । अतः, हेयः, मया, प्रेमा, आचर्या, उदारमता, क्षमा, मुक्त्या, सह, आकराराममयातिदासम्, अजम्, प्रति. द्वादशपदच्छेदाः । अर्थस्तु, अतः कारणात् यतः सङ्गात् कामादयो जायन्ते अतो हेतोः मया प्रेमा भूदेवस्य प्रियता हेयः त्याज्यः, प्रेमा ना प्रियता हार्दमित्यमरः । प्रेमा प्रीतिः सैव सङ्गस्य कारणं तस्मात् प्रीतिरेव त्याज्या इत्यर्थः । ननु प्रीतित्यागे दुःखं जायते तत् कथं प्रीतित्याग इति चेत् उच्यते, मया उदाराणां महतां मुमुक्षूणामितियावत् मता प्रिया क्षमा सहिष्णुता दुःखस्य सहनमितियावत् आचर्या आचरणीया । ननु दुःखसहनं कथं क्रियतामित्यत आह, अजं प्रति न जायते इत्यजः परमात्मा तं प्रति तं लक्ष्यीकृत्य क्षमा आचर्या परमेश्वरो यत् करोति तदेव भावीति मत्वा दुःखं सोढव्यमित्यर्थः । मुक्त्या सह मोचनेन विषयत्यागेन सह अजं प्रति क्षमा कर्तव्या, अजं कीदृशं आकराराममयातिदासम् आकरः श्रेष्ठ आरामो निवृत्तिः, तथाच मेदिनी "आकरो निव-

अश्वपदबन्धः

१ अ	३० तो	९ हे	२० धो	३ मं	२४ या	११ प्रे	२६ मा
१६ च	१९ र्य्यो	२ दा	२९ र	१० म	२७ ता	४ न्न	२३ मा
३१ मु	८ त्या	१७ स	१४ ह्मा	२१ क	६ रा	२५ रा	१२ म
१८ या	१५ ति	३२ दा	७ स	२८ म	१३ ज	२२ म्प्र	५ ति
१ अ	२ दा	३ मं	४ न्न	५ ति	६ रा	७ स	८ त्या
९ हे	१० म	११ प्रे	१२ म	१३ ज	१४ ह्मा	१५ ति	१६ च
१७ स	१८ या	१९ र्य्यो	२० धी	२१ ऽक	२२ म्प्र	२३ मा	२४ या
२५ रा	२६ मा	२७ ता	२८ म	२९ र	३० तो	३१ मु	३२ दा

(१२-१३ श्लो, २२०८)

अदामक्षतिरासक्त्या हेम प्रेम जहाति च ।
स आर्यो योऽकम्प्रमाया रामातामरतो मुदा ॥ ३३ ॥
इत्यन्तः प्रविचिन्त्य तत्र दिवसे भूदेवमासाद्य स
स्वाम्यापृच्छत वत्स गन्तुमचिरादन्यत्र वाञ्छाम्यहम् ।
विप्रस्य स्थविरस्य ते मतिमतः सङ्गो न चेद् गर्हितो
बध्नातीव तथापि मुक्तिपथगं प्रेम्णा गुणैनैव माम् ॥ ३४ ॥

हात्पत्तिस्थानश्रेष्ठेषु कथ्यते इति । आराम आरातिनिवृत्तिरित्यर्थः, आकरस्य श्रेष्ठस्य आरामस्य निवृत्तेर्यातिः प्राप्तिः या गतौ इत्यस्मात् या-धातोर्भावे क्तिः सर्वे गत्यर्थाः प्राप्त्यर्थाइत्यनुशासनात् प्राप्तिः, आकरारामयातिं दासति ददाति इति दासृदाने इत्यस्मात् कर्मणो नट इति नट्, पाणिनिमते कर्मण्यण् आकरारामयातिदासन्तं तादृशं परम-निवृत्तिलाभप्रदं अजं प्रतीत्यर्थः ।

चतुरक्रीडायामश्वपदगत्या द्वात्रिंशतिगृहेषु द्वात्रिंशतो वर्णानां पुनः पाठात् अपरश्लोक आगच्छति यथा अदामक्षतिरिति । अस्य पदच्छेदा यथा । अदामक्षतिः, आसक्त्या, हेम, प्रेम, जहाति, च, सः, आर्य्यः, यः, अकम्प्रमायारामातामरतः, मुदा, एकादश पदच्छेदाः । अर्थस्तु । स आर्य्यः गुरुः भवतीतिशेषः, यः अदामक्षतिः दाम रज्जुः अत्र तु लक्षणया बन्धनसाधनं धर्म्माधर्म्मरूपमदृष्टं, क्षतिः क्षयो मृत्युरित्यर्थः दाम च क्षतिश्च ते दामक्षती न स्तो दामक्षती यस्य सोऽदामक्षतिः धर्म्माधर्म्मरहितो मृत्युरहितश्च आसक्त्या आसङ्गेन सह, सहार्थे गम्ये तृतीया, हेम सुवर्णं जहाति त्यजति प्रेम च प्रियताञ्च जहाति त्यजति । यश्च मुदा आनन्देन ब्रह्मानन्देन विशिष्टः, कम्प्रा चपला या माया स्त्रीपुत्रा-दिषु स्नेहः तथा कम्प्रा चपला या रामा कामिनी तयोस्ताम उत्कण्ठा तमु तान्तौ इत्यस्मात् भावे घञ् तामस्तस्मिन् रतः प्रसक्तः कम्प्रमायारा-मातामरतः स न भवति इति अकम्प्रमायातामरतः ब्रह्मानन्देन हेतुना यश्चञ्चलाया मायाया रामायाश्च उत्कण्ठायां न रतः स आर्य्य इत्यर्थः । श्लोकद्वयेन अश्वपादबन्धः । अस्य प्रमाणं सरस्वतीकण्ठाभरणे यथा "क्रमात् पादचतुष्केऽस्य पङ्क्तिशः परिलेखिते । तुरङ्गपादघातेन श्लोकोऽन्य उपजायते" इति ।

इत्येवामन्त्रयंस्तं निगलमिव नवन्तस्य शिष्यस्य धीरो
वच्छिद्य प्रेमबन्धन्नमनमपि महामोहनिद्रामपास्य ।
ऐशीं स्वाधीनपाताद् यतिरपि रहयन् रुन्धतीं यत्यमोदं
लब्धामन्विष्य काशीं क्वचिदुचितवनेऽपागमत् स्वीयकृत्ये ॥३५॥
तथागते सर्व्वदयालनाम्नि
स्वामिन्यदुःखायत वैश्वनाथिः ।
स्वामी परो नाम तु बालरामो
व्यपानुदत्तद्विरहं गुरुः सन् ॥ ३६ ॥


---

३४ । इत्यन्तरिति । स स्वामी सर्व्वदयालः इति इत्थं प्रकारेण अन्तर्मनसा प्रविचिन्त्य पर्य्यालोच्य तत्र दिवसे भूदेवं प्राप्य आपृच्छत आमन्त्रयत् । हे वत्स अचिरात् अहमन्यत्र गन्तुं वाञ्छामि । चेत्, यदि मतिमतो बुद्धिमत: स्थविरस्य वृद्धस्य ते तव सङ्गो न गर्हितो निन्दितस्तथापि एष सङ्गः मुक्तिपथे गच्छन्तं मां प्रेम्णो गुणेन रज्ज्वा सदृशेन बध्नातीव अतस्तव सङ्गत्यागाय मया अन्यत्र गन्तव्यमित्यर्थः ।

३५ । इत्येवेति । धीरः पण्डितो यतिर्जितेन्द्रियः सर्व्वदयालस्वामी इत्येव पूर्व्वोक्तप्रकारमेव तं भूदेवं आमन्त्रयन् आपृच्छमानः नव नूतनं निगलमिव निगडमिव लौहश्रृङ्खलबद्धमिव, उलयोरेकत्वं, तस्य शिष्यस्य भूदेवस्य प्रेमबन्धं नमनमपि नमयतीति नमनं नतिजनकमपि वच्छिद्य अवच्छिद्य तथा महामोहो ममत्वं स एव निद्रा ताम् अपास्य त्यक्त्वा स्वाधीनपातात् स्वाधीनगमनात् हेतोः यत्यमोदं यतीनाममोदमसन्तोषं रुन्धतीमावृण्वतीमपि ऐशीं ईशस्य महादेवस्य इयमिति ऐशी तां महादेव-वसतिमपि तथा अन्विष्य नानास्थानानि अन्विष्य लब्धामपि काशीं रहयन् त्यजन् क्वचित् कुत्रापि उचितवने तपोयोग्ये वने स्वीयानि कृत्यानि कार्य्याणि यत्र तादृशे वने अपागमत् अपजगाम इत्यर्थः । अस्य एकस्माद् वर्णात् पर एको वर्णः श्लिष्टः । नागपाशबन्धः ।


३६ । तथेति । अदुःखायत दुःखमन्वभवत् , तु परन्तु नाम प्राकाश्येन बालरामः परोऽन्यः स्वामी गुरुराचार्य्यः सन् तस्य सर्वदयालस्वामिनो विरहं विश्लेषं व्यपानुदत् अनाशयत् ।


नागपाशबन्धः।



(३५ श्लो २२८)

लताबन्धः।





(५७ श्लो २२३८)

भूदेवो देवदेवोपममममलमतिं मानदानन्दनन्तं
न्यायाद्यायान्ययाचे घनविनयनतो ज्ञानदानम्मनस्वी ।
स्वीचक्रे च स्वचर्य्याशुचिरुचिरुचिरात्तत् तु दातुम् प्रतुष्टो
ज्ञातन्ध्यातञ्च तत्त्वं गुरुरुरुकरुणः केतमेतस्तस्मै ॥ ३७ ॥
निर्यान्तीमथ बालरामयतिनो वेदान्तविद्यां मुखा-
द्भूदेवो विधुमण्डलादिव सुधाधारामुदाराशयः ।
जीवञ्जीव इव प्रहीतुमनघामारब्धवांस्तृप्तये
भक्त्या दक्षिणयेव निष्कपटया साधुं तमाराधयत् ॥३८॥

३७ । भूदेव इति । भूदेवः देवदेवोपमम् महादेवसदृशम्, अमला मतिः बुद्धिर्यस्य तं अमलमतिं मानदानां जनानामानन्दनं आनन्दयतीति आनन्दनस्तं मानदानन्दनं तं बालरामस्वामिनं, आयान् आगच्छन् आङ्पूर्व्वात् या-धातोः शतृः, न्यायात् न्यायं सदाचारमवलम्ब्य घनेन निबिडेन विनयेन नतो नम्रः भूत्वा ज्ञानदानं ययाचे प्रार्थयामास, कीदृशो भूदेवः, मनस्वी प्रशान्तमनाः, स च गुरुस्तत् तत्त्वं याथार्थ्यं ब्रह्म वा दातुं स्वीचक्रे अभ्युपजगाम । अचिरात् शीघ्रं, कीदृशः स प्रतुष्टः प्रीतः तथा स्वचर्य्याशुचिरुचिः स्वया आत्मीयया चर्य्यया ध्यानधारणाद्यनुष्ठाने स्थित्वा शुचिः पवित्रा रुचिः प्रवृत्तिर्यस्य तादृशः, चर्य्या त्वीर्यापथे स्थितिः इत्यमरः । तत्त्वं कीदृशं ज्ञातं गुरोः सकाशादवगतं ततो ध्यातञ्च स्वयं प्रचिन्तितं, गुरुः कीदृशः उरुकरुणः उर्व्वी गुर्व्वी करुणा यस्य तादृशः केतं भूदेवस्य निकेतं, कितनिवासे इत्यस्मात् अधिकरणे घञ्, एतः आगतः सन् तस्मै भूदेवाय दातुं स्वीचक्रे च इत्यर्थः । लताबन्धोऽयं, चतुर्द्दलपुष्पेषु द्वादशसु कर्णिकायां एको वर्णस्त्रिधा पाठ्यः चतुर्षु दलेषु चत्वारो वर्णा वाचनीया इति ।

३८ । निर्यान्तीमिति । अथ अनन्तरं भूदेवः विधुमण्डलादिव चन्द्रबिम्बादिव बालरामयतिनो बालरामनामा यती बालरामयती तस्य मुखात् निर्यान्तीं निर्गच्छन्तीं सुधाधारामिव अमृतधारामिव वेदान्तविद्यां जीवञ्जीव इव ना चकोर इव तृप्तये ज्ञानतृष्णानिवृत्तये अनघां निर्द्दोषां, वेदान्तविद्यापक्षे संशयादिदोषशून्यां, सुधाधारापक्षे मेघावरणादिदोषशून्यां

याचितो बालरामश्च स्वामी भक्त्या पदानतम् ।
तं प्रीतोऽध्यापिपच्छिष्यं वेदान्ताननुकम्पया ॥३९॥
यामे तृतीय आवासं नित्यं प्राप्य तदिच्छया ।
यापयामास तत्तृष्णां ज्ञानदानेन सत्यवित् ॥४०॥
इत्याचार्यवशो दशोपनिषदः श्रीबालरामाद् गुरोः
भूदेवः फललक्ष्यया प्रतिभयाऽधीयान एवान्वहम् ।
एकत्राह्नि पुरो ददर्श सहसा श्रीभास्करानन्दम-
प्यायान्तं कृपया सविग्रहमिवानन्दं स सन्न्यासिनम् ॥४१॥
सन्तं परमहंसं तु मतमार्गनकामकम् ।

गृहीतुं ज्ञातुं आरब्धवान् उदाराशयो महाशयो भूदेवः निष्कपटया छल-रहितया दक्षिणयेव निष्कपटया भक्त्या अनुरागविशेषेण तं सुधिं बालरामस्वामिनम् आराधयत् समतोषयत् इत्यर्थः ।

३९ । याचित इति । बालरामः स्वामी च याचितः भूदेवेन तथा प्रार्थितः सन् भक्त्या अनुरागविशेषेण पदानतं पादयोः प्रणतं तं शिष्यं भूदेवं अनुकम्पया दयया विशिष्टः प्रीतः प्रसन्नः वेदान्तान् उपनिषदः अध्यापिपत् अध्यापयामास ।

४० । याम इति । सत्यवित् सत्यं ब्रह्म वेत्तीति सत्यवित् ब्रह्मज्ञः बालराम-स्वामीत्यर्थः । तदिच्छया तस्य भूदेवस्य इच्छया इच्छानुसारेण नित्यं प्रत्यहं तृतीये यामे प्रहरे आवासं भूदेवस्य वसतिं प्राप्य गत्वा तस्य भूदेवस्य तृष्णां जिज्ञासां ज्ञानदानेन यापयामास अगमयत् निवर्तयामास इत्यर्थः । द्वाभ्यां श्लोकाभ्यां खड्गबन्धो नाम चित्रम् ।

४१ । इत्याचार्येति । आचार्यस्य अध्यापकस्य वशोऽधीनो भूदेवः श्रीबाल-रामनामकाद् गुरोरुपदेशकात् फलं लक्ष्यं यस्याः तया प्रतिभया उन्मेष-शालिन्या बुद्ध्या बुद्धिर्नवनवोन्मेषशालिनी प्रतिभा मतेति तादृश्या बुद्ध्या अन्वहं अहन्यहनि दश उपनिषदः अधीयान एव पठन्नेव एकत्र अह्नि दिवसे सहसा अकस्मात् आयान्तं श्रीभास्करानन्दमपि सन्न्यासिनं कृपया दयया विग्रहेण मूर्त्या सह वर्तमानं सविग्रहं मूर्ति-मन्तमिव आनन्दं प्रेमाणं स पुरोऽग्रतो ददर्श इत्यर्थः

खड्ग बन्धः।

(३९-४० श्लो, २२४ पृ)

दण्ड बन्धः।

(४२ श्लो, २२४ पृ)

समन्तं तपसा रम्यमनहंवासमन्तुकम् ॥ ४२ ॥
स्वामिनं भास्करानन्दमभ्यवाद्यतोद्गतः।
पादौ प्रेमाश्रुभिः पाद्यैः प्रक्षाल्याभ्यर्च्चयन्निव ॥ ४३ ॥

४२। ४३। सन्तमिति स्वामिनामिति च द्वयोरेकोऽन्वयः कर्तव्यः। सन्तं पण्डितं परमहंसं सन्न्यासिविशेषं, तु इति प्रशंसायां, तथा च मेदिनी "तु पादपूरणे भेदे समुच्चयेऽवधारणे। पक्षान्तरे नियोगे च प्रशंसायां" इति। मतसाम्यनवामकं—मतं प्रियं साम्यं सर्वत्र सपक्षविपक्षयोः सुखदुःखयोः समता तुल्यता यस्य सः मतसाम्यः, तथा नास्ति वामः प्रतिकूलो यस्य स नवामकः नञर्थकनशब्देन सह बहुव्रीहिः, अतएव नकारस्य अकारादेशो माभूत् नञः स्थान एव अकारादेशस्य विधानात्, ततश्च अकृतसमासान्ताद्वा इत्यनेन संक्षिप्तसारसूत्रेण वैकल्पिकः कप्रत्यय इति नवामकः, मुग्धबोधमते तु नञः स्थानेऽपि विकल्पेन अकारादेश इति, मतसाम्यश्चासौ नवामकश्चेति कुण्ठकुब्जः कुब्जकुण्ठ इत्यादिवत् एकतरस्य विशेषणस्यापि विशेष्यत्वं कल्पयित्वा कर्म्मधारयः, तं साम्यवत्सलं प्रतिकूलरहितं चेत्यर्थः। तथा समं साधुं "सर्वसाधुसमानेषु समः स्यादभिधेयवत्" इति मेदिनी। तं पूर्वोक्तम्, तथा तपसा ब्रह्मचर्यव्रतेन रम्यं मनोज्ञं, तथा च मेदिनी "रम्या रात्रौ चम्पके ना मनोज्ञे त्वभिधेयवत्" इति तथा अनहंवासमन्तुकं—अहं इत्यव्ययं अहङ्कार इत्यर्थः—अहं ज्ञानी अहं सन्न्यासीत्यादिज्ञानमिति यावत् तस्य अहङ्कारस्य वासः अधिकरणम्, अहंवासः स च मन्तुश्च अपराधश्चेति द्वन्द्वः, अहंवासमन्तू, न स्तः अहंवासमन्तू यस्य सः अनहंवासमन्तुकः, बहुव्रीहौ कप्रत्ययः अहङ्कारापराधरहित इत्यर्थः, तं अनहंवासमन्तुकम्। अथवा नह बन्धने इत्यस्माद्धातोः नह्यते इति भावे डः, नास्ति नहो बन्धनं संसारबन्धनं अदृष्टरूपबन्धनं यस्य तम्, वा इति समुच्चये—अनहं चेत्यर्थः, तथा असम-

मानी यत्नात् समानीय गाङ्गं तदपि पावनम् ।
सम्पाद्य सरसम्पाद्यमनिजत् तेन तत्पदे ॥ ४४ ॥
मार्जयित्वा च ते भक्त्या स्वेनैवोत्तरवाससा ।
आसने राङ्कवे स्थूले तमुपावेशयत् पृथक् ॥ ४५ ॥
ऊचे च स्वागतं तात भवते भर्वतेजसे ।
प्रसीद दर्शयस्वेत्थं भव नो भवनोदनः ॥ ४६ ॥
तत्रासीनोऽब्रवीत् स्वामी प्रतिनन्दंस्तमाशिषा ।

न्तुकं मन्तुना अपराधेन सह वर्तमान इति समन्तुकः, स न भवतीति असमन्तुकः तम्, तथा स्वामिनं स्वाम्युपाधिकं भास्करानन्दं भास्करानन्दनामकं तम्, उद्गतः प्रत्युद्गतः मन् भूदेवः अभ्यवादयत पादयोर्जग्राह इत्यर्थः । प्रेमाश्रुभिरानन्दजन्यनयनजलैः पाद्यैः पादाय योग्यैः पादप्रक्षालनैरित्यर्थः, पादौ तस्य चरणौ प्रक्षाल्य शोधयित्वा अभ्यर्चयन् पूजयन्निवेत्यु-त्प्रेक्षा । नयनजलसेकेन पाद्येनेव तं पूजयन्निवेत्यर्थः । दण्डबन्धः ।

४४ । मानीति । मानश्चित्तसमुन्नतिः । मानो विद्यतेऽस्येति मानी समुन्नतचित्तः स भूदेवः । तदपि यद्यपि प्रेमाश्रुभिः तस्य पादौ प्राक्षालयत् तथापि यत्नात् पावनं पवित्रकारकं गाङ्गं गङ्गाया रसं जलम्, "रसो गन्धरसे जले" इति मेदिनी, समानीय समाहृत्य पाद्यं पादोदकं सम्पाद्य तेन रसेन गाङ्गजलेन तस्य पदे चरणौ अनिजत् शोधयामास, निजिर् शुद्धौ इत्यस्य लुङि रूपम् । अत्र मानीय मानीय सम्पाद्य सम्पाद्य इति यमकद्वयम् ।

४५ । पृथग् भिन्ने आसने । राङ्कवे मृगरोमजे ।

४६ । ऊचे चेति । स भूदेव ऊचे च उवाच च । किमुवाच—इत्याह । हे तात भवतेजसे भवस्य महादेवस्य तेजइव तेजो यस्य तस्मै, भवते तुभ्यं स्वागतम् । स्वागतशब्दयोगाच्चतुर्थी, नोऽस्माकं प्रसीद इत्थमेवम्प्रकारं दर्शयस्व आत्मानं प्रकाशय मध्ये मध्ये आगत्य दर्शनं देहि इत्यर्थः । तथा भवस्य संसारस्य नोदनः प्रेरको भव इत्यर्थः । अत्र भवते भवते भवनो भवनो इति यमकद्वयम् ।

अकिञ्चनस्य सर्वस्वमाशीर्वादो हि केवलः ॥ ४७ ॥
महामहा मारमार आप्त आप्तस्तवस्तव ।
वता वता देव देवयाशया शम्वरम् वरम् ॥ ४८ ॥
प्रकाशतांञ्च ते तात निर्म्मले रससम्भृते ।
प्रतिबिम्बमिवार्कस्य परमं ब्रह्म मानसे ॥ ४९ ॥
सानन्दं नम्रशिरसा सारङ्गेन सचेतसा ।

---

४७ । तत्रासीन इति । स्वामी भास्करानन्दस्तं भूदेवम् आशिषा अभिलषित-प्रार्थनेच्छया प्रतिनन्दन् प्रत्यभिवादयन्नब्रवीत् । हि यतः आकिञ्चनस्य नास्ति किञ्चन द्रव्यं यस्य तादृशस्य जनस्य केवल आशीर्वादः सर्वस्वं सर्वं धनं तमेव स ददातीति ।

४८ । महामहा इति । किमब्रवीदित्याह । महत् महस्तेजो यस्य स महामहाः महातेजाः, तथा मारस्य कन्दर्पस्य मारः मारकः मारं मारयतीति मारमारः कन्दर्पदाहकः । तथा आप्तः भ्रमप्रमादविप्रलिप्साशून्यः, देवः द्योतनशीलः महादेव इत्यर्थः, आप्तस्तवः आप्तः प्राप्तः स्वीकृत इति यावत् स्तवः स्तुतिर्येन स तादृशः । तव आशया इच्छया वरम् अभिलषितम् अवतादेव रक्षत्वेव, अवरक्षण इत्यस्मात् आशिषि-तु-स्थाने तात् । वतेति हर्षे । वरं कीदृशं, शम्वरं श्रेष्ठमुन्नतमित्यर्थः । अत्र द्वयोर्द्वयोर्वर्णयोर्यमकम् । देवयाशया इत्यत्र विकल्पेन विसर्गस्य यकारः ।


४९ । प्रकाशताञ्चेति । हे तात ते तव मानसे चित्ते परमं ब्रह्म परमात्मा च प्रकाशतां ज्ञानविषयो भवतु, कीदृशे मानसे—निर्म्मले मलैः संशयादिभिः शून्ये, तथा रसैः अनुरागैः सम्भृते पूर्णे, तत्र उपमा अर्कस्य सूर्यस्य प्रतिबिम्बं छाया मानसे मानससरोवर इव, मानससरश्च निर्म्मलं पङ्कादिरहितं रसैः जलैः संभृतं पूर्णं च भवति तद्वत् । मानससरसि यथा सूर्यप्रतिबिम्बं प्रकाशते तथा तव चित्ते परम ब्रह्म प्रकाशताम् । ननु अत्र प्रकाशते प्रकाशतामिति कालभेदात् कथमुपमाया निर्दोषत्व मिति चेन्न इवशब्दगम्यायामुपमायां पदार्थयोरेव उपमानोपमेयभावः प्रतीयते न तु वाक्यस्य इति पर्यालोचनीयम् ।

सातदाशीर्वितमसा सामपाध्यरितेन सा ॥ ५० ॥
भूदेवोऽथ स्वहस्तेन मिष्टान्नं तमभोजयत्।
स्वामिनं श्रद्दधानश्च गङ्गामृतमपाययत्॥ ५१ ॥
नमस्यामनयत् तं यत् नवे भावे नतं मतम्।
नयतायनसौम्योऽसौ ननन्द न न तद्वत ॥ ५२ ॥


५० । सानन्दमिति । नम्रशिरसा सारज्ञेन सचेतसा वितमसा तेन सामपा सातदाशीः सानन्दमधारि इत्यन्वयः । अर्थस्तु नम्रं शिरो यस्य स नम्रशिरास्तेन नम्रशिरसा भूदेवेन, अथवा नम्रं च तत् शिरश्चेति नम्रशिरस्तेन नम्रेण शिरस करणेन, सारं स्थिरांशं शास्त्राणां तत्त्वं जानातीति सारज्ञस्तेन सारज्ञेन तत्त्वविदा इत्यर्थः, सचेतसा प्रशंस्तेन चित्तेन सह वर्त्तमानेन सहृदयेनेत्यर्थः, तथा वितमसा विगतं तमोऽज्ञानं यस्य तेन तमोगुणरहितेन तेन भूदेवेन कर्त्रा, सातं सुखं ददातीति सातदा सुखप्रदा "शर्म्मसातसुखानि च" इत्यमरः। तथा सामपा साम सान्त्वं सान्त्वनामिति यावत् पाति रक्षतीति, सा भास्करानन्दकृता आशीः सानन्दं आनन्देन सह वर्तमानं यथा स्यात् तथा तेन भूदेवेन अधारि, अथवा तेन भूदेवेन नम्रेण शिरसा अधारि धृता स्वीकृता इति फलितार्थः । इदं चतुर्दलपद्मबन्धनामकं चित्रकाव्यम्, तथा च सरस्वतीकण्ठाभरणे "कर्णिकातो नयेदूर्ध्वं पताकामक्षरावलीम् । प्रवेशयेत् कर्णिकायां पद्ममेतच्चतुर्दलम्" इति ।

५१ । भूदेव इति । अथ श्रद्दधानः श्रद्धावान् भूदेवः तं भास्करानन्दं स्वामिनं स्वहस्तेन मिष्टान्नमभोजयत् तथा स्वहस्तेन गङ्गामृतञ्च अपाययत् पाययामास इत्यर्थः ।


५२ । नमस्यामिति । नयतायनसौम्यः नयस्य नीतेस्तायने प्रचारणे—तायृ सन्ताने इत्यस्य ल्युट्प्रत्ययान्तस्य रूपं तायनं विस्तारः तस्मिन् सौम्यः विज्ञः असौ भूदेवः तं भास्करानन्दस्वामिनं यत् यतः नमस्यां पूजां अनयत् प्रापयामास, कीदृशं स्वामिनं नवे भावे नूतने भक्तिभावे सति नतं वन्दितं भूदेवेन अभिवादितं तथा मतं प्रियं भूदेवस्य सम्मतमिष्टमित्यर्थः , तत् तस्मात् वत हर्षे असौ भूदेवः न न ननन्द अपि तु ननन्दैव आनन्दितोऽभवदेवेत्यर्थः । द्वौ नञौ प्रकृत्यर्थं द्रढयतः



(५० श्लो, २२७ पृ)



(५२ श्लो, २२८ पृ)



(५४ श्लो, २२९ प)

भक्त्या च श्रद्धया चास्य सोऽप्यतृप्यद् यतिस्तथा ।
नामृतस्वादुनान्नेन नामृतेनापि वा यथा ॥ ५३ ॥
श्रद्धामस्य स भूयसीमवगतः शौचप्रियस्य स्थिर-
स्तुष्टिं हेतुविदेनसो व्यवहितः सूरिर्ययौ काञ्चन ।
भक्त्या शङ्करवत्तमेष वशिनं प्रीतं सुसेव्यं सदा
दाता स्म श्रयते स्तुतं शुभरतं रक्तश्च नम्रो मुदा ॥ ५४ ॥

इति । इदमष्टदलपद्मबन्धनामकं चित्रकाव्यम् । तल्लक्षणं यथा सरस्वतीकण्ठाभरणे " प्राक् कर्णिकां पुनः पर्णे पर्णाग्रं पर्णकर्णिके । प्रतिपर्णं व्रजेद्धीमान् इह त्वष्टदलाम्बुजे " इति ।

५३ । भक्त्येति । स यतिरपि भास्करानन्दोऽपि अस्य भूदेवस्य भक्त्या च गुरून् प्रत्यनुरागविशेषेण च श्रद्धया च शास्त्रार्थे दृढप्रत्ययेन च चकारद्वयं समुच्चयद्योतनार्थं तथा तादृशमतृप्यत् तृप्तो बभूव यथा अमृतवत् स्वादुना मिष्टेन अन्नेन न अतृप्यत् यथा वा अमृतेनापि गङ्गाजलेनापि न अतृप्यत् इत्यर्थः ।

५४ । श्रद्धामस्येति । स्थिरः स्थिरनिश्चयः हेतुविद् हेतुं युक्तिं कारणञ्च वेत्तीति तादृशः तथा एनसः पापात् संसाराद्वा व्यवहितो दूरवर्ती स सूरिः पण्डितो भास्करानन्दः अस्य शौचं पवित्रता प्रियं यस्य तादृशस्य भूदेवस्य भूयसीं अतिशयेन वह्वीं श्रद्धां शास्त्रार्थे दृढप्रत्ययम् अवगतो ज्ञातवान् सन् काञ्चन कामपि अनिर्वचनीयां तुष्टिं तोषं ययौ प्राप एष भूदेवः शङ्करवत् महादेवेन तुल्यं वशिनं जितेन्द्रियं तथा सदा सर्वदा सुसेव्यं सुष्ठु सेवनीयं तथा भक्त्या अनुरागातिशयेन प्रीतं प्रसन्नं तथा स्तुतं प्रशस्तं शुभे मङ्गले रतं तं भास्करानन्दस्वामिनं मुदा आनन्देन नम्रः प्रणतः सन् दाता भूदेवः श्रयते स्म सिषेवे श्रिञ् सेवायामित्यस्य रूपम् । स्मयोगे भूते लट्, रक्तश्च अनुरक्तः सन् एष च इति अन्वयः । एष च चक्रबन्धः कविनामगर्भः अराणां तृतीयेषु वर्णेषु " महेशस्य काव्यम् " इति षड्वर्णाः षष्ठेषु "भूदेवचरितम्" इति षड्वर्णा द्रष्टव्याः । पाठनियमस्तु सरस्वतीकण्ठाभरणे यथा "पुरः पुरो लिखेत् पादान् अत्र त्रीन् षड्वीकृतान् । तुर्यन्तु भ्रमयेत् नेमौ नामाङ्कश्चक्रसंविधिः " इति ।

भूदेवं तत्प्रभृति पितरित्याह्वयन्नादरेण
स्वाम्यस्निह्यत् किमपि नियतं भास्करानन्दनामा ।
भूदेवोऽपि प्रणयपरवांस्तं वकाशे वकाशे
गत्वालापैः कुशलमधुरैस्तोषयामास तुष्यन् ॥ ५५ ॥

इति श्रीमहेशचन्द्रकृतौ भूदेवचरिते काव्ये आनन्दो-
पायो नाम एकविंशः सर्गः ॥

द्वाविंशः सर्गः ।

आनन्दोदयः ।

वह्वमन्यत भूदेवो वालरामं गुरुं यथा ।
भास्करानन्दमपि तं तथैव समभावयत् ॥ १ ॥
वालरामश्च भूदेवं मेने पुत्रमिव प्रियम् ।
तं पुनर्भास्करानन्दः पितरं पर्यकल्पयत् ॥ २ ॥
उद्यानवाटीमामेटीराज्ञ्या भक्त्याभिपूजितः ।
अध्यास्त भास्करानन्दः शिवप्रासादमण्डिताम् ॥ ३ ॥
संश्रितायाः श्रियो लोभात् प्रपन्नैरिव वानरैः ।
दुर्गावाख्या दिशि प्राच्यामदूरायां विभाति या ॥४॥

---

५५ । भूदेवमिति । भास्करानन्दनामा स्वामी तत्प्रभृति तत आरभ्य पितः इति प्रकारेण आदरेण भूदेवमाह्वयन् आकारयन् किमपि कारणम् केनापि कारणेन इत्यर्थः । नियतं नियमयुक्तं यथा स्यात्तथा अस्निह्यत् स्नेहं चकार । प्रणयस्य प्रेम्णः परवान् अधीनः भूदेवोऽपि वकाशे वकाशे आत्मनोऽवसरेऽवसरे तं भास्करानन्दस्वामिनं गत्वा प्राप्य कुशलमधुरैर्मङ्गलप्रायैः मधुरैः मिष्टैः आलापैः कथोपकथनैः स्वयं तुष्यन् प्रीतो भवन् तं तोषयामास अप्रीणयदित्यर्थः ।

१ । समभावयत् आद्रियत ।

३ । आमेटीराज्ञ्या उद्यानवाटीं भास्करानन्दोऽध्यास्त अधिवसति स्म ।

४ । श्रियो भोजनस्थानसम्पदो लोभात् प्रपन्नैरिव शरणागतैरिव वानरैः संश्रिताया आश्रिताया दुर्गावाख्या अदूरायां प्राच्यां पूर्वस्यां दिशि या

अदूरेऽपरतस्तस्या दुर्गाकुण्डाच्च पूर्वतः ।
उद्यानं पुटियाराज्ञ्याः शोभते सौधभूषितम् ॥ ५ ॥
या शरत्सुन्दरी नाम्ना प्रथिता भुवि दानतः ।
तस्या राज्ञ्यास्तदुद्यानं भूदेवोऽध्यवसत्तदा ॥ ६ ॥
भक्त्या शक्त्या च भूदेवस्तया राज्ञ्या समादृतः ।
आमन्त्रितः पितरिति प्रेम्णा मेने स तां सुताम् ॥ ७ ॥
सा शरत्सुन्दरी देवी दुर्गा देवीव सुव्रता ।
भूदेवं पितरं मत्वा सिषेवे गुरुदेववत् ॥ ८ ॥
प्रवासेऽपि निजावासादित्थं भूदेवशर्म्मणा ।
शर्म्माधिकतरं लेभे काशर्म्मे शुभकर्म्मणाम् ॥ ९ ॥
गुंरुणा तेन पित्रेव स्वामिना सूनुनेव च ।
राज्ञ्या स च दुहित्रेव कुटुम्बीवावसद् गृही ॥ १० ॥
आनन्दकानने काश्यां स्निग्धैः परिवृतः स तैः ।
वेदान्तविद्यानन्देन कर्मण्यानन्दमन्वभूत् ॥ ११ ॥
भूदेवो भास्करानन्दं स्वहंस्तेन यथाशयत् ।
भूदेवाय स्वभित्तांशं सोऽप्ययच्छत् तथादरात् ॥ १२ ॥
प्रियोऽभूद् भास्करानन्दो भूदेवस्य न केवलम् ।
कृत्स्नस्यापि तु लोकस्य स आसीत् प्रीतिभाजनम् ॥ १३ ॥
हिन्दोरहिन्दोरथवा धनिनो निर्धनस्य वा ।
सर्वस्यैव प्रियः सोऽभूच्चन्द्रचन्दनशीतलः ॥ १४ ॥
प्रियवादी प्रियध्यायी प्रियकृत् प्रियदर्शनः ।

उद्यानवाटी विभाति अद्यापि शोभते ।

५ । तस्या आमेटीराज्ञ्या उद्यानवाट्या अदूरेऽपरतः पश्चिमभागे दुर्गा-कुण्डाच्च पूर्वस्यां दिशि पुटियाराज्ञ्या उद्यानं शोभते ।

६ । दानतो दानात्, भुवि प्रथिता विख्याता ।

७ । पितः इत्युक्त्वा आमन्त्रितः सम्बुद्ध आहूत इति यावत् । प्रेम्णा स्नेहेन तां राज्ञीं स भूदेवः सुतां दुहितरं मेने ।

१० । गुरुणा आचार्येण बालरामस्वामिना । स्वामिना भास्करानन्देन । राज्ञ्या शरत्सुन्दर्या ।

कस्य न प्रियतामेति निर्द्वन्द्वो निःस्पृहः शमी ॥ १५ ॥
तथाहि विप्रः शूद्रो वा मुसल्मानोऽथवा परः ।
साहेबोऽप्यथवा द्रष्टुं दूरादपि तमासदत् ॥ १६ ॥
देही भवति निर्द्वन्द्वो निष्कामो वा जितेन्द्रियः ।
इत्येतत् कः श्रद्दधाति साक्षाद् यदि न पश्यति ॥ १७ ॥
वेषेण वचसा वाथ सन्ति सन्न्यासिनः शतम् ।
मनसापि तु सन्न्यासी लक्षेष्वेकोऽपि दुर्लभः ॥ १८ ॥
अतस्तं द्रष्टुमाजग्मुर्दूरतोऽपि मनस्विनः ।
आकर्ण्य तस्य माहात्म्यमाप्तेभ्यो विस्मिता इव ॥ १९ ॥
दिदृक्षून् भास्करानन्दोऽप्यदर्शयत सुष्ठु तान् ।
यथायथं सदालापैः सुनृतैरप्यतोषयत् ॥ २० ॥
ये काशीक्षेत्रमाजग्मुर्विश्वेश्वरदिदृक्षया ।
प्रायेण ददृशुस्तत्र ते सर्वे पुण्यदर्शनम् ॥ २१ ॥
यतिं तमालपद् यो यः सकृदप्यवलोकयन् ।
आत्मानं तत्प्रियं मत्वा स एवान्तरकत्थत ॥ २२ ॥
स्वामिनो भास्करानन्दस्याहमेव मतो ध्रुवम् ।
इत्यमन्यत सर्वोऽपि सत्कृतस्तेन साधुना ॥ २३ ॥
साहेबा अपि तं द्रष्टुं महापुरुषमागमन् ।
अतृप्ता दर्शनैस्तस्य जगृहुः प्रतिमामपि ॥ २४ ॥
पश्चिमोत्तरदेशस्य कनीयान् शासकः प्रभुः ।
आसीत् तदा लेफ्टिनेण्टगभर्णर्पदमास्थितः ॥ २५ ॥
स तस्य स्वामिनोऽभ्यासं बद्धाबलिखिताक्षरौ ।

१५। निर्द्वन्द्वः सुखदुःखादिद्वन्द्वरहितः । निस्पृहोऽकामः । शमी शान्तिमान् ।

१७। श्रद्दधाति विश्वसिति ।

१९। आप्तेभ्यः विश्वस्तवाक्येभ्यः ।

२०। अदर्शयत आत्मानं प्रकाशयामास । प्राक्कर्म्मणः कर्त्तृत्वात् आत्मनेपदं दर्शयते भवो भक्तानितिवत् ।

२२। यतिं जितेन्द्रियतं, भास्करानन्दम् । अन्तरकत्थत मनसः श्लाघां चकार ।

२४। प्रतिमां प्रतिकृतिमपि जगृहुः ।

प्रजिघाय महान्तौ द्वौ ग्रन्थावाज्ञापयन्निदम् ॥ २६ ॥
उन्नतां ये समायान्ति स्वामिनं तं दिदृक्षवः ।
स्वं स्वं नाम स्वहस्तेन तत्र लिख्येत तैरिति ॥ २७ ॥
अथैकदा दिदृक्षुस्तं सपत्नीक उपाययौ ।
जेहारेलूं लकहार्द्नामा जङ्गीलाट् इत्युपाधिकः ॥ २८ ॥
पूजयित्वा यथान्यायं पत्न्या सह महामतिः ।
अनिमेष इवापश्यत् तं महापुरुषं प्रभुः ॥ २९ ॥
आत्मानं चात्मपत्नीं च स्थितस्य स्वामिनोऽन्तरा ।
फटोग्राफाख्ययन्त्रेण स तस्यार्चामतोलयत् ॥ ३० ॥
तेन यन्त्रेण बिम्बस्यच्छाया काचेषु गृह्यते ।
काचेभ्यश्चित्रफलकं नीयते द्रव्ययोगतः ॥ ३१ ॥
गृहीत्वा स्वामिनस्तस्य साहेबो भक्तिपूर्वकम् ।
फटोग्राफात्मकं चित्रमगच्छत् स यथायथम् ॥ ३२ ॥
श्रद्धां विलोक्य लोकानां तस्य प्रतिकृतावपि ।
निर्मापयितुमामेर्टाराज्ञी तामुपचक्रमे ॥ ३३ ॥
कारुभिर्भास्करानन्दस्वामिनः प्रतिमामसौ ।
राज्ञी निर्म्मापयामास दिव्यां सितशिलामयीं ॥ ३४ ॥
प्रतिमा भास्करानन्दस्वामिनो मणिमध्यसौ ।
शिवप्रासाद आमेटीराज्ञ्या अद्यापि राजते ॥ ३५ ॥
तस्याः प्रतिकृतेः पीठे पद्यं सद्योऽर्थबोधकम् ।
इदमुत्कीर्णमाभाति भूदेवस्य कवेः कृतिः ॥ ३६ ॥
"जातो ब्रह्मकुले स्वतो हि पवितः पूतः पुनर्विद्यया
ज्ञानेन ज्वलितस्तपोभिरुदितो ब्राह्मं महो मूर्तिमत् ।

२६ । अलिखिताक्षरौ बद्धौ बन्धनं प्रापितौ ग्रन्थौ प्रजिघाय प्रैरयत् ।
२९ । यथान्यायं इंलण्डीयानां न्यायानुसारेण शिरस्त्राणापनयनादिना ।
३० । आत्मानं च आत्मपत्नीं च अन्तरा स्थितस्य आत्मनः आत्मपत्न्याश्च द्वयोर्मध्ये स्थितस्य स्वामिनो भास्करानन्दस्य अर्चां प्रतिकृतिं अतोलयत् उत्थापयामास ।
३३ । तां प्रतिकृतिम् । उपचक्रमे आरेभे ।
३४ । सितशिलामयीं श्वेतप्रस्तरनिर्म्मिताम् ।

भित्त्वा सन्तमसं प्रबोध्य जगतीमानन्दयन् प्राणिनो
ज्ञानप्रेममयोऽर्कचन्द्रमिलितः श्रीभास्करानन्दकः" ॥
येऽपश्यन् भास्करानन्दस्वामिनः प्रतियातनाम् ।
प्रायस्ते वाचयामासुः काव्यं तज्जातकौतुकः ॥ ३७ ॥
काव्यं दिव्यं तदालोक्य तस्य जिज्ञासवः कविम् ।
भूदेवमथ तं ज्ञात्वा मनसा वह्वपूपुजन् ॥ ३८ ॥
भूदेवस्य कवेः काव्यं यतेः प्रतिकृतिश्च सा ।
उभे भातः समुत्कीर्णे शिलायां वज्रलेपवत् ॥ ३९ ॥
विरुद्धयोरपि प्रेमा गृहिसन्न्यासिनोस्तयोः ।
यादृग् बभूव नो तादृग् दृश्यते समयोरपि ॥ ४० ॥
भूदेवस्य तथाह्यास्यं स्वामिनस्तस्य पश्यतः ।
आनन्दपूरः कोऽप्यासीदपर्याप्त इवात्मनि ॥ ४१ ॥
आनन्दे नियमो नास्तीत्युक्तिरव्यभिचारिणी ।
तेनानन्देन हि स्वामी मर्यादामप्यलङ्घयत् ॥ ४२ ॥
कामीव भास्करानन्दस्वामी भूदेवमीक्षितुम् ।
ययौ तदीयमावासं निःस्पृहोऽप्यन्तरान्तरा ॥ ४३ ॥
भूदेवोऽपि तमानन्दं मूर्तिमन्तमिवागतम् ।
स्वामिनं प्रतिजग्राह साग्रहोऽर्चयितुं स्वयम् ॥ ४४ ॥
उपवेश्यासने यत्नात् पादधावनपूर्वकम् ।
पत्नेनेव स्वहस्तेन तमभोजयदुत्तमम् ॥ ४५ ॥
स स्वयं भास्करानन्दं भोजयन् मुमुदे यथा ।
अपि स्वाराज्यलाभेन मन्ये मोदेत नो तथा ॥ ४६ ॥
अमृते ब्राह्मणस्याग्नेर्मुखेऽन्नं जुह्वतामृतम् ।
मेनिरे तेन सर्वेऽपि महायज्ञाः स्वनुष्ठिताः ॥ ४७ ॥

---

३७ । जात इति । पवितः पूतः, विकल्पे इट् । महस्तेजः । सन्तमसं सम्यक् तमः तमोगुणमन्धकारमिव, ज्ञानप्रेममयत्वात् अर्कचन्द्राभ्यां मिलितः ज्ञानमर्कसदृशं प्रेम चन्द्रसदृशमित्यर्थः । प्रतियातनां प्रतिकृतिम् ।

४० । समयोरपि गृहस्थयोः सन्न्यासिनोर्वा ।

४४ । साग्रहः आग्रहेण सह वर्तमानः सनिर्बन्ध इत्यर्थः ।

४७ । ब्राह्मणस्य अग्नेरग्निसदृशस्य अमृते मुखे अमृतं अमृतस्वरूपमन्नं जुह्वता

भूदेवेन स्वयं दत्तस्यान्नस्यापि यथातृपत् ।
देवः परमहंसोऽसावमृतस्यापि नो तथा ॥ ४८ ॥
प्राग्जन्मनोऽनुवृत्तं वा फलं वैदिककर्मणः ।
उत्पन्नं दर्शनादेव तयोः सख्यमभूद् दृढम् ॥ ४९ ॥
तथाहिं भास्करानन्दो भूदेवस्य प्रियस्य सः ।
अपि जानन् शिरःपीडामात्मपीडामिवान्वभूत् ॥५०॥
यदा तु प्राप्तकालोऽसौ भूदेवश्चुँचुड़ापुरे ।
रुग्ण आसीत् तदा स्वामी स काश्यामभवत् स्थितः ॥५१॥
शुश्राव भास्करानन्दो दूरस्थस्यापि तामसौ ।
भूदेवस्य रुजो वार्तां तदीयस्वजनाननात् ॥ ५२ ॥
श्रुत्वा तस्य रुजो वार्तां स स्वाम्यार्त्त इवाब्रवीत् ।
पितरं तमुभौ तत्र शुश्रूषेते सुतौ ध्रुवम् ॥५३॥
विश्वनाथपुरे तत्र यद्यागच्छेत् स पुण्यवान् ।
अपरोऽपि सुतस्तर्हि तं शुश्रूषेत शक्तितः ॥५४॥
आर्तानामुपकारो हि धर्म्मः सन्न्यासिनां महान् ।
विशेषतस्तु महतां तादृशां पुण्यकर्म्मणाम् ॥ ५५ ॥
इति तस्योक्तिमाकर्ण्य भूदेवस्य सुहृज्जनाः ।
गोविन्ददेवं लेखेन तस्याशयमजिज्ञपन् ॥५६॥
स्वामिनस्तमभिप्रायं भूदेवोऽपि विवेद सः ।
वाराणस्यां जिगमिषां तनयावप्यजिज्ञपत् ॥५७॥
स्वामिनो भास्करानन्दस्याभिप्रायमवेत्य तम् ।
अपर्याप्तमिवानन्दं तादृगार्तोऽपि सोऽन्वभूत् ।।५८।।
तदानीं किन्तु भूदेवस्तथासीत् परिदुर्बलः ।

ददता, तथाच "अमृतं नाम यत् सन्तो मन्त्रजिह्वेषु जुह्वति" इति ।

४८ । अन्नस्य अतृपत् अन्नेन तृप्तिं ययौ, "तृप्त्यर्थस्य च" इत्यनेन षष्ठी । अमृतस्यापि अमृतेनापीत्यर्थः ।

५१ । प्राप्तकालः-प्राप्त आसन्नः कालोऽन्तिमकालो यस्य स तादृशः ।

५३ । आर्त इव पीड़ित इव ।

५४ । अपरोऽपि सुतः अहमित्यर्थः ।

५६ । आशयमभिप्रायम् ।

नाशक्यतोच्चलयितुं पदादपि पदं यथा ॥५६॥
अतो गमयितुं काशीं तनयौ तं न शेकतुः ।
अन्येऽपि नान्वमन्यन्त काशीप्रेरणसाहसम् ॥ ६० ॥
तथापि मनसा सद्यो विश्वनाथस्य नन्दनः ।
विश्वनाथपदं काशीं जगामेव समुत्सुकः ॥ ६१ ॥
इत्थं प्रीतिस्तयोरासीद् गृहिसन्न्यासिनोरपि ।
प्रकृत्या वैश्वनाथो हि विश्वं प्रीणयतीन्दुवत् ॥ ६२ ॥
वालरामोऽप्युदासीनस्तस्य शिष्यस्य तैर्गुणैः ।
पक्षपातीव सञ्जज्ञे तनयस्य यथा पिता ॥ ६३ ॥
सिन्धुरिन्द्राविवं स्फीतेनानन्देनामृतेन वा ।
पूर्णोऽपि दृष्टे भूदेवे प्रवभूव स नात्मनि ॥ ६४ ॥
भूदेवमभितः प्रीतो मर्यादामप्यलङ्घत ।
वेलामुल्लङ्घते सिन्धुः स्फीतश्चन्द्रोदयं प्रति ॥ ६५ ॥
सन्न्यासिनस्त्र्यहादूर्ध्वमेकस्य गृहिणो गृहे ।
कदापि न हि तिष्ठन्तीत्येषा तेषां स्थितिः स्थिरा ॥ ६६ ॥
एकदा वालरामस्तु भूदेवस्य निकेतने ।
सन्न्यास्यप्यवसन्मासमागत्य चुँचुड़ापुरे ॥ ६७ ॥
विश्वनाथमठं तत्र भूदेवोऽस्थापयद् यथा ।
आचार्यं वालरामं स तदानीं सन्न्यधापयत् ॥ ६८ ॥
किं न कुर्वन्ति भक्तानां प्रीतयेऽन्यहितव्रताः ।
दधीचिर्देवकार्यार्थं प्राणानपि मुमोच हि ॥ ६९ ॥
तं सन्निधाप्य भूदेवो वालरामं तदग्रतः ।
हासश्रियेव विद्यायाः शुचिमस्थापयन्मठम् ॥ ७० ॥

---

६४ । प्रवभूव नात्मनि—आत्मनि शरीरे न प्रवभूव आनन्दं धर्तुं न समर्थो बभूव ।

६६ । स्थितिर्मर्यादा ।

६८ । मठश्छात्रनिलयः । "मठश्छात्रादिनिलयः" इत्यमरः ।

७० । शुचिं शुभ्रम्, मठं सौधमित्यर्थः । तत्र उत्प्रेक्षा—विद्याया हासश्रिया स्मितशोभया शुचिमिवेत्यर्थः ।

मठे तस्मिन्नुपाध्यायो हरिनाथ इति श्रुतः ।
वेदान्तवागीशोपाधिः समाधिज्ञो न्ययुज्यत ॥ ७१ ॥
वेदान्तविद्यां साङ्ख्यं च योगं पातञ्जलं तथा ।
छात्रानध्यापिपत्तत्र हरिनाथः स पण्डितः ॥ ७२ ॥
दर्शनान्येव गृह्णन्ति तत्र विद्यार्थिभिर्मठे ।
परोक्षं दृश्यते तत्त्वं यैर्दिव्यैरिव लोचनैः ॥ ७३ ॥
दर्शनेष्वपि भूदेव एकं वेदान्तदर्शनम् ।
अमन्यत प्रियतमं द्वयोर्दर्शनयोरपि ॥ ७४ ॥
भूदेवस्य प्रतिनिधिर्हरिनाथो महामनाः ॥
अयच्छदन्तेवासिभ्यो यत्नात्तच्छीलदर्शनम् ॥ ७५ ॥
विश्वनाथचतुष्पाठीत्याख्यां तस्य मठस्य सः ।
भूदेवः पितृपादानां प्रीतये विदधे बुधः ॥ ७६ ॥
विद्यालयानामादर्शो बहूनां स मठोऽभवत् ।
तदादि धनिनोऽन्ये हि मठानस्थापयन् बहून् ॥ ७७ ॥
इति संस्कृतविद्याया ह्रासकालेऽपि तत्र सः ।
पन्थानमभ्युद्धृतये भूदेवः प्रागदर्शयत् ॥ ७८ ॥
अधः पतन्तं सर्वोऽपि हसत्यामोदवानिव ।
न तु कोऽपि तमुद्धर्तुं यतते शक्तिमानपि ॥ ७९ ॥
देववाणीं हि नश्यन्तीं विद्यावन्तोऽपि सज्जनाः ।
मृतेत्युपहसन्त्येव न तु कोऽपि चिकित्सति ॥ ८० ॥
तां भूदेवो मातरं दुर्गतानां
भूदेवानां दिव्यदेवानुभावः ।
नानोपायैर्भूय उज्जीवयिष्यन्
स्थूलामेकां स्थापयामास नीवीम् ॥ ८१ ॥

इति श्रीमहेशचन्द्रकृतौ भूदेवचरिते काव्ये
आनन्दोदयो नाम द्वाविंशः सर्गः ॥

---

७४ । द्वयोर्दर्शनयोः सतोरपि साङ्ख्यपातञ्जलयोर्लोचनयोरिव द्वयोः सतोरपीत्यर्थः

८० । चिकित्सति प्रतिकारं करोति ।

८१ । दुर्गतानां दारिद्राणाम्, भूदेवानां ब्राह्मणानाम् । दिव्यो देवस्येव अनुभावः प्रभावो यस्य सः । नीवीं मूलधनं कोषमित्यर्थः ।

त्रयोविंशः सर्गः ।

(लेख्यम्)

विद्यावदान्यं द्विजराजचूडामणिं यशोभूतिविभूषिताङ्गम् ।
सत्याश्रितं दग्धदुरन्तकामं नमामि भक्त्या पितरं महेशम् ॥ १ ॥
विश्वं किलानित्यमिदं यदीये विभाति कुक्षौ प्रलयेऽप्यखण्डम् ।
नित्यस्य तस्यैव विभोर्विभूतिं नमामि कालं शिरसाऽर्थसिद्ध्यै ॥२॥
भूदेवदेवस्य गुणा जयन्ति प्रशान्तमूर्त्तेर्महनीयकीर्त्तेः ।
श्रीविश्वनाथैकपराणि नित्यं तपोधनज्ञानकुलानि यस्य ॥ ३ ॥
तथा सुपुष्टादभिलाषवीजात् सुसङ्गसेकैर्घृतिशास्त्रशोभः ।
कल्पद्रुभावोऽस्य शिवः पफाल स्वधाम काश्याश्चिरमागतस्य॥४॥
शास्त्रेष्वदीनं च धनेषु दीनं स्वलाभतुष्टं पितरं विचिन्त्य ।
यस्येह बाल्याद्धनिनोऽपि दृष्टौ द्विजे च दीने च दयातिमानौ ॥५॥
दुष्टो हि विप्रो विषयेषु सक्तस्तुपेक्षणीयैश्च न वृत्तिखिन्नः ।
श्रेयांसि खिन्ने नहि जातु विप्रे भवन्ति चैवं य उवाच विद्वान् ॥६॥
नीवीं च लक्षं रजतं सहार्द्धं शुचिस्तदा वेङ्गलवेङ्कनाम्नि ।
कोषे गभर्णमेण्ट कृते निधाय लिलेख तद्वृद्धिभिरेष दानम् ॥७॥

---

४ । तथेति पूर्वसर्गवर्णितेन काशीवासादिपुण्येनेत्यर्थः । अस्य भूदेवस्य । कल्पद्रुभावः कल्पद्रुमत्वम् । काश्याः काशीतीर्थात् । चिराय बहुदिनानन्तरम् । स्वधाम निजगृहं चुँचुड़ायामित्यर्थः । आगतस्येति योजना । पफाल फलवदभूत् कल्पद्रुमत्वमित्यनेनान्वयः ।

५ । सप्तमश्लोके वक्ष्यमाणं दरिद्रचिकित्सायै विप्रपालनाय च नीवीस्थापनं प्रति हेतुमाह शास्त्रेष्विति द्वाभ्याम् ।

६ । विप्रस्य विषयासक्तिं दोषमाह महाभारते दानधर्म्मे "अनर्थो ब्राह्मणस्यैष यद्वित्तनिचयो महान् " इति । ब्राह्मणखेदं च दोषमाह मनुः "यस्य राज्ञस्तु विषये श्रोत्रियः सीदति क्षुधा । तस्यापि तत्क्षुधा राष्ट्रमचिरेणैव सीदति" इति ।

७ । नीवीं मूलधनम् ।

दीनाय शास्त्रज्ञभिषग्वरेण चिरं प्रदातुं गदिने चिकित्साम् ।
मातुः प्रियो ब्रह्ममयीचिकित्सालये स्वदानस्य विधौ व्ययाय ॥८॥
होमीयपेथीभिषजे च तत्र स्थिताय चाल्पैरगदैर्यदीयैः ।
दोषाः कलेर्विष्णुगुणैरिवास्ताः सुचिन्तितैर्व्याधिगणाः समस्ताः॥९
विद्यामठेऽध्यापकसद्द्विजस्य तथेह तच्छात्रगणस्य वृत्त्यै ।
स्थित्यै च तेषां नगरे व्ययाय पितुर्मुदे धामनि विष्णुमूर्त्तेः ॥१०॥
(कुलकम्)
बुधोदयं मुद्रणयन्त्रमेकमायं च यन्त्रस्य ततोऽपि भाव्यम् ।
अमूं च लाभं सममेडुकेशन् गेजेटपत्रस्य युयोज लेख्ये ॥ ११ ॥
वर्षाणि जीवेयमितः सहस्रं तदाधिगन्तास्मि नु पाठपारम् ।
इत्थं पठित्वापि बहूनि शास्त्राण्यचिन्तयद् बन्धुषु योऽवदच्च ॥१२॥

इंग्लिश् गिरा भेषजयोगयुक्तान्
स मुद्रितान् शास्त्रमयांश्च तस्मात् ।
ग्रन्थान् स्वतृप्त्यै सुचिकित्सितज्ञो
ददौ बहून् ज्ञानसमृद्धिकामः ॥ १३ ॥ (युग्मकम्)

मूल्यं च येषां निरधारयत् स सहस्रमुद्रा दश तेन सर्वैः ।
एकीकृतैः षष्टिसहस्रसंख्यं द्विजस्तु लक्षं च चकार दानम् ॥ १४ ॥
अध्यापकच्छात्रगणाय वृत्तिं ददौ तथा भारतवर्षमध्ये ।
ओड्रेषुथो वङ्गविहारचक्रे विचिन्त्य देयां स तु तामियेष॥ १५ ॥

---

९ । सुचिन्तितैर्ध्यातैरल्पैरपि विष्णुगुणैर्हरिकथाभिर्यथा कलेर्दोषाः समस्ता एव अस्ता दूरीकृता भवन्ति तथाहि भागवते "पुंसां कलिकृतान् दोषान् द्रव्यदेशात्मसम्भवान् । सर्वान् हरति चित्तस्थो भगवान् पुरुषोत्तमः" इत्यादि । तद्वत् यदीयैर्होमीयपेथीचिकित्सकीयैरल्पैः क्षुद्रैः सूक्ष्मतमलक्ष-प्रभृतिमात्रैर्वा सुचिन्तितैः सुव्यवस्थितैः अगदैरौषधैः समस्ता मिलिता अपि व्याधिगणा बहून्यपि लक्षणानि अस्ता दूरीकृता भवन्तीत्यन्वयः ।

११ । एडुकेशन्गेजेटपत्रस्य दानं च पूर्वमेव कविना १७ सर्गे ३२,३३,३४ श्लोकैर्लिखितम् ।

१२ । परश्लोकेन वक्ष्यमाणं ग्रन्थदानं प्रति हेतुमाह वर्षाणीति ।

१३ । स्वतृप्त्यै इह लोकेऽतृप्तः परलोकादपि वीक्ष्य तृप्तिं प्राप्नोतीत्यभिप्रायः ।

विप्रस्य विप्रो गतिरेष वादो द्विजैकदेवेऽजनि सत्य इत्थम् ।
हाहा कलौ ब्राह्मणपण्डितानां दशा न का वा परिदृश्यतेऽद्य ॥१६॥
बुद्धिः कृशा धर्म्मपरा द्विजास्तु सदा रताः कर्म्मसु शीतकम्पाः ।
शोके भये यान्ति हरिं शरण्यं निपीड़िता नैव निपीड़यन्ति ॥१७॥
ते चापि नेतारमपेक्षमाणाः सुखस्य सर्वस्य पुनस्तु काले ।
ध्यानैकगम्यं पुरुषं तमेकं प्रपूजयन्तीह रहो विशुद्धाः ॥ १८ ॥
भूदेवशर्म्मापि कलिं स विद्वानलङ्घनीयं समलङ्घयच्च ।

नित्यं नमन् पादयुगं स्वपित्रो-
श्चतुःसहस्रं च जपन् स्वजप्यम् ॥ १९ ॥
योऽमन्यत ब्राह्मणपण्डितांस्तान्
सुखैकहेतून् महदाशयांश्च ।
धर्म्मार्जितैर्येऽल्पधनैर्हि तुष्टाः
सदा गृहिभ्यः शुभमादिशन्ति ॥ २० ॥
यैर्वर्द्धितैर्वृद्धिरिहार्यदेश्या
पुनर्भवेत् त्यागधनैर्द्विजाग्र्यैः ।
धर्म्म्या तपोवीर्यधनाभिरक्षा
यशःसुखज्ञानमयीति चैव ॥ २१ ॥ (युग्मकम्)

दत्त्वा न योऽश्लाघत चाह पृष्टो द्विजैर्गृहीतं कृपयास्मि धन्यः ।
विश्वस्थितं सर्वमिदं हि येषां प्रदेयमेभ्यः किमु वा मयेति ॥२२॥

---

२१ । यैरिति । त्यागः परसुखचिन्तया दैवपैत्रतोषणं विषयेष्वनासङ्गश्च धनं वित्तं येषां तादृशैर्वर्द्धितैर्वृत्तिदानादिना पोषितैर्द्विजाग्र्यैरेवेह भारते तपोमयी ब्राह्मणकृता, वीर्यमयी क्षत्रकृता, धनाभिरक्षामयी कृषिवाणिज्यादिभिर्वैश्यकृता, अविशेषात् यशःसुखज्ञानमयी, अतएव धर्म्म्या न्यायधर्म्मोपेता वेदादिविहिता च वृद्धिः पुनर्भवेदिति चैवामन्यतेति पूर्वश्लोकोक्तेनान्वयः । "ब्रह्मवृक्षो रक्ष्यमाणो मधु हेम च वर्षति । अरक्ष्यमाणः सततमश्रु पापं च वर्षति" इति महाभारतोक्तेः ।

२२ । यो भूदेवो दत्त्वा नाश्लाघत, पृष्टः दानानन्तरं दानविषय इत्यर्थः द्विजः कृपया गृहीतं धन्योऽस्मि, येषां द्विजानामिदं विश्वस्थितं सर्वं भवति " सर्वस्वं ब्राह्मणस्येदं यत् किञ्चिज्जगतीगतं " इति मनूक्तेरित्यर्थः, एभ्यः किंवा मया प्रदेयमस्तीत्याह । उ प्रश्ने ।

सम्पादनायास्य विधेः स लेख्ये ततः षडाप्तान् विदुषो न्ययुङ्क्त ।
गोविन्ददेवं च मुकुन्ददेवं व्यधात् प्रधानौ तनयौ च येषु ॥२३॥
एभिर्नियुक्तैः पुनरेष चाप्तैर्विधिः शिवो लेख्यकृतः स पाल्यः ।
सम्पादयित्री चिरमेवमेषा सभाप्तपूर्णेति लिलेख दाता ॥२४॥
धन्यास्त आप्ताः सुधियो गुणाढ्या गुणैकलुब्धाः सदृशाः सभायः ।
संस्थापितः प्रत्यय एष येषु तथा गुणाढ्येन महात्मना च ॥ २५ ॥
मूलस्य वृद्धिर्विहिता च नित्यं क्षयश्च मूलस्य बुधेन रुद्धः ।
वित्तेशवित्तान्यपि यान्ति नाशमवृद्धिपूर्वं व्ययितानि काले ॥२६॥
एवं विवेकी स नियोज्य पुत्रौ धनं च बन्धूंश्च तदाप शान्तिम् ।
बाल्येऽधिगच्छन् खलु शास्त्रसारं परांबुपास्यौ पितराविहेति ॥२७॥
स्वर्गः पिता पालक एष विष्णुस्तपः पिता सृष्टिकरः शिवश्च ।
कायस्य वाचो मनसश्च नित्यं तदर्पणं यत् स हि धर्म्म एकः ॥२८॥
नानार्यधर्म्मी न च कापि नारी विहीनधर्म्मो न च कश्चिदत्र ।
सभ्यः सभायां भविता कदाचिन्ममाप्तमय्यामिति सोऽलिखच्च ॥२९॥
धीरोऽर्थयामास बुधश्चिराय कृपासुदृष्ट्यै स गभर्णमेण्टम् ।
क्षीणानि रक्षिष्यति नाम काले स एव मल्लेख्यकृतानि चेति ॥३०॥
क्षेमाय राजानमयाचतासौ सुतांश्च बन्धूंश्च नियोज्य योग्यान् ।
यादृक् तपोयागपरांश्च धीरा अदृष्टभूतं प्रतिभूं महेशम् ॥ ३१ ॥
सम्पाद्य लेख्यं निजनामचिह्नैर्दृढं स्वपुण्यैः सुदृढीचकार ।

---

२४ । एभिरिति । एभिराप्तैः यान् षडाप्तान् विदुषो न्ययुङ्क्त तैरेवाप्तैर्गोविन्ददेवादिभिरित्यर्थः । पुनर्नियुक्तैराप्तैरपि गोविन्ददेवादिभिन्नैरपि स एव लेख्यकृतो विधिः पाल्यः । आप्तपूर्णा सभा (ट्रष्टकमिटि) एवमेव सम्पादयित्री विधीनितिशेषः । इति दाता भूदेवो लिलेख ।

२८ । तथाहि ब्रह्मपुराणं (पितॄन् प्रति) "ब्रह्मा विष्णुश्च रुद्रश्च भवतामधिपूरुषाः" इति २२९ अध्याये ।

२९ । ममाप्तमय्यां सभायां अनार्यधर्म्मी न सभ्यो भविता । न नारी, नच कश्चिद्विहीनधर्म्मो वा सभ्यो भविता इति च इत्यपि स भूदेवोऽलिखच्च ।

३० । काले क्षीणानि आप्तैरसंपादितानि मल्लेख्यकृतानि स गभर्णमेण्ट एव रक्षिष्यति इति च स गभर्णमेण्टं कृपासुदृष्ट्यै अयाचतेत्यन्वयः ।

पौषे त्रयोविंशतिमे शकाब्दे स वाणभूमीवसुचन्द्रमाने ॥ ३२ ॥
रेजेघ्रिसंज्ञे च निवेद्य राज्ञः पुनर्गृहे चातिदृढ़ीचकार ।
वैगुण्यमिच्छन्ति कुतोऽपि चाल्पं न लोकशिक्षार्थमिहावतीर्णाः ॥३३॥
भूदेवकर्मार्जितमानपुण्या मनस्विनो मानधनास्तु सर्वे ।
आत्ता धिया तां च धुरं वहन्ति धरां भुजङ्गाः शिरसेव नित्यम् ॥३४॥

हरिहरविधिबुद्ध्या विश्वनाथे परेशे
विगतनिखिलभेदो ब्रह्ममय्यां च बुद्ध्या ।
कमपि स परितोषं प्राप योगीव साधु-
र्निहितविमलदृष्टिर्ब्रह्मणि ब्राह्मणे च ॥ ३५ ।

इति श्रीसारदाचन्द्रकृतौ भूदेवचरिते काव्ये लेख्यं नाम
त्रयोविंशः सर्गः ॥

चतुर्विंशः सर्गः ।
(समाप्तिः)

भूदेवकर्म्मभिरथं क्रमशो मनस्वी
भूदेव एष विरराज रुजा कृशोऽपि ।
हालाहलाङ्कविकृतिं हि गले दधानः
पूज्यः सदा भुवनभीतिहरो हरोऽसौ ॥ १ ॥

रुग्णैः परिश्रमवशादपि खिन्नखिन्नै-
रङ्गैरखिन्नमनसा जनशिक्षकोऽसौ ।
कर्म्मस्ववर्त्तत परार्पितसर्वकर्म्मा
विद्वांश्चिरं प्रकृतिजातगुणैर्महात्मा ॥ २ ॥

---

३२ । १८१५ एतच्छकीयाब्दे ।·अङ्कस्य गतेर्वामत्वादित्यर्थः ।

१ । यथा समुद्रमन्थनकाले हालाहलं पीत्वा गलेन विकृतस्यापि हालाहलोत्पाद्य-मायाया भीतेर्भुवनरक्षाकारित्वात् हरस्य पूज्यत्वमेव तथा विप्ररक्षापरत्वात् रुजा कृशस्यापि भूदेवस्य शोभैवाभूदिति भावः ।

२ । परेषु स्वेतरेषु गोविन्ददेवादिषु षड़ाप्तेषु परस्मिन् ब्रह्मणि च सर्वाणि कर्म्माणि लेख्यविहितानि दानादीनीत्यर्थः, अर्पयित्वापि कर्म्मसु दाना-दिष्वेव भूदेवो रतो बभूव । तत्र हेतुमाह प्रकृतिजातगुणैरिति । त्यक्तस-कलकार्यस्य तस्य जनशिक्षायै कर्म्मस्वेव स्थितिर्नासक्तिहेतुरित्यर्थः ।

सम्पत्तये स्वयमयं स्वविधेस्तदानीं
दानीयविप्रवरणेऽपि च दानकार्ये ।
आदानशिक्षयत मानमगर्वभावं
याच्ञाविडम्बनमृतेऽपि च वृत्तिदानम् ॥ ३ ॥
भिक्षार्थिवृन्दसमहूतिमवेत्य वृत्तिं
तां वार्षिकीं नृपगृहे विजहौ पितेति ।
दत्त्वापि नासहत दानवचो द्विजेभ्यः
स्वेषां स्वतोग्रहणमेव स भाषमाणः ॥ ४ ॥
कालात् कृशोऽपि विनयः स परार्थजन्मा
भूदेवमाप शरणं कलितापनाशी ।
अस्माद् द्विजांश्च पितरौ च गुरुं तथासौ
मेने परार्थघटकान् परसौख्यहेतून् ॥ ५ ॥
शास्त्रोदितं दृढतया चिरमेष कुर्वन्
दुःखे सुखे च मनसा च गिरा च तन्वा ।
ग्रन्थे लिलेख विनयी निजवंशजेभ्यः

"त्यक्त्वा कर्म्मफलासङ्गं नित्यतृप्तो निराश्रयः । कर्म्मण्यभिप्रवृत्तोऽपि नैव किञ्चित् करोति सः" इति, "नहि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत् । कार्यते ह्यवशः कर्म्म सर्वः प्रकृतिजैर्गुणैः" इति च गीतोक्तेः ।

३ । मानं द्विजानामित्यर्थः । अगर्वभावं, याचनं विनैव दानं चाशिक्षयत । लेख्ये हि ब्राह्मणेभ्यो वृत्तिः प्रेरणेन देया, अन्विष्य च दानपात्रं स्थिरीकर्त्तव्यमिति नियमं विहितवान् ।

४ । प्रार्थनां विना प्रेरणे हेतुमाह भिक्षेत्यादि । षष्ठसर्गस्य त्रयोविंशश्लोकात् त्रिंशच्छ्लोकपर्यन्तं द्रष्टव्यं, तस्मादेव दत्त्वापि स दानवचो मया दत्तमिति नासहत, अपितु "सर्वस्वं ब्राह्मणस्येदं यत् किञ्चिज्जगतीगतम्" इति मनूक्तेर्दत्त्वापि भूदेवा ब्राह्मणधनानि ब्राह्मणेनैव गृहीतमित्यभाषत ।

५ । योऽयं कलितापनाशी विनयस्तस्य परार्थात् परहितसाधनादेव जन्म यस्य, स च विनयः कालात् कालवशात् कृशोऽपि भूदेवं स्वरक्षितारमाप । यतः स पूज्यान् सकलानेव न तु ब्राह्मणान् पितरं मातरं गुरुं मन्त्रदातारं वा निजसुखहेतून् अतएव आज्ञापरवशान् धनवशान् वा मेने ।

प्राकाशयच्च निखिलं निजदेशजेभ्यः ॥ ६ ॥
आचारमार्यचरितं प्रतिपालयन्त-
स्तेनैव नैव चरितार्थधियो यदि स्युः ।
भूदेववत् स्वतनयेष्विव देशजेषु
विप्राः प्रचारनियताः सुदृढं यदि स्युः ॥ ७ ॥
मन्दीभवेत् कथमहो नु नदी तदा स
वर्णाश्रमाश्रयसुखैकजलाप्यदृष्टा ।
या क्षालयन्त्यखिलदेशमलानि काले
रेजे द्विजोभयतटा द्विजनौप्रगम्या ॥ ८ ॥
प्रत्यूषसि प्रतिदिनं प्रियभक्तपौत्र-
दौहित्रबालनिवहैरनुगम्यमानः ।
रेजे चयन् कुसुममेष करण्डिकायां
स्निग्धः कृशोऽपि परदैवतसक्तचेताः ॥ ९ ॥
नित्यं समर्च्य मुमुदेऽथ परं निजेष्टं
बालेष्वदाच्च तिलकं निभृतं स्थितेषु ।
तुष्टाव दुःखशमनाय जगद्धिताय
भक्त्यैकदा तु परया गलदश्रु देवः ॥ १० ॥
मातर्नमन्नभयदे चरणाब्जयोस्ते
याचेऽर्दितेन मनसा ग्रहिलः सुतोऽहम् ।
स्वल्पायुषोऽन्नरहितानिह दुःखभाज-

६ । नायं शास्त्रीयानाचारान् केवलं स्वयं पालितवान् अपि तु स्ववंशजेभ्यः पुत्रपौत्रदौहित्रादिभ्यश्च ग्रन्थेषु तानेवाचारान् लिलेख, देशवासिभ्यश्च मुद्रणेन तानाचारान् प्राकाशयच्च ।

७,८ । युग्मकम् । भूदेवो यथा न केवलमात्मना सदाचारमपालयत् पुत्रादिभिरपि तथैवाकारयत्, देशजैरपि तदेव कारयितुं यतमानः सदाचारमयं ग्रन्थं प्रणिनाय तथा यदि सर्व एव सदाचारपालनपरा अपि विप्राः तन्मात्रैरतुष्टा देशजेष्वपि सदाचारप्रचारायायतिष्यन्त तदा वर्णाश्रमधर्म्मो न मन्दतामयास्यदित्यभिप्रायः ।

१० । तुष्टावेति निजेष्टमित्यनेनान्वयः । निभृतं निःशब्दं स्थितेषु बालेषु पौत्रादिषु तिलकमदात् ।

स्त्वद्भक्तिहीनमनसश्च जनान् समीक्ष्य ॥ ११ ॥
आजन्मनो यमभये पतितेऽपि जाने
त्वां ब्रह्ममय्यखिलदुःखशमैकहेतुं ।
संपोषणे विनयनेऽपि च विश्वनाथं
शौचे तथा सुरधुनीं मम सर्वदात्रीम् ॥ १२ ॥
त्वं ब्रह्ममय्यसि भुवेशि महेश्वरी त्वं
माता ममासि सततं बहुनेत्रहस्ता ।
त्वं मे पितासि परमेशि महेश एष
एकस्त्वमेव बहुधाऽसि च विश्वनाथः ॥ १३ ॥
धर्म्मे तवैव परमे परमेशि सृष्टे
कर्म्मप्रवृद्धिपरया नियतं प्रणत्या ।
प्राप्तैकधर्म्मसुखिताहृतसर्वभेदाः
सन्तः शुभप्रदधियः पुनरेव सन्तु ॥ १४ ॥
आकर्ण्यतां प्रतिदिनं सुरलोकयार्यां
वेदः पुनः शुभमयो हृतसर्वपापः ।
विप्रैः परार्थघटकैश्च तपःपरैश्च
स्वर्गेशपूजितपदैः पठितः सुवाग्भिः ॥ १५ ॥
त्वद्गौरवे सततमस्तु च शुद्धबुद्धि-

---

११ । ग्रहिलो निर्बन्धवान् । तादृशान् त्वद्भक्तिहीनमनसोऽतएवान्नरहितान् दुःखभाजः स्वल्पायुषो जनान् समीक्ष्य अर्दितेन मनसा युक्तोऽहं याचे त्वां मातरमित्यनेनान्वयः ।

१३ । ब्रह्ममयी भगवती भूदेवमाता च, विश्वनाथो भगवान् भूदेवपिता च, महेश्वरी भगवती कवेरस्य जननी च, महेशश्च भगवान् कवेः पिता च । तौ जगत्पितरौ यथा पित्रोरभेदेन भूदेवेन स्तुतौ कविनापि तथैव स्तुतौ ।

१४ । स्वत्सृष्टेन प्राप्तेनैकेन धर्म्मेण, "चातुर्वर्ण्यं मया सृष्टं गुणकर्म्मविभागशः" इत्युक्तेश्चातुर्वर्ण्यधर्मस्य भगवत्सृष्टत्वादित्यर्थः । सुखितया सुखेन, हृता नष्टाः सर्वे भेदा दुःखहेतवो येषामत एव सन्तः शुभप्रदा धीर्येषां तादृशाः सन्तु ।

स्तस्याश्च संसृतिविधौ पुनरेव सिद्धिः।
विज्ञानमानमुदिताः पुनरेव सन्तो
ज्ञानेन ते चरणलग्नधियश्च सन्तु ॥ १६ ॥

मत्या महेश तनयस्य कदाप्यमत्या
त्वत्पादसंश्रितमतेस्तव सेवकस्य।
यच्चिन्तितं च वचनं च कृतं च तानि
त्वत्प्रीतये त्वयि भवन्तु समर्पितानि ॥१७॥

एवं स्तुवन् समधिया तनयार्द्रमूर्त्ति
गङ्गोर्म्मिपाणिकलनष्टभयस्तदानीम्।
आत्मानमात्मनि निवेद्य च विश्वनाथे
नत्वा च निर्वृतिमसौ परमामवाप ॥१८॥

क्षीणं कलौ सगुणमार्यकृतं स देधो
गार्हस्थ्यधर्म्ममुपदेष्टुमिहावतीर्णः।
भोगानुपार्ज्य विधिनाऽप्यनुभूय सर्वान्
काले निवेश्य तनये विरराम तेभ्यः ॥१९॥

धन्यः स एव भुवि यस्य खलु त्रिवर्गो
नान्योन्यमाप परमेशपरो विरोधम्।
धर्म्मार्थकामगतिरस्य हि सेविता सा
प्रायो निदर्शनमिहाद्य तनोत्यपापम् ॥२०॥

१६। त्वद्गौरवे विषये सतां सततम् शुद्धबुद्धिरस्तु। तस्याः शुद्धबुद्धेश्च संसारकर्म्मसु पुनरेव च पूर्ववदित्याशयः, सिद्धिरस्तु। तस्या इति पञ्चमी विभक्तिः।

१७। हे महेश! महादेव! पितरित्यर्थः। त्वत्पादसंश्रितमतेस्तव सेवकस्य तनयस्य ममेत्यर्थः। कदापि मत्या ज्ञानेनामत्याज्ञानेन वा यच्चिन्तितं चिन्ता वचनं कृतं कर्म्म च मानसवाचिककायिकरूपाणीत्यर्थः, तानि तवैव प्रीतये त्वयि समर्पितानि सन्तु।

१८। तनये भूदेवे आर्द्रा जलमयी स्नेहमयी च या गङ्गा तस्या ऊर्मिः पाणि-रिव तेन कलेन मधुरेण शब्देन च नष्टं भयं यस्य तादृशः सन्।

२०। पूर्वार्द्धकथितं धन्यत्वमेव प्रमाणयति धर्म्मार्थेत्यादिना। हि शब्दः समर्थनाय। अस्य भूदेवस्य सेविता सा प्रसिद्धा धर्म्मार्थकामगतिरद्य

व्याधिः प्रपीड्य ववृधे निजमेव गेहं
देहं श्रमातिशयलब्धपदोऽथ पूर्वम्।
प्रीतिः परामलघयन् निजजन्मभूमौ
धर्म्मेऽस्य नित्यचरिते च परार्थपूते ॥२१॥
क्षीणस्तदा तु सततं शयनाश्रयेण
देहेन पापरहितेन शुभक्रियाभिः।
पुत्रादिभिः प्रियतमैरनुसेवितोऽसौ
संपीड़ितोऽपि मनसा मुमुदे जपन् स्वम् ॥२२॥
तं द्रष्टुमागतवतोऽनुदिनं हि बन्धून्
विप्रांश्च पूज्यचरणान् सुधियः सखींश्च।
स्नेहाशिषा प्रणतिभिः प्रियभाषणैश्च
शय्यां गतः कृशतनुः समभावयत् सः ॥२३॥
मृत्योरभीतिमथ धैर्यमतुल्यमन्यैः
स्नेहं परं नु तनयादिषु वा स्तुमोऽस्य।
यश्चिन्तयन्निजगतिं चरमां सुतादीन्
गङ्गां दिदृक्षुरदिशद्वहनं निजस्य ॥ २४ ॥
गङ्गोर्मिदर्शनमरुत्परिभोगयोग्ये
पर्यङ्कशायिततनुं प्रघणे नयन्तः।
निम्ने च सौधशिरसोऽनुदिनं सुताद्या
अभ्यासमन्तवहनाय नु कारितास्ते ॥ २५ ॥

परलोकं गतेऽपि तस्मिन्नित्यर्थः, इह प्रायो बाहुल्येन साधुष्वित्यर्थः, निदर्शनं विस्तारयति। ततः स एव धन्य इत्यनेनान्वयः।

२१। व्याधेः खलत्वं दर्शयति व्याधिरिति। जाल्मो यथा शाखायामुपविष्टस्तामेव चाञ्चल्याच्छिनत्ति तथा व्याधिरपि निजगेहभूतं भूदेवदेहं प्रपीड्य ववृधे बलं प्रकाशितवानिति भावः।

२४। चरमामन्त्यां निजगतिं चिन्तयन् स्थिरीकुर्वन् यो भूदेवो गङ्गां दिदृक्षुः सन् निजस्य स्वस्य वहनं गङ्गायामित्यर्थः। सुतादीन् अदिशत्। दिशधातुरर्थत्वाद् द्विकर्म्मकत्वम्। तत्र कारणानि अनुमीय स्तौति मृत्योरित्यादिना पूर्वार्द्धेन।

२५। पुत्रादिषु स्नेहमेव दर्शयति गङ्गेत्यादिभिः। अनुदिनं सौधशिरसो गङ्गो-

सद्भिः सदा परिवृतो युववृद्धबालै-
र्देवः सुताभिरपि तत्सुतकन्यकाभिः[1]।
पौत्रैः पितामहपरैश्च तथा सुताभ्यां
गङ्गोर्मिभिश्च मुमुदे परिसेवितोऽसौ ॥ २६ ॥
पञ्चाननोपममथाखिलशास्त्रवादे
दीप्त्या च सत्यपरयैव समुल्लसन्तम् ।
पञ्चाननं परगुरुं क्षितिदेवतानां
शुश्राव वीक्षितुमुपागतमेकदा तम् ॥ २७ ॥
यस्तर्करत्न इति गौरवमण्डितात्मा
सच्छिष्यपोषणरतः स्मितपूर्वभाषी ।
तर्केषु कर्कशमतिश्च कविश्च दान्तो
ग्रामं विभूषयति योऽपि च भट्टपल्लीम् ॥ २८ ॥
तत्रासनं श्रितवताथ समर्चितेन
संप्रार्थितेन मृतिमस्य विजानता च ।
धीरेण तेन कविना स परं सुसत्यं
धीरः क्रमेण कथया रहसि प्रतीतः ॥ २६ ॥
रोगस्य चाप्रशममाशु निजस्य बुद्ध्वा
स्वीये निवापसमये बुधविप्रहूत्यै ।
गङ्गाप्रसूजनकनाम मुदा प्रयोज्य
श्लोकं त्विमं व्यरचयन्मधुरं सहार्द्रम् ॥ ३० ॥
"भूदेवस्य सपर्ययैव जगतः शस्तं सदा विश्वसन्
यो वाल्यात् प्रवयाः सभक्ति सततं भूदेवपूजारतः ।
एकब्रह्मधिया परोपकरणं जातं यदीयं व्रतं
ध्यात्वा ब्रह्ममयीं प्रसूं स्वजनकं तं विश्वनाथं चिरम् ॥ ३१ ॥
गङ्गातीरतरङ्गसङ्गततनुर्गङ्गाकणाहारिणा
पूतात्मा पवनेन युक्त इव स त्यक्त्वा तनूं स्वर्गतः " ।
याते स्वपुण्यसुलभं शुभलोकमस्मिन्

---

[1] र्मिदर्शनयोग्ये गङ्गामरुत्परिभोगयोग्ये च प्रघणे वहिर्द्वारप्रकोष्ठे नयन्तः सुताद्या अन्तर्वहनाय गङ्गाप्राप्त्यै वहनाय अभ्यासं कारिता नु भूदेवेनेति शेषः । नुशब्दः प्रश्ने वितर्के वा ।

विद्वन्निमन्त्रणविधौ प्रथमे निवापे ।
सम्पूरितौ सुतयुगेन पितुर्मतेन,
श्रीनकरत्नकविना ननु यौ तदेवम् ॥ ३३ ॥
"तातो नः सद् पत्य साधुहृदयैः साध्यं तदीयादिमं
कृत्यं भावि गुरौदिने वृषगते भूमीन्दुमाने बुधैः" ॥ ३२ ॥

गङ्गाभिषेकपरिपूतजनं स मासं
तं वासरं च परिवीक्ष्य पवित्रचेताः ।
धन्यो रसेन्दुवसुचन्द्रमिते शकाब्दे
ज्यैष्ठस्य चादिमदिने परमेशलीनः ॥ ३४ ॥
सञ्जीव्य सप्ततितमाः शरदो गृहस्थः
कायेन कर्मपरमेण पराश्रितात्मा ।
त्यक्त्वैनमेव कृतकृत्यमथातिभारं
विष्णोः पदं परमशाश्वतमूर्ध्वमाप ॥ ३५ ॥
भूदेवनिर्वाणतमःपरीता
वैधेयविद्वद्गुरुवृद्धवर्गाः ।
सर्वे रुदन्तः विदिशो दिशोऽपि
हाहेति वार्त्ताविहगव्रजावैः ॥ ३६ ॥

ज्ञात्वा तदास्य निर्वाणं ज्वलपत्रहृदस्तौ सुहृत् ।
इंलगडस्थोऽपि हृज् मन् प्राद् वार्त्तापत्रे लिखन्निदम् ॥३७॥
"भूदेवं पुण्यलोकप्रगतमपि चिरं हन्त पश्यामि दीर्घं
शुभ्राङ्गं शुभ्रवेशं प्रणयपरतया चक्षुषोदारमूर्त्तिम् ।
यानेऽह्नीवाद्य जाने परिचयममुना प्रेमबन्धं च सोऽहं
हित्वाहो भारतं तं नियतमिह वसन् दीर्घकालानपीत्थम् ॥३८॥

वाचा संलापिनं नित्यभावगाम्भीर्यपूतया ।
पश्याम्यहो प्रियसखं तं वर्णगुरुयोग्यया" ॥ ३६ ॥
भूदेवमानसदृशेऽथ कृते निवापे
बुद्धया तदा च विनयेन पितुः समाभ्याम् ।
दानेन मानसहितेन तदात्मजाभ्यां
सम्पूजितः कविरगायदिदं च मुग्धः ॥ ४० ॥
आत्मानं विश्वनाथस्य भूदेवं योगिनं गुरुम् ।
शास्त्रयोनिं महासत्त्वं ब्रह्मज्ञं नौमि कर्मिणम् ॥ ४१ ॥
लोकान् विनेतुमखिलान् किमु कोऽपि देवो

भूदेव इत्यवततार भुवीह भूयः ।
त्रिस्रोतसोऽपरतटे चुँचुड़ापुरे य-
स्त्रिस्रोतसं पृथगिवातनुत त्रिवर्गम् ॥ ४२ ॥

राजानो राजवल्ला कति कति धनिनः सन्ति देशे विदेशे
तेषां मध्ये कियन्तो ददति धनमियद्देवभाषोदयार्थे ।
भूदेवो भूमिदेनो नतु धरणिपतिर्नापि वा तस्य तुल्यो
यावत् स स्थूललदयो व्यतरदिह धनं स्वार्जितं पुण्यकर्मा ॥४३॥

विद्यामस्य किमुन्नतां किमथवा स्फीतां प्रदानस्पृहां
किं वा स्तौमि परोपकारपरतां किं वा विशुद्धां धियम् ।
कारुण्यं किमु किं गिरं मधुकिरं किं वाथ भक्तिं गुरौ
मन्येऽन्योन्यजिगीषवो गुणवतः सर्वेऽपि तुल्या गुणाः ॥ ४४ ॥

हंसालीहारपुष्पाञ्जलिरुचिररुचिर्दानकीर्त्तिर्यदीया
सर्वेणोद्ह्यमानाऽप्यवनतशिरसा ब्रह्मसिन्धुं व्रजन्ती ।
मां त्वामन्यांश्च लोकानमृतलहरिभिर्लीलया त्रीन् पुनाना
पावन्यच्छिन्नधारा वहति शतमुखी जाह्नवीव द्वितीया ॥ ४५ ॥

स्रस्तो गङ्गाप्रवाहः शिशिरयति धरामीशमौलेः किमेष
स्वर्गात् पीयूषधारा त्वरति किमथवा स्वर्गिणां पीतशेषः ।
किं वा श्च्योतन्ति कल्पद्रुमकुसुमरसास्तुण्डतः षट्पदाना-
मित्थं नाना विकल्पान् विदधतु कवयो यस्य कीर्त्यां विमुग्धाः॥४६॥

हन्त गङ्गाजले पङ्कः कलङ्कश्चन्द्रमण्डले ।
छिद्रं मुक्ताफले क्वास्ति भूदेवयशसस्तुला ॥ ४७ ॥

इति श्रीशारदाचन्द्रकृतौ भूदेवचरिते चतुर्विंशः सर्गः ॥

अथ कवेर्वंशो वर्ण्यते ।

पञ्चगोत्राः पुरा पञ्च विप्रा दीप्रा मखेऽग्निवत् ।
आनिन्यिरे कान्यकुब्जादादिशूरेण सूरयः ॥ १ ॥
वाक्सिद्धाः सिद्धकर्म्माणः साग्निकाः पङ्क्तिपावनाः ।
वेदवेदान्तवेदाङ्गन्यायस्मृतिविचक्षणाः ॥ २ ॥
ते तु गोत्रेण शाण्डिल्यो नारायण इति श्रुतः ।
वात्स्यो धराधरः श्रीमान् सावर्णश्च पराशरः ॥ ३ ॥

काश्यपश्च सुशेणाख्यो भारद्वाजश्च गौतमः ।
गौड़ेन्द्रेणार्च्चितास्तेन गौड़े वासमरोचयन् ॥ ४ ॥
तेषु पञ्चसु गोत्रेषु पञ्चानां ब्रह्मवादिनाम् ।
पुत्रपौत्रादयस्तेषां कालेन बहवोऽभवन् ॥ ५ ॥
कुलीनास्ते वरेन्द्रेषु राढ़ासु च निवासतः ।
वारेन्द्रा इति कथ्यन्ते राढ़ीया इति च क्रमात् ॥ ६ ॥
कोलाञ्चवासोऽखिलयज्ञकर्त्ता क्रियाकलापेन वशिष्ठतुल्यः ।
धराधरो देवकृशानुकल्पो वेदो हि यस्मात् सुततामवाप ॥७॥
(इति कुलपञ्जिकायाम्)

धरामराणां प्रवराद्धराधराद्
वरेन्द्रभूमौ प्रससार यत्ततः ।
सञ्ज्ञामिनि ग्रामनि तत्र सत्कुले
शिखायिसान्न्याल इति द्विजोऽजनि ॥ ८ ॥
शिखायिसान्न्यालकुलस्य धारा
गङ्गेव या पुण्यतरङ्गहारा ।
पवित्रगोत्राद्रिहिताबतारा
धराधरादेव वहत्युदारा ॥ ९

यज्ञिरे तत्र धारायां दिनाजपुरसन्निधौ ।
राजारामपुरग्रामवासिनश्चक्रवर्त्तिनः ॥ १० ॥
तत्र रामहरिर्न्नाम चक्रवर्तिकुलेऽजनि ।
तर्कपञ्चाननोपाधिर्वादे पञ्चाननोपमः ॥ ११ ॥
तस्मादुदयचन्द्रोऽभूत्तर्कभूषण आख्यया ।
उदयच्चन्द्रसङ्काशः सन्देहतिमिरापहः ॥ १२ ॥
तत् पुत्रः कृष्णचन्द्रो गुणनिधिरभवन्न्यायवागीश उक्तो
वक्ता वागीशतुल्यः कविरिव सुकविर्विश्वकर्म्मेव शिल्पी ।
पाण्डित्यं शास्त्रवादे प्रतिकृतिरचने चित्रविन्यासकार्ये
काव्यानां च प्रबन्धे सदृशमवगतं भावविद्भिर्यदीयम् ॥ १३ ॥
तेनैका धरणीतलेऽमृतरसप्रस्यन्दिनी नर्म्मदा
धीरानन्दतरङ्गिनी सुकविना गम्भीरभावा कृता ।
यस्याः स्रोतसि शीतले च विमले गङ्गाप्रवाहप्रभे
क्षुत्तृड्हन्तृरसान् पिबन्ति विबुधा मज्जन्ति वा कामतः ॥१४॥
धीरानन्दतरङ्गिनीरचयितुस्तत्कृष्णचन्द्रात् सुधी-

रीशानालिकचन्द्रवच्छुचिरभूदीशानचन्द्रः कविः ।
विद्वद्रत्नमुपाधिनाखिलजना यं न्यायरत्नं विदु-
र्गाने चित्रविधौ च वर्णरचनां यस्यास्तुवन् भावुकाः ॥१५॥
वाग्देवीपरिवादिनीरणितवन्मिष्टस्वरं गायतः
पाठं यस्य च रागतानमिलितं श्रुत्वा सहर्षा बुधाः ।
आनन्दाश्रुजलच्छलेन कथयामासुर्द्रवं चेतसो
बालाश्चोचुरपि स्वभावचपलाः स्थैर्येण चौर्यं ह्यदः ॥१६॥
तस्य प्रभातस्मरणीयनाम्नः स्वर्गेऽपि नूनं गुरुवत् स्थितस्य ।
ईशानचन्द्रस्य निरङ्ककीर्त्तेरासंस्त्रयः पुत्रधरा गुणाढ्याः ॥ १७ ॥
सर्वाग्रजः श्रीहरचन्द्रनामा धीमान् द्वितीयश्च गिरीशचन्द्रः ।
ततोऽनुजन्मा च महेशचन्द्रः प्रासूत देवी हरसुन्दरी यान् ॥ १८ ॥
सोऽयं महेशचन्द्रो गुणैकनिलया गुणिश्रितो नित्यम् ।
कविता यं हि सहचरी प्रीणाति विधातृलोकेऽद्य ॥ १९ ॥
श्रीमान् धर्म्मे सुदृढस्तेजोदीप्तो मृदुः क्षमावांश्च ।
परिहासरसश्चित्रे गानविधौ च कृतिमान् लयज्ञो यः ॥ २० ॥
स्नेहान्मधुरैः स्वगुणैः सम्यक् पित्रा पितामहेनापि ।
वर्द्धित इह यो यशसा दीपयति दिशोऽधुना हि शुद्धेन ॥ २१ ॥
कविताचिन्तनविरतौ वादयतः प्रतिनिशं स्वरो मन्द्रः ।
परिवादिन्या लग्नो यस्याद्यापि च स शिष्यकर्णेषु ॥ २२ ॥
तस्य कवेर्मुखकमलाच्च श्रुतिमधुरा संस्कृतेयमुदयासीत् ।
नृत्यद्वागधिदेवीनूपुररणितानुकारिणी सूक्तिः ॥ २३ ॥
प्रकृतेरियमपि वाणी द्विसर्गमात्रा ममेह तनयस्य ।
अपरिस्फुटापि तनुतां प्रीतिं स्नेहात् पितुर्महेशस्य ॥ २४ ॥
पितरं महेशमेनं मातरमपि तां महेश्वरीं नौमि ।
अस्मिन्निव लोके यौ परत्र मिलितौ चिराय पुण्येऽपि ॥ २५ ॥
शिरसा सदयौ भक्त्या पुनरपि तावेव लोकदातारौ ।
दीनः सुकर्म्महीनो गुरू च परमौ नमामि परमेशौ ॥ २६ ॥

इति शिवमस्तु ।



भूदेवचरितपरिशिष्टे

भूदेववीरता ।

विश्वनाथगुणराजिराजितो
विश्वनाथमतिमाश्रितः कृती ।
विश्वनाथमनिशं विचिन्तयन्
विश्वनाथतनयो व्यराजत ॥ १ ॥

भोज्यजातमशनस्पृहोदये
स्वादु वारि च पिपासनोच्छ्रये ।
भेषजञ्च सुचिकित्सनं गदे
प्राप्नुमो नृपकृपाश्रयाद् वयम् ॥ २ ॥

साधुशिक्षणमिहोपकारकं
भूपपूतदयया प्रजा वयम् ।
सान्त्वनं रिपोरि भीत्युपस्थितौ
निर्भयत्वमभितो लभामहे ॥ ३ ॥

उत्सवव्यसनयोः सहायतां
वर्त्म चित्रसुलभं गतागते ।
प्राणनं प्रतिपदं निराविलं
राजपुण्यकरुणात आप्नुमः ॥ ४ ॥

तीर्थभूमिमपि दूरवर्त्तिनीम्
पर्यटन्त इह यद्वयं सुखम् ।
पुण्यमाप्तुमधिकं क्षमामहे
हेतुरत्र नृपतेरनुग्रहः ॥ ५ ॥

वाच्यमस्ति किमिहाधिकाधिकं
सर्वथा सततमेव सादरं ।
पाति नो जनकवज्जनेश्वर-
स्तत्स्मरेम कृतवेदिनश्चिरम् ॥ ६ ॥

भूमिपस्य समदर्शिनः प्रजा-
धर्मभेदनिकरेषु सत्स्विह ।
कुत्रचिद् विषमपक्षपातिता
सम्भवेन कथमप्यसम्भवा ॥ ७ ॥

स्वस्वधर्मपरिवृद्धये ततः
स्वस्वधर्महितकामनारतैः ।
स्वेच्छया सततमेव सर्वथा
यत्नतः स करणीय उद्यमः ॥ ८ ॥
हिन्दुधर्मपरिरक्षणक्षमं
हिन्दुशास्त्रमतुलं विराजते ।
तस्य पालनरतास्तु पण्डिता
ब्राह्मणाः स्युरिह पूतवृत्तयः ॥ ९ ॥
कर्मतस्तु समयप्रभावतो
हिन्दुभाग्यपरिवृत्तितस्तथा ।
शास्त्रपुष्टिविनिविष्टमानसा-
स्तेऽद्य यान्ति कृशतामृतेऽशनात् ॥ १० ॥
तेषु चाद्य बहवः स्ववृत्तयः
स्थूलमन्नमपि नो यथासुखम् ।
प्राप्नुवन्त्यतनुशाकसम्भृतं
हा कले तव महत्त्वमद्भुतम् ॥ ११ ॥
अत्र केचन सहिष्णुताजुषो
माघमेघयुतवातवेपिताः ।
सन्ति योग्यवसनोनताहता
दैवमत्र बलवन्निरर्गलम् ॥ १२ ॥
केचनेह शयनीयवस्तुनो-
ऽभावतः समधिशय्य भूतलम् ।
यापयन्ति रजनीं यथा तथा
सर्वथा हि नियतिर्बलीयसी ॥ १३ ॥
संबुभुक्षुपृथुकार्तनादतो
मातृनेत्रविगलज्जलाप्लुतः ।
एषु कस्यचन जीर्ण आलयो
हा विधे विलसितं तवाद्भुतम् ॥ १४ ॥
निर्विलासमनघं सतां सता-
मीदृशीमिह दशां विचिन्तयन् ।
प्रस्तरोऽपि गलतीति मन्यते
कैव हा हृदयशालिनः कथा ॥ १५ ॥

ह्यधुनाऽपि धनिनोऽपि हिन्दवः
स्वीयधर्म्मनिरता जयन्त्वलम् ।
दुःखदुःखमृषिकार्य्यकारिण
आसतेऽत्र किमतोऽद्भुतं महत् ॥ १६ ॥
ईदृशामिह सतां सहायता-
मन्तरेण महतीं समुन्नतिः ।
धार्म्मिकी भवितुमर्हति ध्रुवा
वस्तुतस्तु न कदापि भारते ॥ १७ ॥
सा न सम्भवति सम्यगेकतः
सत्यमेतदधुनाधिकव्यये ।
सम्भवेयुरिह मुक्तपाणयः
संहतास्तु यदि ते तदा न किम् ॥ १८ ॥
नूनमत्रभवतामपरस्परं
आमतन्तु विजिगीपुतायुगे ।
भारतेऽद्य शुभकर्मणि स्वतः
सम्भवेदिह किमग्रवर्तिता ॥ १९ ॥
अत्र किन्तु यदि कश्चनाधनो
निस्त्रपोऽग्रगतिमेत्य भक्तितः ।
वर्त्म तत्प्रकटयत्यनुत्कटं
कोऽपि तेन हि तदा व्रजेदपि ॥ २० ॥
एतदप्यदपि विश्वनाथजः
संविचार्य्य बहुधा पितुः स्मरन् ।
दीक्षितोऽत्र भवितुं सदध्वरे
चेतसा स समकल्पयन्मुदा ॥ २१ ॥
वैश्वनाथिरथ सामवादतो
मित्रबन्धुतनयादिषु स्वतः ।
प्रीतितोऽभ्यलपदेव कर्मणा
सत्वरस्तदुपपादनेऽभवत् ॥ २२ ॥
सम्पदोऽर्द्धमधिकारिणे स्वयं
संविभज्य तनयद्वयाय सः ।
अन्यदर्द्धमिह कर्मणे सते
सम्यगर्पयितुमैच्छदिष्टवित् ॥ २३ ॥

वेदधर्मवसुचन्द्रमोमिते (१८९४)
खृष्टहायन इहाग्रणीः सताम् ।
जानुयारिशुभषष्ठवासरे
दानपत्रमकरोद् विवेकतः ॥ २४ ॥
रेजेष्ट्रिकृतेन तेन तेन तु दृष्टिहस्ते समर्पिता ।
षष्टिसहस्राधिकैकलक्षमुद्रापरिमितसम्पत् ॥ २५ ॥
नीव्या अस्या अभवद् विश्वनाथट्रष्टफण्डेति नाम ।
पडुकेशनगेजेटबुधोदययन्त्रे च भवतोऽत्र ॥२६॥
निरूपितोऽस्मिन् नियमः सर्वाणि कुसीदपत्राण्येतस्य ।
सदा वेङ्गलब्याङ्के प्रथिते यथाविधि स्थाप्यानि ॥ २७ ॥
आयस्य पञ्चमांशो मूलधनेषु संयोज्येत सततम् ।
येन तैरनायासं सदा परिवर्द्धितुं शक्येत ॥ २८ ॥
आयेनावशिष्टेन विश्वनाथचतुष्पाठ्यां स्थाप्येत ।
अध्यापकाय वृत्तिः पञ्चभ्यो विद्यार्थिभ्योऽपि ॥ २९ ॥
आस्ते सुलभभेषजो-ब्रह्ममयीभेषजालयः ख्यातः ।
चिकित्सास्त्यायुर्वेदहोमियोप्याथिकीया तत्र ॥ ३० ॥
तदनुकूलयोर्विदुषोश्चिकित्सकयोर्वृत्तिरितोऽर्पणीया ।
ट्रष्टिभिरौषधदानव्यवस्थापीत एव कार्या ॥ ३१ ॥
यन्त्रवार्तावहपत्रक्षणोन्नतिव्यवस्था विधेया ।
प्रतिवत्सरमपेक्षितो व्ययोऽष्टशतमुद्रान्तो भवेत् ॥ ३२ ॥
वङ्गविहारोत्कलेषु पाठयद्भ्यः श्रुतिस्मृतिदर्शनानि ।
वृत्तिर्भवेद् वार्षिकी पञ्चाशन्मुद्रान्यूनैव ॥ ३३ ॥
वृत्तिः स्थाप्या तद्वत् त्रिंशन्मुद्रान्यूना छात्रेभ्यः ।
काशीनासिकादिषु हि वेदान्तशास्त्राध्येतृभ्यः ॥ ३४ ॥
वृत्तिर्यद्यपि साध्वीयं वर्षभोग्या तथाऽपि नो ।
पाठयन्तं पठन्तञ्च कदापि त्यजति स्वयम् ॥ ३५ ॥
अध्यापनातो विरतान् सदाचरणतश्च्युतान् ।
अध्यापकान् व्रजेन्नैव वृत्तिरेषा कथञ्चन ॥ ३६ ॥
वेदान्तपाठविमुखैः सदाचारविवर्जितैः ।
विद्यार्थिभिरियं वृत्तिः सती लभ्या कदापि न ॥ ३७ ॥
ट्रष्टिभिः परिदृष्टव्यर्थं नियोक्तुं शक्यते बुधम् ।
छात्रेभ्यः कोविदेभ्यश्च सद्ग्रन्थान् दातुमर्हते ॥ ३८ ॥

ग्रन्थागारे स्थापयितुं यथासम्भवमक्रमम् ।
सद्बुद्धिसाधकान् ग्रन्थान् क्रेतुं सम्यक् प्रभूयते ॥ ३६ ॥
परिनिष्पत्तये नूनमुक्तानां साधुकर्मणाम् ।
आयस्यैव प्रतिशतं पञ्च मुद्रा निरूपिताः ॥ ४० ॥
ट्रष्टिषु विज्ञौ तनयौ गोविन्ददेव बि एल् सिविल जज् ननु ।
कनिष्ठो मुकुन्ददेव एम् ए डेपुटि म्याजिष्ट्रेट् ॥ ४१ ॥
यथाक्रममेतावेव सभापतिः सहकारिसभापतिश्च ।
सभ्येषु भागिनेयः तिनकड़िबन्द्योपाध्यायो हि ॥ ४२ ॥
शिवमती जामातरौ शिवनाथवन्द्य एम् ए बि एल् उकिल् ।
ननु सुरेशचन्द्र चट्ट एम् ए बि एल् डे० म्याजिष्ट्रेट् ॥४३॥
सुतात्मजः क्षेत्रमोहन बन्द्योपाध्याय बि एल् मुनसेफ् खलु ।
धार्मिकाःट्रष्टय इमे निरूपिता हि मतिमता तेन ॥४४ ॥
एतेषां निरूपिता खल्वन्यट्रष्टिनियोगाधिकृतिः ।
ट्रष्टयो हि सर्वे स्युः सनातनधर्म्मावलम्बिनः ॥ ४५ ॥
उपस्थितौ ट्रष्टीनां द्वयोरपि भवितुमर्हति सभाकर्म ।
तयोरन्यतरस्तत्र कुर्वीत सम्पादककृत्यम् । ४६ ॥
ट्रष्टिभिः प्रकाशयितुं शक्येत स्वमतं स्वयं पत्रेण ।
प्रतिनिधिना वा सम्यङ् मतमधिकसंख्यस्याद् बलवत् ॥४७॥
ट्रष्टिभिर्नापचेयं कदापि मूलधनमस्य नियतमेव ।
अभ्युन्नतये सम्यक् प्रयत्येत तु सर्वथैवास्य ॥ ४८ ॥
सर्वेषां ट्रष्टीनां हानौ विश्वनाथसन्ततिकुलजः ।
यः कश्चिन्नियोजयितुमर्हेदपरांट्रष्टींस्तत्र ॥ ४६ ॥
तदभावे ट्रष्टफण्डमादाय गभर्णमेण्टो यथाविधि ।
नियोज्यापरट्रष्टीन् कर्त्तव्यं तैः सम्पादयेत् ॥ ५० ॥
पञ्चग्रहाष्टरजनीश्वरमानखृष्ट-
संवत्सरे परमधीरपवित्रवृत्तः ।
फण्डादिमातिशयचारुनियामको हा
गोविन्ददेव कृतधीस्त्रिदिवं जगाम ॥ ५१ ॥
अथ विवेकोज्ज्वलधियस्त्रयस्तत्सुताष्ट्रष्टितामधिगताः ।
आयुष्मन्तो भान्ति प्रथमोऽत्र वटुकदेव एम् ए ॥ ५२ ॥
मध्यमोऽत्र रामदेव एम् ए डेपुटि म्याजिष्ट्रेट् कृती ।
तृतीयोऽत्र भवदेवः सहृदयाः श्रीमन्तः सर्वे ॥ ५३ ॥

श्रीमन्मुकुन्ददेवस्य सोमदेवः सुतः पठन् ।
अध्यापकोपदेष्टृत्वमाप्तुं संस्कृतमिष्टदम् ॥ ५४ ॥
एकोनविंशवर्षीयो ब्रह्मचार्य्यैव हा बत ।
शोके निमज्ज्य पित्रादीन् काश्यां पुण्यवपुर्जहौ ॥ ५५ ॥
तस्यापवर्गमाप्तस्य ज्येष्ठः पुण्यकृदिष्टवित् ।
गणदेवोऽपि तत्रैव तद्गतिं प्राप्तवान् बत ॥ ५६ ॥
प्रभूतसत्त्वसम्पत्तिविभाभासितचेतसौ ।
तावापतुरहो विश्वप्रार्थनीयं परं पदम् ॥ ५७ ॥
तनयो गणदेवस्य भृगुदेवः सुदर्शनः ।
भूयादेवायमायुष्मान् श्रीमान् धीमान् सदा सुखी ॥ ५८ ॥
श्रीमन्मुकुन्ददेवस्य श्रीमन्तौ प्रियदर्शनौ ।
पवित्रशान्तहृदयौ तनयौ राजतः सुखम् ॥ ५९ ॥
तत्र प्रथमो मतिमान् कुमारदेवष्टूणफण्डस्यास्य ।
सेवककर्मचारी हि कर्मकुशलो विवेकी भाति ॥ ६० ॥
द्वितीयः कोमलमतिर्भास्करदेवो गुरुजनानुरक्तः ।
इंरेजिविद्यालये पठति नियतोन्नतये सम्यक् ॥ ६१ ॥
भूदेवपरिवारोऽपि तद्वद्विश्वनाथफण्डाधीनम् ।
भूदेववृत्तिफण्डं स्थापयति स्म विद्योन्नतये ॥ ६२ ॥
भूदेववृत्तिरेषा भारते सर्वत्र यथासम्भवम् ।
प्रसरति क्रमशः शनैरध्यापयदध्यापकेभ्यः ॥ ६३ ॥
शुद्धचेतसो गृहिणः प्रीत्या यथेच्छमुत्सवादिकर्मसु ।
दत्त्वा किञ्चित् किञ्चित् परिवर्द्धयन्ति वपुरेतस्य ॥६४॥
सोमदेवेऽधिगतवति नामशेषतां बत कुमारदेवः ।
गणदेवश्चावदतां सशोकबास्पं विचार्येत्थम् ॥ ६५ ॥
मृतसोदर्यवित्तेन वृद्धिः सम्पदां चेतो जीवताम् ।
भ्रातॄणां विवेकिनामधिकाधिकं तापयति चिरम् ॥ ६६ ॥
सोमदेवस्य लभ्यैरंशैस्तस्यैव स्मारकं किमपि ।
कार्य्यं साधु सुहृद्भिस्तत्तद्गुणमुग्धचेतोभिः ॥ ६७ ॥
श्रुत्वा सुतयोर्वचनं सोमदेवसत्कर्मभाण्डारञ्च ।
स्थापयति स्म शुभंयुः पिता मुकुन्ददेवः प्रेम्णा ॥ ६८ ॥
स्पृहणीयादेतस्मात् स्पृहणीये भूदेववृत्तिफण्डे ।
प्रतिसप्ताहं भक्त्या दीयते सपादैकमुद्रा ॥ ६९ ॥

दानधर्म्मकरुणादिषु स्वतो
वीरतामधिगतस्य भारते ।
विश्वनाथतनयस्य सत्तमं
कर्मसङ्गमनिशं विराजते ॥ ७० ॥

पूर्वपूर्वपुरुषानुकार्यलं
सत्यधर्म्मसरंलत्वमन्दिरम् ।
विश्वनाथतनयोद्भवं कुलं
सर्वथेह भुवि वर्द्धतां चिरम् ॥ ७१ ॥

यो देवोऽनलतोऽनिलात् सलिलतस्तृष्णाक्षुधापीडना-
द्राधिव्याधिविमर्दनात् किमधिकं वाच्यं समस्तापदः ।
पातीदं भुवनत्रयं प्रतिपदं पाता स कोऽपि स्वयं
भूदेवस्य कुलं सदा समवताद् वीरस्य दानादिषु ॥ ७२ ॥

वीरस्य तस्य भगवत्प्रियसाधकस्य
भूदेवशर्म्मण इह प्रियपुस्तकानि ।
सिद्धान्तजातमपि बोधविकाशनार्थ-
मद्यापि भारतभुवि प्रसरं लभन्ते ॥ ७३ ॥

इति केनचिद् भूदेवभक्तेन प्रणीते भूदेवचरितपरिशिष्टे
भूदेववीरता नाम प्रथमोऽंशः ॥

भूदेवचरित-परिशिष्ट

भूदेवग्रन्थसिद्धान्तस्मृतिः ।

विश्वनाथदयया विवेकवान्
विश्वनाथतनयो बुधाग्रणीः ।
पुस्तकानि विविधानि सादरं
लोकसाधुकृतये प्रणीतवान् ॥ १ ॥

"ग्रीस्रोमयोरितिहास" "इंलण्डस्येतिहास"श्चैतयोः ।
स्वदेशभक्तप्रसिद्धजातित्रयस्य वार्त्ता भाति ॥ २ ॥
भारतीय इतिहासे प्रायेणाधुनिके विलोक्यत एव ।
स्वधर्म्मस्वदेशवासिजनविद्वेषवार्त्ता बहुधा ॥ ३ ॥

तच्छिक्षादानाय स्वधर्मसुप्रेमिकान् मुसलमानान् ।
स्वदेशप्रेमिकांस्तान् प्रेरयदितिजानीश्वरः ॥ ४ ॥
"प्राकृतिकविज्ञाने" स इउरोपीयजड़विज्ञानसारः ।
ननु "शिक्षाविधायकप्रस्तावे" सुशिक्षणनियमः ॥ ५ ॥
तस्य च "वङ्गेतिहासतृतीयभागे" पुनर्वङ्गीयस्य ।
आधुनिकेतिहासस्य विद्यते स्वभिहित एकोऽशः ॥ ६ ॥
'सामाजिकप्रबन्धो" भावगभीर "आचारप्रबन्धः" ।
"पारिवारिकप्रबन्ध" इमे प्रणीताः सन्ति पाठ्याः ॥ ७ ॥
ग्रन्थेष्वेषु निष्ठुनः पारिवारिकं तथा सामाजिकम् ।
कर्तव्यं भारतस्य सदाचारोपयोगित्वं च ॥ ८ ॥
"विविधप्रबन्धस्य" हि प्रथमभागे संस्कृतनाटकानां ।
त्रयाणामालोचना सरसास्वादनं सुनिबद्धा ॥ ९ ॥
तस्य "द्वितीयभागे" नराणां सभ्यताविस्तृतेः कथा ।
तन्त्राणां बहुविधास्ति वार्ता या सुदुर्लभान्यत्र ॥ १० ॥
तान्त्रिकोक्तसाधनया भवति मनःशरीरस्य चरमोत्कर्षः ।
साधको बलवानाशु भयशून्यो जीवन्मुक्तश्च ॥ ११ ॥
उच्चाधिकारी वेत्ति सुगूढमर्थं पञ्चमकाराणाम् ।
न स्पृशति मद्यं क्वापि लभते च ननु महतीं सिद्धिम् ॥ १२ ॥
तथैव साधनया ननु वङ्गे पञ्जावे महाराष्ट्रेऽपि ।
राष्ट्रीयोन्नयनकृतः शक्ता आविरभवन् बहवः ॥ १३ ॥
गायत्र्या मन्त्रेण ध्यायते विश्वशक्तिर्मङ्गलायं ।
ज्ञानतोऽज्ञानतो वा तद्भवति सर्व एव शाक्तः ॥ १४ ॥
"पुष्पाञ्जलौ" निबद्धे "स्वप्नलब्धभारतेतिहासे"ऽपि च ।
भारतसमाजलक्ष्यसंयमसम्मेलनवार्त्तास्ति ॥ १५ ॥
अन्येऽपि च बोद्धव्या बहवो विषया विद्यन्ते सम्यक् ।
स्वयमेव साधुमतिभिः पठित्वा खलु ते ज्ञायेरन् ॥ १६ ॥
अवश्यपठनीयासौ "ऐतिहासिक उपन्यासे" त्वस्मिन् ।
महाराजछत्रपतिशिवाजिमहोदयस्य वार्त्ता ॥ १७ ॥
एतेभ्यो ग्रन्थेभ्यो भूदेवस्य कार्य्यतो वचनतश्च ।
कतिचिद् हितोपदेशाः संगृह्यात्र प्रकाश्यन्ते ॥ १८ ॥

भूदेव एव, मतिमान् सुगृहीतनामा
प्रावर्तयन्नवयुगं नवभारतेऽस्मिन् ।

सम्मेलनोद्यमसुसंयमतः स्वधर्म-
रक्षास्वदेशहितसाधनमस्य शिक्षा ॥ १६ ॥
खैष्टी माहम्मदी प्रीतिर्मानुषे पर्य्यवस्यति ।
बौद्धी सा प्राणिपर्य्यन्ता जैनी सैवोद्भिदन्तिका ॥ २० ॥
हिन्दोर्ध्रुवा निरवधिस्तु सनातनीय-
माब्रह्म सर्वभुवनं सुबहिस्ततोऽपि ।
तस्मिन्नवाङ्मनसगोचरवस्तुनि स्व-
मिच्छत्यहो परिनिमज्जयितुं स हिन्दुः ॥ २१ ॥
धर्मानन्यान् समत्येति व्याप्नोति च चराचरम् ।
सर्वव्यापक एवातो हिन्दुधर्म्मस्सनातनः ॥ २२ ॥
नन्वेकदा निखिलदेशजमानवौघो-
ऽशान्तोऽपि भारतनिवासिसुहिन्दुतोऽस्मात् ।
शिक्षिष्यते वचनमेव "जगद्धिताय
कृष्णाय ते नमः" इति प्रथितं पृथिव्याम् ॥ २३ ॥
वाक्येन तेन महता परजातिधर्म-
विद्वेषदोषजनितात् कलुषान्महत्तः ।
मुक्तो विशुद्धहृदयो गुरुवद् विदित्वा
वर्णादितत्त्वमधिकारिभिदां स मन्ता ॥ २४ ॥
हिन्दुर्भवेत् सविनयः सहनः सुधीरो
मुग्धः सुखे विलसिते च कदापि न स्यात् ।
आहन्तुराहतिततिं सुसुखं सहिष्णोः
पूतं बलं समधिकं त्विति विस्मरेन्न ॥ २५ ॥
विश्वेश्वरे भगवति स्थिरनिर्भरत्वं
कर्मार्पणं परमसंयमनं विधेयम् ।
हिन्दुस्ततः समरणोऽप्यमरोऽजरश्च
प्राचीनजातिरितरास्तमितान्यभावात् ॥ २६ ॥
यो ब्राह्मणोऽतिपवितो निरतः स्वधर्मे
सोऽद्यापि विन्दति सतीमुचितां सपर्य्याम् ।
त्यक्त्वाभिमानमितरोऽपि तथा यतेत
सद्ब्राह्मणो भवितुमर्हति यत् स्ववंशे ॥ २७ ॥
निर्वेतनाः क्षितिसुरा गुरवः समाजे
नैरेव सम्यगपरेऽभ्युपदेशनीयाः ।

विद्यासु तासु जगतामुपकारिणीषु
तत्ते स्वयं सुनिपुणा भवितुं यतेरन् ॥ २८ ॥
सामाजिकैकमतिधर्मसमुन्नयार्थं
नेतारमीशमवतारयितुं समिच्छेत् ।
सर्वः सदैव भगवन्तमिहार्थयेत
धर्मे च नित्यमधिकाधिकतत्परः स्यात् ॥ २९ ॥
सर्वः सदैव शमसत्यपवित्रचेता-
स्तिष्ठेद् यथैव भगवान् भवते तदीये ।
सन्नित्यधर्मधृतयेऽवतरेदतासो
रामो यतो दशरथस्य गृहेऽवतीर्णः ॥ ३० ॥
हिन्दूनां गृहिणामुदारहृदयः सीतासमेतो ध्रुव-
मादर्शः परमः स्वधर्मनिरतः श्रीरामचन्द्रः शमी ।
पुण्यात्मापि महम्मदो ननु बहुस्त्रीको विरक्तः शिशुः
खीष्टः पूततमक्रियोऽपि च तयोस्तैन्नास्ति सम्पूर्णता ॥३१॥
बहुजनकृतिसाध्येऽप्यन्यवर्णाः सुकार्य्ये
सुमहति कृतिभाजः सम्मतास्ते द्विजाग्रयाः ।
भगवत इह पूर्य्यां सर्ववर्णाविशेषं
चलति हि जनसङ्घाकृष्टरज्जूरथः सः ॥ ३२ ॥
इंलण्डीया लभन्ते निजकृतिविभवैर्भारतं वर्षमेतत्
सम्मेल्यालं समन्तात् फलमनुदिवसं राजसूयक्रतोर्यत् ।
वाष्पानोमार्गजालैर्दिशि विदिशि महत् सौष्ठवं तीर्थयानं
कृत्वा पुण्यं लभन्ते परमहितकरास्तत् सखीस्तान् सुविद्युः ॥३३॥
स्थानान्तरप्रसृतभारतवासिनृणां
सम्मेलनं यदधुनास्ति किलैकमत्या ।
कार्य्येण धीरमनसा वपुषा च नून-
मिंरेजराजसमशासनमत्र हेतुः ॥ ३४ ॥
राजा गृहाधिपतिरप्यतिमाननीया-
वावेदनैरपि तयोर्न हि कर्म्म जातम् ।
संवर्द्धयेत मतिमान् निजधैर्य्यतस्तत्
सर्वाशमप्रशमनं स्वयमेव कुर्यात् ॥ ३५ ॥
सर्वप्रान्तस्थितानामुचितमिदमलं स्वस्वभाषानिबन्धे
प्रायः शब्दप्रयोगान् प्रचुरतरतया संस्कृतानेव कुर्य्युः ।

एवं स्थित्यैव भेदा झटिति विगलिता भारतेऽस्मिन् भवेयु-
र्भाषाणामैक्यमायाज्जनहृदि विपुलःप्रमोद आविर्भवेच्च ॥ ३६ ॥

इङ्गेजिशिक्षणविदूरितहिन्दुभावाः
सुस्वादसंस्कृतसुधास्वदनानभिज्ञाः ।
ग्राम्यप्रयोगबहुविस्तृतिमाश्रयन्तो
हा ज्ञानतोऽपि बहवो जनयन्त्यनर्थम् ॥ ३७ ॥

एकत्र देश इह जन्मजुषामपीत्थं
प्रान्तान्तरेषु वसतां खलु मानवानाम् ।
भाषा मिथो ह्यविदुषां न च सम्भवन्ति
सम्मेलनात्प्रमहान्सवमित्रभावाः ॥ ३८ ॥

शिक्षां यथार्हति सुतोऽभ्यधिकां स्वतोऽपि
प्राप्तुं पराजयमलं तनयात्समिच्छेत् ।
इत्यादिकं विधिवचः शतशोऽभिनन्द्य
नूनं तथैव गृहिणां सततं विधेयम् ॥ ३९ ॥

स्नेहास्पदस्य तनयस्य सुखार्थमत्र-
संस्थापनं हि चरमं परमं विधेयम् ।
मन्यन्त एव गृहिणस्तु परोक्षदृष्टिः
शास्त्रोपदेशविषयः क्रमशोऽभिवृद्ध्यै ॥ ४० ॥

समाजसंस्कारकनामधेयाः
स्वेच्छावशाः केचन वर्तमानाः ।
प्राचीनरीतिप्रथितप्रवृत्ति
मार्गं किलाज्ञानहतं वदन्ति ॥ ४१ ॥

अवैधमान्दोलनमिष्टहीनं
हा हा सवर्णोद्वहनादिकार्ये ।
अहो पराधीनमनस्त्वमेषां
संसूचयत्येव विवेकिपुम्भ्यः ॥ ४२ ॥

जायेत हिन्दुर्विषये विरक्तः
स्वधर्मशास्त्रेङ्गितचालितश्च ।
वर्णेषु पुंसामपि तावदुच्चैः
शुभो विवाहः सकृदेव कार्यः ॥ ४३ ॥

देशान्तरे जनिमतां वसतामपीह
श्रेण्यन्तरे च भवतां वसुधासुराणाम् ।

अन्योन्यमुद्वहनकर्मणि बाधकं स्याद्-
गोत्रादिवर्जमितरन्न हि शास्त्रसिद्धम् ॥ ४४ ॥
संस्काररदूरवसती प्रतिबन्धिके स्तः
शिक्षर्द्धिबाल्यशकटाध्वबहुप्रसूत्या ।
सम्यक्नयात्सुतयोस्तु तयोः क्रमेण
नूनं परस्परमहो भविता विवाहः ॥ ४५ ॥
एवं सतीह भविताधिकमानवानां
हिन्दी प्रधानतमभावगतैव भाषा ।
सम्मेलनस्य परिवर्द्धनतः समाज
आविर्भवेदभिनवा शुभसंस्कृतिः सा ॥ ४६ ॥
इत्थं नवेऽत्र विषये सततं जनाना-
मान्दोलनेन जनिता शुभवासना स्यात् ।
क्षत्रादिवर्णसमितिष्वपि कार्य्यमेव-
मायाति वैधशुभसंस्करणस्य कालः ॥ ४७ ॥
कालप्रभावादधुना समाजे
हा हा स्वजातीयजनस्य निन्दा ।
अन्योन्यमीर्षाऽननुवर्तनञ्च
विवृद्धिमायान इहातितीव्रम् ॥ ४८ ॥
अहो अहो ! कौलिकहिन्दुधर्म्म-
स्वर्चासु देशान्तरजन्मभाजाम् ।
अलङ्कृद् मुस्लानामधुना समाजे
नेतृत्वमङ्गीक्रियते विचित्रम् ॥ ४९ ॥
हिन्दूनामेव धर्मोऽस्ति निजस्वं तद् विदेशजैः ।
विवेकानन्दवद् हिन्दुर्नेता तस्मिन्नपेक्ष्यते ॥ ५० ॥
योग्यः स्वजातीयजनः सदैव
सम्माननीयोऽधिकमुन्नतानाम् ।
एवं सति स्फूर्तिमुपैति वैधी
समुन्नतिर्नो सति वैपरीत्ये ॥ ५१ ॥
निर्माय हिन्दुः शिवलिङ्गमस्मिन्
प्राणप्रतिष्ठां स्वकरेण कृत्वा ।
प्रणम्य भक्त्यावनतेन मूर्ध्ना
ततो वरं प्रार्थयतेऽनुरूपम् ॥ ५२ ॥

स्वास्थ्यं न सम्यगधुना प्रतिग्रामं प्रतिनगरं च तस्मात् ।
तन्निवासिजनसङ्घैस्तत्स्थः कोऽपि नेता कार्य्यः ॥ ५३ ॥
मतिमतस्तस्य नेतुर्मत्या विहाय मतभेदं सम्यक् ।
मलनिःसरणसलिलाधारशोधनं खलु विधेयम् ॥ ५४ ॥
वायुगतिवर्त्मसंस्कृतिगृहादिशुद्धिव्यवस्था सर्वथा ।
कार्या सदनुष्ठितिरपि होलाकोत्सवादिरूपात्र ॥ ५५ ॥
शिक्षार्थं लोकानामत्र पुराणादिपाठः कथकता ।
सङ्कीर्त्तनमपि भक्त्या क्रियेरन् कार्येरंश्च सदा ॥ ५६ ॥
वैधनृत्यगीतादौ स्वधर्मोन्नत्यां साधुक्रीडने ।
वैधोपकृतौ च सदा सम्मेलनेन कृत्येन ॥ ५७ ॥
एवं सतीर्ष्यादिके समूलमुन्मूलिते वृत्ते स्वास्थ्ये ।
प्रसरत्यानन्दोत्से जातेऽन्योन्यं सम्मेलने ॥ ५८ ॥
प्रेम्णि प्रसरति सततं समन्ताद् विकाशितायाश्च श्रियाम् ।
त्रिदिवस्य सती सुषमा प्रकाशेतेहापि विचित्रम् ॥ ५९ ॥

धीमन्त एव कतिचिद् युगपत् समाजे
धीमन्तमेकमनघं स्वसमाजनिष्ठम् ।
सम्मान्य तस्य मतितो यदि यान्ति नूनं
साध्वी तदा भवितुमर्हति तत्र रीतिः ॥ ६० ॥
भूपस्य राजपुरुषस्य गुरोश्च कार्य्या
प्राचीनरीतिमनुसृत्य सदर्हणार्थम् ।
तन्नामतः स्थितिमती सदनुष्ठितिस्तु
नाडम्बरैरिह वृथापचयो विधेयः ॥ ६१ ॥
विद्यालयेषु भवनेषु च बालकाना
मुच्चैःसुशिक्षणमलं हृदये स्वधर्म्मे ।
संस्थापयेदिह ततो नवभारतस्य
सत्योन्नतिः खलु भविष्यति निर्विरोधा ॥ ६२ ॥
अस्मिन्सुशिक्षणविधौ क्षितिपानुकूल्यं
नापेक्षणीयमधिकाधिकमर्थनीयम् ।
कर्तव्यमेतदनघं प्रथमं प्रधानं
व्यासादिसाधुपदवीगतिसत्वराणाम् ॥ ६३ ॥
दारिद्र्यमर्दनहतैः खलु भारतीयै-
स्तुष्येत साधुनिजदेशजदीनशिल्पैः ।

स्थीयेत निर्विलसनव्यसनैः स्वदेशे
प्रीतिः क्रियेत परजातिमिहाद्विषद्भिः ॥ ६४ ॥
नापेक्षते गुरुजनस्वजनानुरक्तौ
विद्वेषणं कथमपि प्रतिवेशिनोऽपि ।
धर्म्मानुरागसुविवेकसमुज्ज्वलास्तु ।
तेषां स्वयं सहृदयाः सुहृदो भवन्ति ॥ ६५ ॥

सिद्धान्तानिति तान् वधार्य्य मनसा धाग्भिः प्रकाश्य स्वयं
सन्दर्श्याचरणैर्यथाविधि चिरं नूनं नवे भारते ।
आविर्भाव्य नवं युगं हितकरं सत्यव्रतः संयमी
भूदेवो गृहिचित्रमुज्ज्वलतमं प्रादर्शयत् सर्वथा ॥ ६६ ॥

इति केनचिद् भूदेवभक्तेन प्रणीते भूदेवचरितपरिशिष्टे
भूदेवग्रन्थसिद्धान्तस्मृतिर्नाम
द्वितीयोंऽशः ।

(शिवमस्तु)

(समाप्तोऽयं ग्रन्थः)

शुद्धिपत्रम् ।

(सूचनायाम्)

अशुद्धम्	शुद्धम्	पृष्ठा	पंक्तिः
खण्डशः	खण्डानां	१	६
ानकार्द्ध	ऽर्द्धानकं	१	६।१०
अङ्गे वङ्ग, कलिङ्गे	अङ्गेषु वङ्गेषु कलिङ्गेषु	१	१०
वङ्गे	वङ्गेषु	१	१८
केऽपि	कोऽपि	१	१६
विप्रत्यपद्यन्त	विप्रत्यपद्यत	१	१६
द्वाविंशति	द्वाविंश	२	१३
नात्यसम्भाविनः	नात्यसम्भाविनो गुणा दर्शिताः	२	२७।२८
प्रायो न	प्रायो ये न	२	२८
तत्	तत् प्रतिपादका	,,	,,
सर्वं	तथा सति ते सर्वं	,,	२६
पुस्तकवाचं	पुस्तकं वाचयित्वा	,,	३०

(भूदेवचरिते)

अशुद्धम्	शुद्धम्	पृष्ठा	पंक्तिः
दुरगाम्	दुरगम्	२	८
भुक्ता	भुक्तं	,,	६
निरुप्य	निरूप्य	८	३
वधान दानं	वधानदानं	१५	६
विलोम्य	विलोभ्य	१६	२
उलाष्टनाम्ना	उलाष्टननाम्ना	१७	२७
चतुर्विंशति	चतुर्विंशति	१८	२१
मद्भुता	मद्भुतो	२०	६
मधात	मधीत	२६	१
परीक्ष्यते	परीक्षते	२६	४
रभ	क्रम	,,	,,
दिषा चन्द्र	दिवाचन्द्र	,,	१७

अशुद्धम्	शुद्धम्	पृष्ठा	पंक्तिः
नास्तरं	नोत्तरं	२७	२६
कुलक्रम	कूलक्रम	२८	१६
रम्येषु	रम्येषु	३२	१४
प्रासासर	प्रासीसर	,,	३२
मुद्रस्य	मुद्यस्य	३३	१५
पराह्ले	पराह्ले	३४	४
ताम्बुला	ताम्बूला	३४	१८
तीदन	तीदण	३५	१८
पुरूषेभ्यः	पुरुषेभ्यः	३५	३०
कत्य	कृत्य	३६	१६
शिशुंता	शिशोस्ता	,,	२३
पुरष्क्रिया	पुरस्क्रिया	३८	५
,,	,,	,,	१६
,,	,,	,,	१७
,,	,,	४१	२४
श्यालकच्छिरु	श्यालकशिछरु	३८	६
मञ्जुषा	मञ्जूषा	३६	५
,,	,,	,,	२५
सछिरु	सच्छिरु	३६	६
तत्	तम्	४१	६
विलम्वते	विलम्ब्यते	४२	८
कुलभघो	कुलभुणो	,,	१७
गङ्गां	गङ्गाम्	४३	२७
इत्थ	इत्थं	४४	६
रिडत-	रिडतम्	४४	२४
जनं	जनम्	,,	२७
तत्तृस्य	तत्तृस्य	,,	३०
कारणे।	कारणे	४५	२२
धामद्युके	धामद्युके	४५	२१
कान्तः	कान्तं	४७	३

अशुद्धम्	शुद्धम्	पृष्ठा	पंक्तिः
सिद्धेत्यतो	सिध्यत्यतो	”	२८
मुक्त	मुक्ता,	५०	१५
मन्येषामपि	मन्येषामपि	५०	२७
लघय	लघय.	५१	२१
तच्छ्रुत्वा	तच्छ्रुत्वा	५२	७
वयर्त्तत	वर्त्तयत्	”	११
त्रिकोणं	त्रिकोणं	५३	१७
ग्रन्थिः	ग्रन्थिः	५५	१
छात्रैं	च्छात्रैं	५६	८
वर्गं	वर्गं	५७	५
भूदेव	भूदेव	”	६
दन्यैः	दान्यैः	”	”
संख्या	सख्यो	”	१०
भाष	भाव	”	२१
तमां	तमां	५८	२७
त्वदीयं	तदीयं	५९	१
प्रेम्नि	प्रेम्णि	”	५
प्रज्ञात्	प्राज्ञात्	६१	२४
तामो	तामी	६२	१५
नमंस्वत	नमंसत	६३	६
वृत्तं	वृत्ति	६४	३
तु	तुं	६७	५
भी	भो	”	११
सप्त	अष्ट	६९	शीर्षे
”	”	७१	”
कस्वि	कश्वि	७२	१९
स	सा	७८	१
सन् स	सनूस	८०	१३
रुप्याणि	रुप्याणि	”	१४
देहिममेव	देहीममेव	”	१७

अशुद्धम्	शुद्धम्	पृष्ठा	पंक्तिः
तद्धन	तद्धनम्	"	१८
गलद्	गलद्	८१	७
तवन्यो	त्वदन्यो	८२	२२
क्रीणालि	क्रीणामि	८३	११
मां	माम्	८४	१०
ममाप्य	ममाप्य	८४	२०
मापदा	मा पदा	८५	४
सुनृतां	सूनृतां	"	५
स्तादृश	स्त्वादृश	"	१०
सुनृतां	सूनृतां	"	२३
स्तथा	तथा	८७	३
समर्पयन्	समार्पयन्	"	५
सम्वाद	संवाद	"	८
तान् श्रुत्वा	ताञ्छ्रुत्वा	"	११
विसम्वादि	विसंवादि	८८	५
परात्तां	परीक्षां	"	१५
या या	या	८६	१६
तदा यति	तदांयति	६३	६
नतनां	नतानां	६५	२८
युक्त	युक्तं	६६	१५
स्यं	स्थं	"	२४
भिप	विप	६८	१५
प्रशंसा	प्रशंसां	६६	१६
सुतीक्ष्ण	सुतीक्ष्ण	"	२२
५६॥	५६॥ (युग्मकम्)	"	२
नास्ति	नैव	"	२
स्वास्थ्यंमपी	स्वास्थ्यमपी	१०१	६
च्छ्रुत्वा	च्छ्रुत्वा	१०२	७
भूक्ता	भुक्त्वा	१०२	८
स्पीय	स्पीप	१०४	६

अशुद्धम्	शुद्धम्	पृष्ठा	पंक्ति.
ह्रं	ह्ले	१०६	४
हेतुयर	हेतुया	"	५
पौ	प.	१०८	१
कृत	कृतं	"	१०
श्विरं	श्चिरं	११०	६
जह्न	जह्नु	"	१९
निरीक्ष्य	निरीक्ष्य'	"	२१
संश्रवा	संस्रवात्	११३	११
पदात	पदात्	११६	१६
वित	वित्	११८	१०
कक्षत्	कक्षवत	१२१	८
मद्	म	१२४	३
स्वतलं	स्वतलं	१२५	१
भू	मू	"	१६
ऊद्र्ध्व	उद्र्ध्वा	१२६	२
नी	नि	"	२१
न्त्रि	न्द्रि	१२७	१७
माप्नोति	मभ्येति	"	१८
वचुनेन	वचनेन निवर्त्तितुमित्यन्तर्भू:		
एय	तएयर्थ प्रयोगः	१३०	२४
ह्री	ह्रि	१३१	१६
नरं	नरम्	१३३	१
भति	मति	१३५	१७
सतती	स ततो	१३६	१८
जत्र	यत्र	१३७	२१
दत्य	इत्य	१४२	२७
प्रभवानी	प्रभवाणी	१४३	४
सक्षोऽनुजो	सक्षो निजोऽनुजो	"	६
ती	तीं	"	१२
सि वत्तत्र	सिवत्तत्र	१४५	२

अशुद्धम्	शुद्धम्	पृष्ठा	पंक्तिः
यथोक्तं	यथोक्तम्	”	४
येण	येन	”	१३
त्वमेतां	त्वमेताम्	”	१६
स्त स्तां	स्तांस्त	”	२४
भवता वधार्यं	भवतावधार्यं	१४७	१०
श्रार्य्यां	न्यार्य्यां	१४८	१४
च्छुत्ना	चंछुत्वा	१४६	२०
त्मनां	त्मनाम्	१५०	१७
बुघं	बुधम	१५३	१५
सहख	सहस्व	१५५	५
निर्दृष्टो	निर्दिष्टं	१५७	२०
द्धनि	दूंधूनि	१६१	१४
सुभाषितं	सुभाषितम	१६२	११
मत	स त	१६७	१४
त्वयि	स्त्वयि	१६६	८
श्रयो	सूयो	१६०	१
कीति	कीर्त्ति	”	१४
यद्य	यद्व	”	१५
निर्वृत्तः	निर्वृतः	१७०	२५
प्युश्चावूचाः	प्युश्चावचाः	१७१	२
लहृदा	स हृदा	१७२	६
प्रेम्नः	प्रेम्णः	”	१२
योन्	यो	”	२१
मुखार्घ	मुखार्था	१७३	२६
म भू	मभू	१७४	१३
मती	मतो	१७५	५
लिखित्वां	लिखित्वा	”	४
मतो	मतो	”	२५
याणा	पाणा	१७८	१५
प्राप्नोति	प्राप्योति	१८०	३

अशुद्धम्	शुद्धम्	पृष्ठा	पंक्ति:
पार्शं	पार्श्वं	१८१	१६
पात्रे	पत्रे	१८४	२
नीऽस्मि	नीमि	१८६	१७
माम्त्रणो	माम्स्त्रणो	”	१८
गुरुन	गुरून्	१८७	१८
कथांना	कथाम्ना	१८८	१३
सव्याहयन्	संवाहयन्	१९०	२१
आंर्ता	आर्ता	१९१	२५
दुंश्चरा	दुंश्चरा	१९२	१२
स्ना न	स्नान	१९३	५
सं	स	१९४	३
कलमस	कलमष	”	२०
कर्म्मा	कर्म्मं	”	२३
यागन्तु	मागन्तु	”	”
चरित	रचित	१९६	३
दूर्वाग्	दूर्दृवाग्	१९८	६
दुंवा	दूंवा	”	२२
दुंहति	दूंहति	”	”
लक्य	लेख्य	१९८	२१
भाषकाः	भाष्यकाः	”	२३।६
सम्मत्	सम्पत्	१९९	८
नयनमपि	नयमपि	”	१६
वृष्टिशभि	वृष्टिश्भि	२००	११
भुं	भूं	२०१	४
माथ	गाथ	२०२	२
प्रभूना	प्रभुणा	”	२२
वृत्तिः	वृत्ति	२०३	७
मे	भे	”	१५
मू	भू	”	१९
ऽन्यस्य	न्यस्य	२०४	२१

अशुद्धम्	शुद्धम	पृष्ठा	पंक्तिः
विधा	विधा	२०५	”
प्राश्रे	पात्रे	२०६	१७
पित	पितृ	२०८	१६
नत्वा	नत्त्वा	२०९	७
”	”	”	२२
भवा	भवाः	२११	६
त्व	त्वं	२१२	२८
शामि	शमि	२१३	२६
प्रस्ताव	प्रस्तार	२१६	८
वृत्या	वृत्या	”	११
वे…आ	वेदितुं माक्षिकस्पातयां	२१७	चित्रे
नं	नां	”	”
त्युक्ते	त्युक्त्वे	२१७	११
मुप	उप	२१८	२
रच्छा	रश्छा	”	५
म	प्र	”	चित्रे
माच	च	२२३	२७
भू	भुं	२२४	६
मया	भया	”	”
मिन्ने	भिन्ने	२२६	२२
ध्य	धा	२२८	१
अग्रा	अंग्रा	२२९	१५
यत्तं	यत् तं	”	पद्मोरयदले
पायो	दयो	२३०	६
जितेन्द्रियस्तं	जितेन्द्रियम्	२३२	२८
जेहा	जेनाः	२३३	५
कः	काः	२३४	४
यत्रा	यला	२३७	१०
शास्ते	शास्त्रे	२३८	२२
अमू	अमुं	२३९	४

अशुद्धम्	शुद्धम्	पृष्ठा	पंक्तिः
श्वतुः	श्चतुः	२४०	४
दृष्टया	दृष्टा	,,	२४
द्विजः	द्विजैः	,,	२८
वन्द्यं	बन्धुं	२४१	६
विवेकी	पितृभ्यां	,,	,,
विष्णु स्तपः	विष्णुस्तपः	,,	११
परांश्च	पराश्च	,,	१८
योगीवसाधुः	भूदेवयोगी	२४२	८
र्नि	नि	,,	६
मांया	माना	,,	२४
त्रिशृच्	त्रिंश	२४३	२३
आशा	°नाशा	,,	२६
ज्ञ	ज्ञ	२४४	१८
सुस्विता	सुखिता	२४५	१२
प्रीतिः	प्रीतिं	२४७	३
गङ्गा	गङ्गा	२४८	१६
योगिनं	योगिनां	२४६	३०
हूंसा	हंसा	२५०	१२
बक्षि	अक्षि	२५१	१८
नी	णी	,,	२६
,,	,,	,,	३२
न्याप	न्याय	२५२	२
स्वभाल	स्वभाव	,,	७
दीप्तो	दीप्तो	,,	१४
धुनाहि	धुनापि	,,	१७
मंख	मुंख	,,	२०
लाच	लाच्	,,	,,
न्तुमो	ण्तुमो	२५३	१०
न्तुव	ण्तुव	२५४	१५
वतु	वटु	२५७	३०

अशुद्धम्	शुद्धम्	पृष्ठा	पंक्तिः
त्यम्	त्थम्	२५८	२६
वाक्य	वाक्य	"	"
कानां	कानाम्	२६०	११
तरे हता	तरेहता	२६२	६
वाक्य	वाक्य	२६२	२१
मीर्षा	मीष्या	२६४	१७
येषु	येषु	२६५	२२

परिशिष्टे संज्ञोपाधीनामविकलत्वरक्षणाय यस्याः पादे प्रथमे द्वादशमात्रेत्याद्यभिहितमात्रामात्रानुसरणमार्यासु विहितमिति। बकारवकारयोरशुद्धिः स्वयमूहनीयेति।

टीकायां विशेषता द्रष्टव्यम्।

धर्म्मः प्रवृत्तिधर्म्मः अविशुद्धियुक्तः ६६ पृ० ५१ श्लो० टी०। अतीते कल्पे। तेषां कुसङ्गजनितकुसंस्काराणामपगमः १३ अ-सर्ग ४२ श्लोक-टीकातोऽवगन्तव्यः १०३ पृ० १७ श्लो० टी०।

प्रेरिताः इत्यनन्तरं एतत् पठनीयम्, उपदेशरीतिश्चैवम्, विश्वव्यापकः करुणामयो भगवान् नहि जडं परित्यजन् विश्वं व्याप्नोति। जडानामपि वस्तूनां केनचिद्रूपेण साजात्येऽपि नहि सर्व्वथैकरूप्यं, येनेतरशिलाखण्डवत् शालग्रामशिलापि गण्येत। मातुरङ्गत्वेन सर्व्वेषामवयवानां साम्येऽपि स्तनादेव प्रवर्त्तमानं पयः स्तनन्धयमाप्याययति नाङ्गान्तरात्, मणित्वेन चन्द्रकान्तसूर्यकान्तपद्मरागादिमणीनां साम्येऽपि सूर्यकान्तमणिरेव पृथिवीव्यापिरविकिरणं विशेषेण गृह्णन् वह्निमुत्पादयति न त्वन्ये मणयः, एवं शिलात्वेन शिलान्तरसमानापि शालग्रामशिला सर्वव्यापिनारायणभावमधिकं गृह्णाति, सेविता च भक्तानाप्याययति। आधिक्येन तद्ग्रहणमेव तत्र तत्सन्निधानम्। ततएव साधकैः सेवनीया। एतेन वाणलिङ्गादयो व्याख्याताः। मृदादिप्रतिमासु देवतासान्निध्यं च मन्त्रशक्त्या। अचिन्त्या हि शक्तिः नहि लोकदृष्ट्या निरूपयितुं शक्यते।

न खलु जडोपासनास्माभिः क्रियते किन्तु नरादिदेहे चैतन्या-

धिष्ठानवत् शालग्रामादिषु चेतनदेवतासन्निधानं प्रतीत्य तत्पूजनं क्रियत इति। १२६ पृ० १३ सं०, ४२ श्लो० टीका।

धवयुगमित्यनन्तरं पठनीयम्—

देवमन्दिरम् शालग्रामाद्यधिष्ठानगृहम्। आदिपदग्राह्यदेवताश्च ८५ तमश्लोकटीकायां वक्ष्यन्ते।

समापयामास इत्यन्तरं पठनीयमेतत्—कुलदेवताश्च इति शेषः। तत्रार्चीत् कुलदेवतामिति ८३ म श्लोके कथितत्वात्। कुलदेवता च कुलमन्त्रदेवता कुलस्य गृहस्य देवता च। दधिवामनाख्यशालग्रामशिलाधिष्ठितनारायणो वाणलिङ्गाधिष्ठितशिवः प्रतिमाधिष्ठितान्नपूर्णा घटाधिष्ठिता मङ्गलचण्डी च भूदेवगृहदेवता। पुरा किल पूर्व्वपुरुषसेवितश्रीधराख्यशालग्रामशिला केनचिदपजह्रे तथापि तदुद्देशेनान्नाद्युपहारदानरीतिः पैतृकी। तदत्यत्र पूजनमित्यनेन ग्राह्यम्। अधिष्ठानादिभेदेऽपि सर्व्वासामेव देवतानां वास्तवाभेदात् कुलदेवतामिति ८३ म श्लोके यदेकवचनमुपात्तं तदनुरोधेनात्र कुलदेवताश्च इत्येकत्वेन निर्द्देशः। पूजकस्य तथा प्रत्ययाच्च। २०६ पृ० ८५ श्लो० टी०

प्रसूश्चासौ उश्चेति। उः उमा। तत्स्वरूपा तां मन्त्राक्षरविन्यासोऽपिवर्त्तते तेन दीक्षादात्र्या मातुर्मन्त्रदेवतारूपत्वमायातं। त विश्वनाथमिति तत्पदवाच्यब्रह्मस्वरूपत्व पितुरिति सूचितम् २४८ पृ० ३१ श्लो० टी०।



सर्वजन प्रशंसित भारत का अमूल्य रत्नद्वय।

हिन्दी

पारवारिक प्रबन्ध	मूल्य १)
आचार प्रबन्ध	मूल्य १)

मिलने का पता—श्रीकुमार देव,

अस्सीधाम

बनारस सिटी।




LIBRARY
CALCUTTA